॥ श्रीगणेशाय नमः ॥

॥ श्रीसरस्वत्यै नमः ॥ श्रीवेदपुरुषाय नमः ॥

अथानुवाकसूत्रम् ॥ इषेत्वैका वसोः पवित्रन्तिस्रोऽग्नेव्रतपते
सप्त पवित्रेस्थो द्वे शर्मासि तिस्रो धृष्टिरसिशर्मासि द्विकौ देवस्यत्वा
तिस्रो देवस्यत्वा पञ्च प्रत्युष्टᳪ रक्षास्तिस्रो दशैकत्रिᳪशत् ॥ हरिः
ॐ इषेत्त्वा ॥ इषेत्त्वोर्ज्जेत्त्वावायवस्थदेवोवः सविताप्प्रार्प्पयतुश्रे
ष्ठतमायकर्म्मणऽआप्प्यायध्वमघ्न्याऽइन्द्रायभागम्प्रजावतीरनमी

संहि.

वाऽअयक्ष्मामावस्तेनऽईशतमाघशंᳬसोद्ध्रुवाऽअस्मिन्गोपतौस्या

तबह्वीर्यजमानस्यपशून्पाहि ॥ १ ॥ [१] वसोःपवित्रम् ॥ वसोः

पवित्रमसिद्यौरसिपृथिव्यसिमातरिश्वनोघर्म्मोसिविश्वधाऽअसि ॥

परमेणधाम्नादृᳬहस्वमाह्वार्म्मातेयज्ञपतिर्ह्वार्षीत् ॥ २ ॥ वसोःपवि

त्रम् ॥ वसोःपवित्रमसिशतधारंवसोःपवित्रमसिसहस्रधारम् ॥ देव

स्त्वासवितापुनातुवसोःपवित्रेणशतधारेणसुप्वाकामधुक्षः ॥ ३ ॥

साविश्वायुः ॥ साविश्वायुःसाविश्वकर्म्मासाविश्वधायाः ॥ इन्द्रस्य

॥ १ ॥

धूरसि

त्त्वाभागꣳसोमेनातनच्मिविष्णोहव्यꣳरक्ष ॥ ४ ॥ [३] अग्नेव्व्रत
पते। व्व्रतञ्चरिष्यामितच्छकेयन्तन्मेराध्यताम् ॥ इदमहमनृतात्स
त्यमुपैमि ॥ ५ ॥ कस्त्वा। युनक्तिसत्त्वायुनक्तिकस्मैत्वायुनक्तित
स्मैत्वायुनक्ति ॥ कर्म्मणेव्वांव्वेषायवाम् ॥ ६ ॥ प्रत्युष्टꣳरक्षः ॥ प्रत्यु
ष्टꣳरक्षःप्रत्युष्टाऽअरातयोनिष्टप्तꣳरक्षोनिष्टप्ताऽअरातयः ॥ उर्व्व
न्तरिक्षमन्वेमि ॥ ७ ॥ धूरसि। धूर्व्वधूर्व्वन्तन्धूर्व्वतंय्योस्मान्धूर्व्वति
तन्धूर्व्वयंव्वयन्धूर्व्वामः ॥ देवानामसिव्वह्नितमꣳसस्नितमम्पप्रितम

मञ्जुष्टतमन्देवहूतमम् ॥ ८ ॥ अह्रुतमसि । हविर्द्धानन्दृꣳहस्वमा
ह्वाम्मार्तेयज्ञपतिर्ह्वार्षीत् ॥ विष्णुस्त्वाक्क्रमतामुरुव्वातायापहतꣳ
रक्षोयच्छन्ताम्पञ्च ॥ ९ ॥ देवस्यत्वा । सवितुः प्रसवेऽश्विनोर्ब्बाहु
भ्याम्पूष्णोहस्ताभ्याम् ॥ अग्नयेजुष्टङ्गृह्णाम्यग्नीषोमाभ्याञ्जु
ष्टङ्गृह्णामि ॥ १० ॥ भूतायत्वा ॥ भूतायत्वानारातयेस्वरभिविख्ये
षन्दृꣳहन्तान्दुर्य्याः पृथिव्यामुर्वन्तरिक्षमन्वेमिपृथिव्यास्त्वानाभौ
सादयाम्म्यदित्याऽउपस्थेग्नेहव्यꣳरक्ष ॥ ११ ॥ [७] पवित्रे

स्थᳵ ॥ पवित्रेस्त्थोव्वैष्णव्यौसवितुर्व्वः प्प्रसवऽउत्पुनाम्म्यच्छिद्रेण
पवित्रेणसूर्य्यस्यरश्मिभिः ॥ देवीरापोऽअग्ग्रेगुवोऽअग्ग्रेपुवोग्ग्रेऽ
इममद्ययज्ञन्नयताग्ग्रेयज्ञपतिꣳसुधातुंयज्ञपतिन्देवयुवम् ॥ १२ ॥
युष्म्माइन्द्रः ॥ युष्म्माऽइन्द्रोवृणीतवृत्रतूर्य्येयूयमिन्द्रमवृणीद्ध्वं
वृत्रतूर्य्येप्प्रोक्षितास्त्थ ॥ अग्ग्नयेत्त्वाजुष्टम्प्प्रोक्षाम्म्यग्नीषोमाब्भ्या
न्त्वाजुष्टम्प्रोक्षामि ॥ दैव्यायकर्म्मणेशुंधद्ध्वन्देवयज्ज्यायैयद्वोशुद्धाᳵ
पराजग्घ्नुरिदंव्वस्तच्छुन्धामि ॥ १३ ॥ [२] शर्म्मासि ॥ शर्म्मा

संहि. स्यवधूतꣳरक्षोवधूताऽअरातयोदित्यास्त्वगसिप्प्रतित्त्वादितिर्वेत्तु ॥ पृ. अ.
३ ॥ अद्रिरसिव्वानस्पत्योग्रावासिपृथुबुध्न ः प्प्रतित्वादित्यास्त्वग्वेत्तु ॥ १ ॥
॥ १४ ॥ अग्नेस्तनूः ॥ अग्नेस्तनूरसिव्वाचोव्विसर्जनन्देववीतये
त्वागृह्णामिबृहद्ग्रावासिव्वानस्पत्य ः सऽइदन्देवेब्भ्योहविः शमीष्व
सुशमिशमीष्व ॥ हविष्कृदेहिहविष्कृदेहि ॥ १५ ॥ कुक्कुटोसि ॥
कुक्कुटोसिमधुजिह्वऽइषमूर्ज्जमावदत्वयाव्वयꣳ सङ्घातꣳ सङ्घातञ्जेष्म
॥ ३ ॥ व्वर्षवृद्धमसिप्प्रतित्वाव्वर्षवृद्धंव्वेत्तुपरापूतꣳ रक्ष ः परापूता ऽअरातयो

पंहत ६ं रक्षोवायुर्वोविविनक्तुदेवोवं ÷ सवितहिरण्यपाणि ६ं प्रतिगृ

भ्णात्वच्छिद्रेणपाणिना ॥ १६ ॥ [३] धृष्टिरसि ॥ धृष्टिरस्य

पाग्नेऽअग्निमामादञ्जहिनिष्क्रव्यादं६ंसेधादेवयजंवह ॥ ध्रुवमसि

पृथिवीन्दृ६ हब्रह्मवनित्वाक्षत्रवनिंसजातवन्युपदधामिभ्रातृव्य

स्यवधाय ॥ १७ ॥ अग्नेब्रह्मं । गृभ्णीष्वधरुणमस्यन्तरिक्षन्दृ६

हब्रह्मवनित्वाक्षत्रवनिंसजातवन्युपदधामिभ्रातृव्यस्यवधाय ॥

धर्त्रमसिदिवन्दृ६ंहब्रह्मवनित्वाक्षत्रवनिंसजातवन्युपदधामिभ्रा

तृतीयस्यव्वधाय ॥ व्विश्वाभ्यस्त्वाशाभ्यऽउपदधामिचितस्स्थोर्द्ध्व
चितोभृगूणामङ्गिरसान्तपसातप्यद्ध्वम् ॥ १८ ॥ [२] शर्मासि ॥
शर्म्मास्यवधूतꣳरक्षोवधूता ऽ अरातयोदित्यास्त्वगसिप्प्रतित्वादिति
र्व्वेत्तु ॥ धिषणासिपर्व्वतीप्प्रतित्वादित्यास्त्वग्ग्वेत्तुदिवस्कम्भनीरसि
धिषणासिपार्व्वतेयीप्प्रतित्वापर्व्वतीव्वेत्तुधान्यमसि ॥ १९ ॥ धान्य
मसि । धिनुहिदेवान्प्राणायत्वोदानायत्वाव्यानायत्वा ॥ दीर्ग्घा
मनुप्प्रसितिमायुषेधान्देवोवः सविताहिरण्यपाणिः प्प्रतिगृब्भ्णात्व

चिछद्रेणपाणिनाचक्षुषेत्त्वामहीनाम्पयोसि ॥ २० ॥ [२] देवस्य
त्वा । सवितुः प्प्रसवेश्विनोर्ब्बाहुभ्याम्पूष्णोहस्ताभ्याम् ॥ संव्व
पामिसमापऽओषधीभिःसमोषधयोरसेन ॥ सꣳरेवतीर्ज्जगतीभिः
पृच्यन्ताꣳसम्मधुमतीर्म्मधुमतीभिःपृच्यन्ताम् ॥ २१ ॥ जनय
त्यैत्त्वा ॥ जनयत्यैत्त्वासंय्यौमीदमग्नेरिदमग्नीषोमयोरिषेत्त्वाघ
र्म्मोसिव्विश्वायुरुरुप्प्रथाऽउरुप्प्रथस्वोरुतेयज्ञपतिः प्प्रथतामग्नि
ष्टेत्त्वचम्माहिꣳसीद्देवस्त्वासविताश्रपयतुव्वर्षिष्ठेधिनाके ॥ २२ ॥

संहि. माभेः ॥ माभेर्म्मासंविक्थाऽअतमेरुर्य्यज्ञोतमेरुर्य्यजमानस्यप्प्र पू. अ.
॥ ५ ॥ जाभूयात्त्रितायत्त्वाद्वितायत्त्वैकतायत्त्वा ॥ २३ ॥ [३] देवस्यत्त्वा । ॥ १ ॥
सवितुःप्प्रसवेश्विनोर्ब्बाहुभ्याम्पूष्णोहस्ताभ्याम् ॥ आददेध्वरकृ
तन्देवेभ्यऽइन्द्रस्यबाहुरसिदक्षिणः सहस्रभृष्टिः शततेजाव्वायुरसि
तिग्मतेजाद्विषतोव्वधः ॥ २४ ॥ पृथिविदेवयजनि ॥ पृथिविदेव
यजन्योषध्यास्तेमूलम्माहिं ꣳ सिषंव्व्रजङ्गच्छगोष्ठानंव्वर्षतुतेद्यौर्ब्ब
धानदेवसवितः परमस्याम्पृथिव्याꣳ शतेनपाशैर्य्योस्मान्द्वेष्टियं ॥ ५ ॥

ञ्चवयन्द्विष्मस्तमतोमामौक् ॥ २५ ॥ अपाररुम् ॥ अपाररुम्पृ
थिव्यैदेवयजनाद्वध्यासंव्रजङ्गच्छगोष्ठानंवर्षतुतेद्यौर्बधानदेवसवि
तः परमस्याम्पृथिव्याꣳशतेनपाशैर्य्योऽस्मान्द्वेष्टियञ्चवयन्द्विष्म
स्तमतोमामौक् ॥ अररोदिवम्मापप्तोद्रप्सस्तेद्याम्मास्कन्व्रज
ङ्गच्छगोष्ठानंवर्षतुतेद्यौर्बधानदेवसवितः परमस्याम्पृथिव्याꣳशते
नपाशैर्य्योऽस्मान्द्वेष्टियञ्चवयन्द्विष्मस्तमतोमामौक् ॥ २६ ॥
गायत्रेणत्वा ॥ गायत्रेणत्वाच्छन्दसापरिगृह्णामित्रैष्टुभेनत्वाच्छ

न्दसापरिगृह्णामिजागतेनत्वाच्छन्दसापरिगृह्णामि ॥ सुक्ष्माचा
सिशिवाचासिस्योनाचासिसुषदाचास्यूर्जस्वतीचासिपयस्वतीच
॥ २७ ॥ पुराक्रूरस्य । विसृपोविरप्शिन्नुदादायपृथिवीञ्जीवदानुम् ॥
यामैरयँश्चन्द्रमसिस्वधाभिस्तामुधीरासोऽअनुदिश्ययजन्ते ॥ प्रोक्ष
णीरासादयद्विषतोवधोसि ॥ २८ ॥ [५] प्रत्युष्टꣳरक्षः ॥ प्रत्युष्टꣳ
रक्षःप्रत्युष्टाऽअरातयोनिष्टप्तꣳरक्षोनिष्टप्ताऽअरातयः ॥ अनिशि
तोसिसपत्नक्षिद्वाजिनन्त्वावाजेध्यायैसम्मार्ज्मि ॥ प्रत्युष्टꣳरक्षः

प्प्रत्युष्टाऽअरातयोनिष्टप्प्तᳫंरक्षोनिष्टप्प्ताऽअरातयः ॥ अनिशिता
सिसपत्नक्षिद्वाजिनीन्त्वावाजेध्यायैसम्मार्ज्जिम ॥ २९ ॥ अदित्यै
रास्ना । सिविष्ण्णोर्व्वेष्प्योस्यूर्ज्जेत्वादब्धेनत्वाचक्षुषावपश्यामि ॥
अग्नेर्ज्जिह्वासिसुहूर्द्देवेब्भ्योधाम्म्नेधाम्म्नेमेभवयजुषेयजुषे ॥ ३० ॥
सवितुस्त्वा । प्प्रसव ऽ उत्पुनाम्म्यच्छिद्द्रेणपवित्त्रेणसूर्य्यस्यरश्मि
भिः ॥ सवितुर्व्वः प्प्रसव ऽ उत्पुनाम्म्यच्छिद्द्रेणपवित्त्रेणसूर्य्यस्य
२ रश्मिभिः ॥ तेजोसिशुक्क्रमस्यमृतमसिधामनामासिप्प्रियन्देवाना

मनोधृष्टन्देवयजनमसि ॥ ३१ ॥ [३] इति श्रीवाजसनेयसंहितायां
प्रथमोऽध्यायः ॥ १ ॥

अथानुवाकसूत्रम् ॥ कृष्णोसि षडग्नेवाजजित्तिस्रो मयीद
मग्नीषोमयोः पञ्चकावग्नेदब्धायो चतस्रः संवर्चसा पञ्चाग्नये कव्य
वाहनाय षट् सप्तचतुस्त्रिंशत् ॥ हरिः ॐ कृष्णोसि ॥ कृष्णो
स्याखरेष्ठोग्नयेत्वा जुष्टम्प्रोक्षामिवेदिरसिबर्हिषेत्वा जुष्टाम्प्रोक्षामि ॥ ७ ॥
बर्हिरसिस्रुग्भ्यस्त्वा जुष्टम्प्रोक्षाम्यदित्यैव्युन्दनम् ॥ १ ॥ अदित्यै

व्युन्दंनमसिव्विष्ष्णोंस्तुपोंस्यूर्णम्म्रदसन्त्वास्तृणामिस्वासस्थान्दे
वेब्भ्योभुवपतयेस्वाहाभुवनपतयेस्वाहाभूतानाम्पतयेस्वाहा ॥ २ ॥
गन्धर्व्वस्त्वा । विश्श्वावसुःपरिदधातुव्विश्श्वस्यारिष्ट्यैयजमानस्यपरि
धिरस्यग्ग्निरिड ऽ ईडितः ॥ इन्द्रस्यबाहुरसिदक्षिणोव्विश्श्वस्यारि
ष्ट्यैयजमानस्यपरिधिरस्यग्ग्निरिड ऽ ईडितः ॥ मित्राव्वरुणौत्त्वो
त्तरतः परिधत्तान्ध्रुवेणधर्म्मणाव्विश्श्वस्यारिष्ट्यैयजमानस्यपरिधिर
स्यग्ग्निरिडईडितः ॥ ३ ॥ व्वीतिहोत्रन्त्वा । कवेद्युमन्तꣳ समिधीम

हि ॥ अग्नेबृहन्तंमद्ध्वरे ॥ ४॥ सुमिदंसि ॥ सुमिदंसिसूर्य्यंस्त्वापुर
स्तात्पातुकस्याश्चिदभिशंस्त्यै ॥ सवितुर्ब्बाहूस्थऽऊर्णम्म्रदसन्त्वा
स्तृणामिस्वासस्थन्देवेभ्यऽआत्वावसवोरुद्राऽआदित्याः सदन्तु
॥ ५ ॥ घृताच्यसि । जुहूर्नाम्नासेदम्प्प्रियेणधाम्नाप्प्रियꣳसदऽआ
सीदघृताच्यस्युपभृन्नाम्नासेदम्प्प्रियेणधाम्नाप्प्रियꣳसदऽआसीद
घृताच्यसिद्ध्रुवानाम्नासेदम्प्प्रियेणधाम्नाप्प्रियꣳसदऽआसीदप्प्रिये
णधाम्नाप्प्रियꣳसदऽआसीद ॥ ध्रुवाऽअसदन्नृतस्ययोनौताविष्णो ॥ ८ ॥

पाहिपाहियज्ञम्पाहियज्ञपतिंपाहिमांय्यज्ञन्यम् ॥ ६ ॥ [६] अग्ने
व्वाजजित् ॥ अग्नेव्वाजजिद्वाजन्त्वासरिष्यन्तंव्वाजजितꣳसम्मा
र्ज्मि ॥ नमोदेवेभ्यःस्वधापितृभ्यःसुयमेमेभूयास्तमस्कन्नमद्य
॥७॥ अस्कन्नमद्य । देवेभ्यऽआज्यꣳसम्भ्रियासमङ्घ्रिणाविष्णो
मात्वावक्रमिषंव्वसुमतीमग्नेतेच्छायामुपस्थेषंव्विष्णोस्स्थानमसी
तऽइन्द्रोव्वीर्य्यमकृणोदूर्ध्वोऽध्वरऽआस्थात् ॥ ८ ॥ अग्नेवेः ॥ अग्ने
वेर्होत्रंवेर्दूत्यमवतान्त्वान्द्यावापृथिवी ऽ अवत्वन्द्यावापृथिवीस्विष्ट

संहि. कृद्देवेभ्य ऽइन्द्र ऽआज्येनहविषाभूत्स्वाहासञ्ज्योतिषाज्ज्योतिः पू. अ.

॥ ९ । ॥९॥ [३] मयीदम् ॥ मयीदमिन्द्रऽइन्द्रियन्दधात्वस्मान्रायोम ॥ २ ॥
घवानःसचन्ताम् ॥ अस्माकꣳसन्त्वाशिषः सत्यानः सन्त्वाशिष
ऽउपहूतापृथिवीमातोपमाम्पृथिवीमाताह्वयतामग्निराग्नीध्रात्स्वाहा
॥ १० ॥ उपहूतोद्यौः ॥ उपहूतोद्यौष्पितोपमान्द्यौष्पिताह्वयताम
ग्निराग्नीध्रात्स्वाहा ॥ देवस्यत्वासवितुः प्प्रसवेश्विनोर्ब्बाहुभ्याम्पू ॥ ९ ॥
ष्णोहस्ताभ्याम् ॥ प्रतिगृह्णाम्म्यग्नेष्ट्वास्येनप्प्राश्नामि ॥११॥ एत

न्ते । देवसवितर्य्यज्ञम्प्राहुर्बृहस्पतयेब्रह्मणे ॥ तेनयज्ञमवतेनयज्ञ
पतिन्तेनमामव ॥ १२ ॥ मनोजूतिः ॥ मनोजूतिर्जुषतामाज्यस्यबृ
हस्पतिर्य्यज्ञमिमन्तनोत्वरिष्टंयज्ञꣳसमिमन्दधातु ॥ विश्वेदेवा
सऽइहमादयन्तामो३म्प्रतिष्ठ ॥ १३ ॥ एषाते ॥ ऽअग्नेसमित्तयावर्द्ध
स्वचाचप्प्यायस्व ॥ वर्द्धिषीमहिचवयमाचप्प्यासिषीमहि ॥ अग्ने
वाजजिद्वाजन्त्वाससृवाꣳसंवाजजितꣳसम्मार्ज्मि ॥ १४ ॥ [५]
अग्नीषोमयोरुज्जितिम् ॥ अग्नीषोमयोरुज्जितिमनूज्जेषंवाजस्यमा

संहि. प्प्रसवेनप्प्रोहामि ॥ अग्नीषोमौतमपनुदतांय्योस्मान्द्वेष्टियञ्चवयन्द्वि पृ. अ.
॥१०॥ ष्मोव्वाजस्यैनम्प्रसवेनापोहामि ॥ इन्द्राग्न्योरुज्जितिमनूज्जेषंव्वाज ॥ २ ॥
१८ स्यमाप्प्रसवेनप्प्रोहामि ॥ इन्द्राग्नीतमपनुदतांय्योस्मान्द्वेष्टियञ्च
वयन्द्विष्मोव्वाजस्यैनम्प्रसवेनापोहामि ॥१५॥ व्वसुभ्भ्यस्त्वा । रुद्रे
भ्भ्यस्त्वादित्येभ्भ्यस्त्वासञ्जानाथान्द्यावापृथिवीमित्रावरुणौत्त्वाव्वृ
ष्ट्यावताम् ॥ व्व्यन्तुव्वयोक्तꣳरिहाणामरुताम्पृषतीर्ग्गच्छव्वशापृश्नि
र्भूत्त्वादिवङ्गच्छततोनोव्वृष्टिमावह ॥ चक्षुष्पा ऽ अग्नेसिचक्षुर्म्मे ॥१०॥

पाहि ॥१६॥ यम्परिधिम् ॥ यम्परिधिम्पर्य्यधत्थाऽअग्नेदेवपणिभि
र्गुह्यमानः ॥ तन्तऽएतमनुजोषम्भराम्म्येषनेत्त्वदपचेतयाताऽअ
ग्नेःप्प्रियम्पाथोपीतम् ॥ १७ ॥ सꣳस्स्रवभागास्त्थेषाबृहन्तःप्प्रस्त
रेष्ठाःपरिधेयाश्च्चदेवाः ॥ इमांव्वाचमभिव्विश्श्वेगृणन्तऽआसद्यास्म्मि
न्बर्हिषिमादयद्ध्वꣳस्वाहाव्वाट् ॥१८॥ घृताचीस्त्थः ॥ घृताचीस्त्थो
धुर्य्यौपातꣳसुम्म्नेस्त्थःसुम्म्नेमाधत्तम् ॥ यज्ञनमश्च्चतऽउपचयज्ञस्य
शिवेसन्तिष्ठस्वस्विष्टेमेसन्तिष्ठस्व ॥१९॥ [५] अग्नेदब्धायो । शी

॥११॥ तमपाहिमादिद्योः पाहिप्रसित्यैपाहिदुरिष्ट्यैपाहिदुरद्मन्याऽअविष
न्नः पितुङ्कृणुसुषदायोनौस्वाहावाडग्नयेसंवेशपतयेस्वाहासरस्व ॥ २ ॥
त्यैयशोभगिन्यैस्वाहा ॥ २० ॥ वेदोसि ॥ वेदोसियेनत्वन्देववेददेवे
भ्योवेदोभवस्तेनमह्यंवेदोभूयाः ॥ देवागातुविदोगातुंवित्त्वागातु
मित ॥ मनसस्पतऽइमन्देवयज्ञꣳस्वाहावातेधाः ॥ २१ ॥ सम्बर्हिः ॥
सम्बर्हिरङ्क्ताꣳहविषाघृतेनसमादित्यैर्वसुभिःसम्मरुद्भिः ॥ समिन्द्रो
विश्वेभिर्देवेभिरङ्क्तान्दिव्यन्नभोगच्छतुयत्स्वाहा ॥ २२ ॥ कस्त्वा ॥ ॥११॥

कस्त्वाविमुञ्चतिसत्त्वाविमुञ्चतिकस्म्मैत्वाविमुञ्चतितस्म्मैत्वाविमु
ञ्चति ॥ पोषायरक्षसांभागोसि ॥२३॥ [४] संवर्च्चसा ॥ संवर्च्चसा
पयंसासन्तनूभिरगन्महिमनसासꣳशिवेन ॥ त्वष्टासुदत्रोविदधातु
रायोनुमार्ष्टुतन्वोयद्विलिष्टम् ॥ २४ ॥ दिविविष्णुः ॥ दिविविष्णु
र्व्यक्रꣳस्तजागतेनच्छन्दसाततोनिर्भक्तोयोस्मान्द्वेष्टियञ्चवय
न्द्विष्मोन्तरिक्षेविष्णुर्व्यक्रꣳस्तत्रैष्टुभेनच्छन्दसाततोनिर्भ
क्तोयोस्मान्द्वेष्टियञ्चवयन्द्विष्मः पृथिव्यांविष्णुर्व्यक्रꣳस्तगा

संहि. यन्त्रेणच्छन्दसातततोनिर्भ्भक्तोयोस्म्मान्द्द्वेष्टियञ्चव्वयन्द्विष्म्मोस्म्मा पू. अ.
॥१२॥ दन्नादुस्यैप्प्रतिष्ठायाऽअगन्मुस्व्वः सञ्ज्योतिषाभूम ॥ २५ ॥ स्वय ॥ २ ॥
म्भूरसि ॥ स्वयम्भूरसिश्रेष्ठोरश्मिर्व्वच्चोदाऽअसिव्वर्च्चोमेदेहि ॥
सूर्य्यस्यावृतमन्न्वावर्त्ते ॥ २६ ॥ अग्नेगृहपते । सुगृहपतिस्त्वयां
ग्नेहङ्गृहपतिनाभूयासꣳ सुगृहपतिस्त्वम्मयाग्नेगृहपतिनाभूयाः ॥
अस्थूरिणौगार्हपत्त्यानिसन्तुशतꣳ हिमाः सूर्य्यस्यावृतमन्न्वावर्त्ते
॥ २७ ॥ अग्नेव्व्रतपते । व्व्रतमचारिषन्तदशकन्तन्मेराधीदमहंय्यऽए ॥१२॥

वास्म्मुसोस्म्म ॥ २८ ॥ [५] अग्नयेकव्यवाहनायस्वाहासोमाय
पितृमतेस्वाहा ॥ अपहताऽअसुरारक्षाᳬसिवेदिषदः ॥ २९ ॥ येरूपा
णि । प्प्रतिमुञ्चमानाऽअसुराऽसन्तः स्वधयाचरन्ति ॥ परापुरोनिपु
रायेभरन्त्यग्निष्टाँल्लोकात्प्रणुदात्यस्म्मात् ॥ ३० ॥ अत्रपितरः ॥ अ
त्रपितरोमादयध्वंय्यथाभागमावृषायध्वम् ॥ अमीमदन्तपितरोयथा
भागमावृषायिषत ॥ ३१ ॥ नमोवऽपितरोरसायनमोवऽपितरऽशो
षायनमोवऽपितरोजीवायनमोवः पितरः स्वधायैनमोवः पितरोघो

संहि. पू. अ.

३॥१॥ ॥ ३ ॥

रायनमोवः पितरोमन्यवेनमोवःऽपितरः पितरोनमोवोगृहान्नः पित
रोदत्तसतोवः पितरोदेष्मैतद्वः पितरोवासऽआधत्त ॥ ३२ ॥ आधं
त्त । पितरोगर्भङ्कुमारम्पुष्करस्रजम् ॥ यथेहपुरुषोसत् ॥ ३३ ॥
ऊर्ज्जंवहन्तीः ॥ ऊर्ज्जंवहन्तीरमृतङ्घृतम्पयः कीलालम्परिस्रुतम् ॥
स्वधास्थतर्प्पयतमेपितॄन् ॥ ३४ ॥ [६] इति श्रीवाजसनेयसंहि
तायां द्वितीयोऽध्यायः ॥ २ ॥ ॥१३॥

अथानुवाकसूत्रम् । समिधाग्निम् । भूर्भुवःस्वश्चतुष्कावग्निर्ज्यो

तिर्द्वै उपभ्रयन्तः षड्विंशतिर्भूर्भुवः स्वश्चतस्रो गृहामा तिस्रः पघा
सिनः पञ्च पूर्णादर्वि द्वे अक्षन्नमीमदन्तषडेषते सप्त दश त्रिषष्टिः ॥
हरिः ॐ समिधाग्निम् ॥ समिधाग्निन्दुवस्यतघृतैर्बोधयतातिथिम् ॥
आस्मिन्हव्याजुहोतन ॥ १ ॥ सुसमिद्धायशोचिषे । घृतन्तीव्रञ्जु
होतन ॥ अग्नयेजातवेदसे ॥ २ ॥ तन्त्वा ॥ समिद्भिरङ्गिरोघृतेनवर्द्ध
यामसि ॥ बृहच्छोचायविष्ठ्य ॥ ३ ॥ उपत्वा । ग्नेहविष्मतीर्घृता
चीर्यन्तुहर्यत ॥ जुषस्वसमिधोमम ॥४॥ [४] भूर्भुवः ॥ भू

संहि. ब्भूर्भुवृःस्वुर्द्यौरिव भूम्नापृथिवीवंव्वरिम्म्णा ॥ तस्यांस्तेपृथिविदेवयज पू. अ.
॥१४॥ निपृष्ठेग्निमंन्नादमुन्नाद्यायादंधे ॥५॥ आयम्॥ आयङ्गौःपृश्निरक्रमी ॥ ३ ॥
दसंदन्मातरम्पुरः ॥ पितरंञ्चप्प्रयन्त्स्वंः ॥ ६ ॥ अन्तश्चरति ॥ रोचु
नास्यप्प्राणादंपानुती ॥ व्व्यंकख्यन्महिषोदिवम् ॥७॥ त्रिङ्शद्धामं ॥
त्रिङ्शद्धामाव्विरांजतिवाक्पंतुङ्गायंधीयते ॥ प्रतिवस्तोरहुद्युभिः ॥
॥ ८ ॥ [४] अग्निर्ज्ज्योतिः ॥ अग्निर्ज्ज्योतिर्ज्ज्योतिरग्निःस्वाहासू
र्य्योज्ज्योतिर्ज्ज्योतिःसूर्य्यंःस्वाहा ॥ अग्निर्व्वर्चोज्ज्योतिर्व्वर्च्चंःस्वाहासू ॥१४॥

७६

र्य्यो वर्च्चो ज्ज्योतिर्व्वर्च्चः स्वाहा ॥ ज्योतिः सूर्य्यः सूर्य्यो ज्ज्योतिः स्वाहा
॥ ९ ॥ सजूर्द्देवेन । सवित्रासजूरात्र्येन्द्रवत्या ॥ जुषाणोऽअग्निर्व्वेतु
स्वाहा ॥ सजूर्द्देवेनसवित्रासजूरुषसेन्द्रवत्या ॥ जुषाणः सूर्य्यो व्वेतु
स्वाहा ॥१०॥ [२] उपप्रयन्तोऽअद्ध्वरम् ॥ उपप्रयन्तोऽअद्ध्वरम्म
न्त्रं व्वोचेमाग्नये ॥ आरेऽअस्म्मे चशृण्वते ॥११॥ अग्निर्म्मूर्द्धा । दिवः
ककुत्पतिः पृथिव्व्याऽअयम् ॥ अपाᳬरेताᳬसिजिन्न्वति ॥ १२ ॥ उ
भावाम् ॥ उभावामिन्द्राग्नीऽआहुवद्ध्याऽउभाराधसः सहमादयद्ध्यै ॥

संहि. उभादातारा॑विषाᳪ॑ रयीणामुभा वाज॑स्य सातये॑ हुवे वाम् ॥ १३ ॥ अ पू. अ.
॥१५॥ यन्ते॑ ॥ अयन्ते योनि॑र्ऋत्वियो यतो॑ जातो ऽअरोचथाः ॥ तञ्जानन्नग्न ॥ ३ ॥
ऽआरोहाथा॑ नो वर्द्धया रयिम् ॥ १४ ॥ अयमिह । प्प्रथमो धायि धा
तृभिर्होता यजिष्ठो ऽअध्वरेष्वीड्यः ॥ यमप्नवानो भृगवो विरुरुचु
र्वनेषु चित्रं विभ्वं विशेविशे ॥ १५ ॥ अस्य प्रत्नाम् ॥ अस्य प्रत्नाम
नु द्युतᳪ शुक्रन्दुदुह्रे ऽअह्रयः ॥ पयः सहस्रसामृषिम् ॥ १६ ॥ ॥१५॥
तनूपा ऽअग्नेसि तन्वम्मे पाह्यायुर्दा ऽअग्नेस्यायुर्म्मे देहि वर्चोदा ऽअ

ग्नेसिवर्च्चौमेदेहि ॥ अग्ग्नेयन्न्मेतन्न्वाऽऊनन्तन्न्मऽआपृण ॥ १७ ॥
इन्धानास्त्वा । शतꣳहिमाद्युमन्तꣳसमिधीमहि ॥ वयस्वन्तोवय
स्कृतꣳसहस्वन्तꣳसहस्कृतम् ॥ अग्ग्नेसपत्न्नदम्भनमदब्धासोऽअदा
ब्भ्यम् ॥ चित्रावसोस्वस्तितेपारमशीय ॥ १८ ॥ सन्त्वम् ॥ सन्त्वम
ग्ग्नेसूर्य्यस्यवर्च्चसागथाःसमृषीणाꣳस्तुतेन ॥ सम्प्रियेणधाम्न्नास
महमायुषासंवर्च्चसासम्प्रजयासꣳरायस्पोषेणग्ग्मिषीय ॥ १९ ॥ अ
न्धस्त्थ ॥ अन्धस्त्थान्धोवोभक्षीयमहस्त्थमहोवोभक्षीयोर्ज्जस्त्थो

ज्जैंवोभक्षीयरायस्पोषंस्त्थरायस्पोषंवोभक्षीय ॥ २० ॥ रेवतीरम
॥१६॥ द्धम् ॥ रेवतीरमंद्धमस्म्मिन्न्योनावस्म्मिन्न्गोष्ठेस्म्मिँल्लोकेस्म्मिन्न्क्ष ॥ ३ ॥
ये ॥ इहैवस्तमापंगात ॥२१॥ सꣳहितासि । विश्वरूप्यूर्ज्जामाविश
गौपत्त्येन ॥ उपंत्त्वाग्नेदिवेदिवेदोषांवस्तर्द्धियावयम् ॥ नमोभरन्तऽ
एमंसि ॥२२॥ राजंन्तमद्ध्वराणांङ्गोपामृतस्यदीदिविम् ॥ वर्द्धमानꣳ
स्वेदमे ॥ २३ ॥ सनः ॥ सनः पितेवसूनवेग्नेसूपायनोभव ॥ सचं
स्वानꣳस्वस्तये ॥ २४॥ अग्नेत्त्वम् ॥ अग्नेत्त्वन्नोऽअन्तमऽउतत्त्रा ॥१६॥

ताशिवोभंवाव्वरूत्थ्य ÷ ॥ व्वसुरग्ग्निर्व्वसुश्श्रवा ऽ अच्छानक्षिद्युमत्तं

मह्रयिन्दाः ॥ २५ ॥ तन्त्वा ॥ तन्त्वाशोचिष्ठदीदिवःसुम्म्नायनूनं

मीमहेसखिब्भ्यः ॥ सनोबोधिश्श्रुधीहवमुरुष्ष्याणो ऽ अघायत ः सं

मस्म्मात् ॥२६॥ इडऽएहि ॥ इडएह्यदितऽएहिकाम्म्याऽएत ॥ मयिं

वःकामधरणम्भूयात् ॥२७॥ सोमानु स्वरणं । कृणुहिब्ब्रह्मणस्प्पते ॥

कक्षीवन्तंय्यऽऔशिजः ॥२८॥ योरेवान् ॥ योरेवान्योऽअमीवहाव्वसु

वित्पुष्टिवर्द्धनः ॥ सनः ÷ सिषक्तुयस्तुरः ॥ २९ ॥ मानः ÷ ॥ मानःशंसो

ऽअरं॑रुपोधूर्ति॒ः प्प्रण॑ङ्मर्त्य॑स्य ॥ रक्षाणोब्रह्मणस्पते ॥ ३० ॥ महि॒
त्रीणाम् ॥ महि॒त्रीणामवो॑स्तुद्युक्षम्मित्रस्यांऽर्यम्म॒णः ॥ दुराधर्षंव्वरु॒
णस्य ॥ ३१ ॥ नहितेषाम् ॥ नहितेषाममाचुनना॒ध्वंसुवारणेषु ॥ ईशे॑
रिपुरघशंऽसः ॥ ३२ ॥ तेहिपुत्रासो ऽअदि॑तेः प्प्रजीवसेमर्त्याय ॥
ज्योति॒र्य्यच्छुन्त्यज॑स्रम् ॥ ३३ ॥ कुदाचुन ॥ स्त॒रीर॑सिनेन्द्रंसश्च
सिदा॒शुषे॑ ॥ उपोपेन्नुम॑घव॒न्भूय॒ऽइन्नुतेदानंन्दे॒वस्यंपृच्यते ॥ ३४ ॥ त
त्स॑वितुः ॥ तत्स॑वितुर्व्वरे॑ण्यम्भर्गोदे॒वस्यं॑धीमहि ॥ धियोयोनः॑ प्प्रचो

दयांत् ॥ ३५ ॥ शतम् १०० ॥ परितेदूडभ्भोरथोस्म्माँ२अंश्नोतुविश्व
श्वतं÷॥ येनुरक्षसिदाशुषं÷॥ ३६ ॥ [२६] भूर्भुवं÷ ॥ भूर्भुवुस्व÷
सुप्रजाः प्रजाभि÷स्या ॐ सुवीरोवीरैः सुपोषुं पोषैः ॥ नर्य्यप्प्रजा
म्मेपाहिशॐस्यंपशून्मेपाह्यथर्य्यपितुम्मेपाहि ॥३७॥ आगन्म ।
विश्ववेदसमुस्म्मभ्यंवसुवित्तंमम् ॥ अग्नेसम्म्राडभिद्युम्न्नमभिस
हऽआयच्छस्व ॥ ३८ ॥ अयमग्निः ॥ अयमुग्निर्गृहपंतिर्गार्हपत्यं
प्प्रजायांवसुवित्तमः ॥ अग्नेगृहपतेभिद्युम्न्नमभिसह ऽ आयच्छ

संहि. स्व ॥ ३९ ॥ अयमग्निः ॥ अयमग्निःपुरीष्योरयिमान्पुष्टिवर्द्धनः ॥ पू. अ.
॥१८॥ अग्नेपुरीष्याभिद्युम्नमभिसहऽआयच्छस्व ॥ ४० ॥ [४] गृहा ॥ ३ ॥
मा ।बिभीतमावेपद्ध्वमूर्ज्जम्बिभ्रतऽएमसि ॥ ऊर्ज्जम्बिभ्रद्वःसुमनाः
सुमेधागृहानैमिमनसामोदमानः ॥ ४१ ॥ येषामद्ध्येति । प्रवसन्ये
षुसौमनसोबहुः ॥ गृहानुपह्वयामहेतेनोजानन्तुजानतः ॥ ४२ ॥
उपहूताऽइह । गावऽउपहूताऽअजावयः ॥ अथोऽअन्नस्यकीलालऽ
उपहूतोगृहेषुनः ॥ क्षेमायवःशान्त्यैप्रपद्येशिवꣳशग्मꣳशंय्योःशं ॥१८॥

स्योः ॥ ४३ ॥ [३] प्रघासिनोहवामहे । मरुतश्चरिशादसः ॥
करम्भेणसजोषसः ॥ ४४ ॥ यद्ग्रामे ॥ यद्ग्रामेयदरण्येयत्सभायां
यदिन्द्रिये ॥ यदेनश्चकृमावयमिदन्तदवयजामहेस्वाहा ॥ ४५ ॥
मोषूणः ॥ मोषूणऽइन्द्रात्रपृत्सुदेवैरस्तिहिष्मातेशुष्मिन्नवयाः ॥
महश्चिद्यस्यमीढुषोयव्याहविष्मतोमरुतोवन्दतेगीः ॥ ४६ ॥ अ
क्रन्कर्म्मकर्म्मकृतःसहवाचामयोभुवा ॥ देवेभ्यःकर्म्मकृत्वास्त
म्प्रेतसचाभुवः ॥ ४७ ॥ अवभृथनिचुम्पुण । निचेरुरसिनिचुम्पु

णः ॥ अवदेवैर्द्देवकृतमेनोयासिषमवमर्त्यैर्म्मर्त्यकृतम्पुरुराव्णोदेव
रिषस्पाहि ॥ ४८ ॥ [५] पूर्ण्णादर्व्वि ॥ पूर्ण्णादर्व्विपरापतसुपूर्ण्णा
पुनरापत । वस्नेवविक्क्रीणावहाऽइषमूर्ज्जंशतक्क्रतो ॥ ४९ ॥ देहि
मे ॥ देहिमेददामितेनिमेधेहिनितेदधे ॥ निहारञ्चहरासिमेनिहार
न्निहराणितेस्वाहा ॥ ५० ॥ [२] अक्षन्नमीमदन्त ॥ अक्षन्नमी
मदन्तह्यवप्प्रियाऽअधूषत ॥ अस्तोषतस्वभानवोविप्प्रानविष्ठया
मतीयोजान्विन्द्रतेहरी ॥ ५१ ॥ सुसन्दृशन्त्वा ॥ सुसन्दृशन्त्वावय

॥१९॥

म्मघवन्त्वन्दिषीमहि ॥ प्रनूनम्पूर्णबन्धुरस्तुतोयासिवशाँ२ऽअनु
योजान्न्विन्द्रतेहरी ॥ ५२ ॥ मनोनु ॥ मनोन्न्वाह्वामहेनाराशꣳसे
नस्तोमेन ॥ पितॄणाञ्चमन्मभिः ॥ ५३ ॥ आनः ॥ आनऽएतु
मनःपुनः क्रत्वेदक्षायजीवसे ॥ ज्योक्चसूर्य्यन्दृशे ॥ ५४ ॥ पुनर्न्नः
पितरोमनोददातुदैव्योजनः ॥ जीवंव्रातꣳसचेमहि ॥ ५५ ॥ वयꣳ
सोमव्रतेतवमनस्तनूषुबिभ्रतः ॥ प्रजावन्तꣳसचेमहि ॥ ५६ ॥
[६] एषते । रुद्रभागःसहस्वस्राम्बिकयातञ्जुषस्वस्वाहैषतेरुद्र

भागऽआखुस्तेपशुः ॥ ५७ ॥ अवरुद्रम् ॥ अवरुद्रमदीमह्यवदेव
न्त्र्यम्बकम् ॥ यथानोवस्यसस्करद्यथानःश्रेयसस्करद्यथानोव्यव
साययात् ॥ ५८ ॥ भेषजमसि । भेषजङ्गवेश्वायपुरुषायभेषजम् ॥
सुखम्मेषायमेष्यै ॥ ५९ ॥ त्र्यम्बकंयजामहे ॥ सुगन्धिम्पुष्टिव
र्द्धनम् ॥ उर्वारुकमिवबन्धनान्मृत्योर्मुक्षीयमामृतात् ॥ त्र्यम्ब
कंयजामहेसुगन्धिम्पतिवेदनम् ॥ उर्वारुकमिवबन्धनादितोमुक्षी
यमामुतः ॥ ६० ॥ एतत्ते ॥ रुद्रावसन्तेनपरोमूजवतोतीहि ॥ अव

ततधन्वापिनाकावसःकृत्तिवासाऽअहिंहसन्नःशिवोतीहि ॥ ६१ ॥
त्र्यायुषञ्जमदग्नेःकश्यपस्यत्र्यायुषम् ॥ यद्देवेषुत्र्यायुषन्तन्नोऽअ
स्तुत्र्यायुषम् ॥ ६२ ॥ शिवोनामा ॥ शिवोनामासिस्वधितिस्तेपिता
नमस्तेऽअस्तुमामाहिंहसीः ॥ निवर्त्तयाम्म्यायुषेन्नाद्यायप्प्रजननंना
यरायस्पोषायसुप्प्रजास्त्वायसुवीर्य्याय ॥ ६३ ॥ [७] इति श्री
वाजसनेयसंहितायां तृतीयोऽध्यायः ॥ ३ ॥

अथानुवाकसूत्रम् । एदं द्वे महीनाम्पयश्चतस्र आकूत्या

संहि. ऋक्सामयोर्द्विकौ व्रतङ्कृणुत षडेषाते चतस्रो वस्व्यासि तिस्र एषते पू. अ.
॥२१॥ द्वे शुक्रन्त्वा चतस्रोदित्यास्त्वगष्टौ दश सप्तत्रिꣳशत् ॥ हरिः ॐ ॥४॥
एदम् ॥ एदमगन्मदेवयजनम्पृथिव्यायत्रदेवासोऽअजुषन्तविश्वे ॥
ऋक्सामाभ्याꣳसन्तरन्तोयजुर्भीरायस्पोषेणसमिषामदेम ॥ इ
माऽआपꣳशमुमेसन्तुदेवीरोषधेत्रायस्वस्वधितेमैनꣳहिꣳसीः ॥ १ ॥
आपोऽअस्मान् ॥ आपोऽअस्मान्मातरꣳशुन्धयन्तुघृतेनंनोघृत
प्प्वꣳपुनन्तु ॥ विश्वꣳहिरिप्रम्प्रवहन्तिदेवीरुदिदाभ्यꣳशुचिराप ॥२१॥

तऽएमि ॥ दीक्षातपसोस्तनूरसिताँत्वाशिवा ँ शग्ग्माम्परिदधे भद्द्रं

वर्णम्पुष्ष्यंन् ॥ २ ॥ [२] महीनाम्पयः ॥ महीनाम्पयोसिव्व

र्च्चोदाऽअसिव्वर्च्चोमेदेहि ॥ वृत्रस्यासिकनीनकश्चक्षुर्द्दाऽअसिचक्षु

र्म्मेदेहि ॥ ३ ॥ चित्पतिर्म्मा ॥ चित्पतिर्म्मापुनातुव्वाक्पतिर्म्मापुना

तुदेवोमासवितापुनात्त्वच्छिद्द्रेणपवित्त्रेणसूर्य्यस्यरश्मिभिः ॥ तस्य

तेपवित्त्रपतेपवित्त्रपूतस्ययत्क्कामःपुनेतच्छकेयम् ॥ ४ ॥ आवः ॥

आवोदेवासऽईमहेव्वामम्प्प्रयत्यद्ध्वरे ॥ आवोदेवासऽआशिषोयज्ञियां

सोहवामहे ॥ ५ ॥ स्वाहायज्ञम् ॥ स्वाहायज्ञम्मनसः स्वाहोरोर
न्तरिक्षात्स्वाहाद्यावापृथिवीभ्याꣳस्वाहावातादारभेस्वाहा ॥ ६ ॥
[४] आकूत्यै ॥ आकूत्यैप्रयुजेग्नयेस्वाहामेधायैमनसेग्नयेस्वा
हादीक्षायैतपसेग्नयेस्वाहासरस्वत्यैपूष्णेग्नयेस्वाहा ॥ आपोदेवी
बृहतीर्विश्वशम्भुवोद्यावापृथिवीऽउरोऽअन्तरिक्ष ॥ बृहस्पतयेह
विषाविधेमस्वाहा ॥ ७ ॥ विश्वोदेवस्य ॥ विश्वोदेवस्यनेतुर्मर्त्तो ॥२२॥
वुरीतसख्यम् ॥ विश्वोरायऽइषुध्यतिद्युम्नंवृणीतपुष्यसेस्वाहा

॥ ८ ॥ [२] ऋक्क्सामयोऽशिल्पे ॥ ऋक्क्सामयोऽशिल्पे
स्त्थस्तेवामारंभेतेमांपातमास्ययज्ञस्योदृचः ॥ शर्म्मासिशर्म्ममे
यच्छनमस्तेऽअस्तुमामाहिंसीः ॥ ९ ॥ ऊर्ग्गसि ॥ ऊर्ग्गस्याङ्गि
रस्यूर्णम्म्रदाऽऊर्ज्जम्मयिधेहि ॥ सोमस्यनीविरसिविष्णोःशर्म्मा
सिशर्म्मयजमानस्येन्द्रस्ययोनिरसिसुसस्याःकृषीस्कृधि ॥ उच्छ्र
यस्ववनस्पतऽऊर्द्ध्वोमापाह्यंहसऽआस्ययज्ञस्योदृचः ॥ १० ॥
[२] व्रतङ्कृणुत । व्रतङ्कृणुताग्निर्ब्रह्माग्निर्यज्ञोवनस्पतिर्यज्ञि

संहि. यं ॥ दैवीन्धियम्मनामहेसुमृडीकामभिष्टयेवर्च्चोधांय्यज्ञवाहसं पृ. अ.
॥२३॥ सुतीर्त्थानोऽअसद्वशे ॥ येदेवामनोजातामनोयुजोदक्षक्क्रतवस्तेनो ॥ ४ ॥
ऽवन्तुतेनःपान्तुतेभ्यःस्वाहा ॥ ११ ॥ श्वात्त्राःपीताः ॥ श्वात्त्राः
पीताभवतयूयमापोऽअस्माकमन्तरुदरेसुशेवाः ॥ ताऽअस्मभ्य
मयक्ष्माऽअनमीवाऽअनागसःस्वदन्तुदेवीरमृताऽऋतावृधः ॥ १२ ॥
इयन्ते । यज्ञियातनूरपोमुञ्चामिनप्प्रजाम् ॥ अंहोमुचःस्वाहा
कृताःपृथिवीमाविशतपृथिव्यासम्भव ॥ १३ ॥ अग्नेत्वम् ॥ अ ॥२३॥

ग्नेत्त्वꣳसुजागृहिव्वयꣳसुमन्न्दिषीमहि ॥ रक्षाणोऽअप्प्रयुच्छन्नप्प्रबु
धेनꣳपुनस्कृधि ॥ १४ ॥ पुनर्म्मनः ॥ पुनर्म्मनꣳपुनरायुर्म्मऽआ
गन्पुनः प्प्राणः पुनरात्त्मामऽआगन्पुनश्चक्षुः पुनः श्रोत्रम्मऽआ
गन् ॥ व्वैश्वानरोऽअदब्धस्तनूपाऽअग्निर्न्नः पातुदुरितादवद्यात्
॥ १५ ॥ त्वमग्ने । व्व्रतपाऽअसिदेवऽआमर्त्येष्वा ॥ त्वंय्यज्ञे
ष्वीड्यः ॥ रास्वेयत्सोमाभूयोभरदेवोनः सवितावसोर्द्दातावस्वदात्
॥ १६ ॥ [६] एषातेशुक्रतनूरेतद्वर्च्चस्तयासम्भवभ्राजङ्गच्छ ॥

संहि. जूरंसिधृतामनंसाजुष्टाविष्णवे ॥ १७ ॥ तस्यांस्ते । सत्त्यसंवसः प्र. अ.
॥२४॥ प्प्रसवेतन्न्वोयुन्त्रमंशीयस्वाहा ॥ शुक्रमंसिचन्द्रमंस्यमृतमसिव्वैश्श्व ॥ ४ ॥
देवमंसि ॥ १८ ॥ चिदंसि । मनासिधीरंसिदक्षिणासिक्षत्रियांसि
यज्ञियास्यदितिरस्युभयतःशीर्ष्णी ॥ सानःसुप्प्राचीसुप्प्रतीच्च्येधि
मित्रस्त्वांपदिबंध्नीतांपूषाध्ध्वनस्प्पात्त्विन्द्रायाध्ध्यंक्षाय ॥ १९ ॥
अनुत्त्वामातामंन्न्यतामनुपितानुभ्भ्रातासगर्ब्भ्योनुसखासयूंत्थ्यः ॥
सादेविदेवमच्छेहीन्द्रांयसोमं ६ रुद्रस्त्वावर्त्तयतुस्वस्तिसोमंसखापु ॥२४॥

नुरेहि ॥ २० ॥ [४] व्वस्व्यसि ॥ व्वस्व्यस्यदितिरस्यादित्त्या
सिरुद्रासिचन्द्रासि ॥ बृहस्पतिष्ट्वासुम्म्नेरम्म्णातुरुद्रोव्वसुभिराचके
॥ २१ ॥ अदित्त्यास्त्वा । मूर्द्धन्नाजिघर्म्मिदेवयजनेपृथिव्व्याऽइडा
यास्पदमसिघृतवत्स्वाहा ॥ अस्म्मेरमस्वास्म्मेतेबन्धुस्त्वेरायोमे
रायोमाव्वयꣳरायस्पोषेणव्वियौष्म्मतोतोरायः ॥ २२ ॥ समक्ख्ये ।
देव्व्याधियासन्दक्षिणयोरुचक्षसा ॥ मामऽआयुःप्प्रमोषीम्मोऽअह
न्तवव्वीरंव्विदेयतवदेविसन्दृशि ॥ २३ ॥ [३] एषते । गायत्त्रोभागऽ

संहि. इतिमेसोमायब्रूतादेषतेत्रैष्टुंभोभाग ऽ इतिमेसोमायब्रूतादेषतेजाग पू. अ.
॥२५॥ तोभाग ऽ इतिमेसोमायब्रूताच्छन्दोनामानाꣳ साम्म्राज्ज्यङ्गच्छेति ॥ ४ ॥
25 मेसोमायब्रूतादास्म्माकोसिशुक्रस्तेग्ग्रह्योविचितस्त्वाविचिन्वन्तु
॥ २४ ॥ अभित्त्यम् ॥ अभित्त्यन्देवꣳसवितारमोण्योः कविक्क्रतुम
र्च्चामिसत्त्यसवꣳरत्नधामभिप्प्रियम्मतिङ्कविम् ॥ ऊर्द्ध्वायस्यामति
र्भाऽअदिद्युतत्त्सवीमनिहिरण्ण्यपाणिरमिमीतसुक्क्रतुः कृपास्वः ॥
प्रजाब्भ्यस्त्वाप्प्रजास्त्वानुप्प्राणन्तुप्प्रजास्त्वमनुप्प्राणिहि ॥ २५ ॥ ॥२५॥

[२] शुक्रन्त्वा । शुक्रेणं क्रीणामि चन्द्रश्चन्द्रेणामृतममृतेन ॥
सग्मे ते गोस्मे ते चन्द्राणि तपसस्तनूरसि प्रजापतेर्वर्ण्णः परमेणं प
शुना क्रीयसे सहस्रपोषम्पुषेयम् ॥ २६ ॥ मित्रोनः ॥ मित्रोन ऽ
एहि सुमित्रधऽ इन्द्रस्योरुमाविश दक्षिणमुशन्नुशन्तं स्योनः स्यो
नम् ॥ स्वान भ्राजाङ्घारे बम्भारे हस्त सुहस्त कृशानवेते वःसोमक्रय
णास्तान्रक्षध्वम्मा वो दभन् ॥ २७ ॥ परिमा । ग्ने दुश्चरिताद्बाधस्वामा
सुचरिते भज ॥ उदायुषा स्वायुषोदस्थाममृताँ ऽ अनु ॥ २८ ॥ प्रति

सं॰हि. ॥२६॥ पन्थाम् ॥ प्रतिपन्थामपद्महिस्वस्तिगामनेहसम् ॥ येनविश्वाःप पू. अ.
रिद्विषोवृणक्तिविन्दतेवसु ॥ २९ ॥ [४] अदित्यास्त्वक् ॥ अ ॥४॥
दित्यास्त्वगस्यदित्यैसदऽआसीद ॥ अस्तभ्नाद्द्यांवृषभोऽअन्तरि
क्षममिमीतवरिमाणम्पृथिव्याः ॥ आसीदद्विश्वाभुवनानिसम्राड्वि
श्वेत्तानिवरुणस्यव्रतानि ॥ ३० ॥ वनेषुवि ॥ वनेषुव्यन्तरिक्षन्तता
नवाजमर्वत्सुपयऽउस्रियासु ॥ हृत्सुक्रतुंवरुणोविक्ष्वग्निन्दिवि
सूर्यमदधात्सोममद्रौ ॥ ३१ ॥ सूर्यस्यचक्षुः ॥ सूर्यस्यचक्षु ॥२६॥

रारोहाग्नेरुक्ष्णःकुलीनंकम् ॥ यत्रैतंशोभिरीयसेभ्राजमानोविप
श्चिता ॥ ३२ ॥ उस्रावेतम् ॥ उस्रावेतन्धूर्षाहौयुज्येथामनश्रूऽअ
वीरहणौब्रह्मचोदनौ ॥ स्वस्तियजमानस्यगृहान्गच्छतम् ॥ ३३ ॥
भद्रोमे ॥ सिष्मक्ष्यवस्वभुवस्पतेविश्वान्यभिधामानि ॥ मात्त्वां
परिपरिणोविदन्मात्त्वांपरिपन्थिनोविदन्मात्त्वावृकाऽअघायवोवि
दन् ॥ श्येनोभूत्वापरापतयजमानस्यगृहान्गच्छतन्नौसँस्कृतम्
॥ ३४ ॥ नमोमित्रस्य ॥ नमोमित्रस्यवरुणस्यचक्षसेमहोदेवायत

दृतꣳसंपर्य्यत ॥ दूरेदृशेंदेवजांतायकेतवेंदिवस्पुत्रायसूर्य्यांयशꣳसत
॥ ३५ ॥ वरुणस्योत्तम्भंनम् ॥ वरुणस्योत्तम्भंनमसिवरुंणस्य
स्कम्भसर्ज्जनीस्त्थोवरुंणस्य ऽ ऋतसदंन्यसिवरुंणस्य ऽ ऋतसदंनम
सिवरुंणस्य ऽऋतसदंनमासींद ॥ ३६ ॥ याते ॥ यातेधामांनिहविषायजन्तितातेविश्वांपरिभूरंस्तुयज्ञम् ॥ गयस्फानंः प्रतरंणꣳसुवीरोवीरहाप्रचंरासोमदुर्य्यांन् ॥ ३७ ॥ [८] इति श्रीवाजसनेयसंहितायां चतुर्थोऽध्यायः ॥ ४ ॥

अथानुवाकसूत्रम् । अग्नेस्तनूरापतये चतुष्कौ तप्तायनी द्वे इन्द्र घोषस्तिस्त्रो युञ्जतेष्टौ देवस्यत्त्वा चतस्त्रो देवस्यत्त्वा पञ्च विभूरसि चतस्त्रो ज्योतिरसि षडुरुविष्णो तिस्त्रो दश त्रिचत्वारिꣳशत ॥ हरिः ॐ अग्नेस्तनूः ॥ अग्नेस्तनूरसिविष्णवेत्त्वा सोमस्यतनूरसिविष्णवेत्त्वातिथे रातिथ्यमसिविष्णवेत्त्वाश्येनायत्त्वासोमभृतेविष्णवेत्त्वाग्नयेत्त्वारायस्पोषदेविष्णवेत्त्वा ॥ १ ॥ अग्नेर्ज्जनित्रम् ॥ अग्नेर्ज्जनित्रमसिवृषणौस्त्थऽउर्वश्यस्यायुरसिपु

हूरवाऽअसि ॥ गायत्रेणंत्त्वाच्छन्दंसामन्थामित्रैष्टुंभेनंत्त्वाच्छन्दं
सामन्थामिजागंतेनत्त्वाच्छन्दंसामन्थामि ॥ २ ॥ भवंतन्नऽ ॥
भवंतन्नऽसमंनसौसचेंतसावरेपसौं ॥ मायज्ञꣳहिंꣳसिष्टम्मायज्ञपंति
ञ्जातवेदसौशिवौभंवतमद्यनं÷ ॥ ३ ॥ अग्नावग्निश्च ॥ अग्नाव
ग्निश्चंरतिप्रविंष्टऽऋषीणाम्पुत्रोऽअंभिशस्तिपावां ॥ सनं÷स्यो
नꣳसुयजांयजेहदेवेभ्योंहव्यꣳसदमप्रंयुच्छन्त्स्वाहा ॥ ४ ॥
[४] आपंतयेत्त्वा ॥ आपंतयेत्त्वापरिंपतयेगृह्णामितनूनप्त्रेशा

क्वक्रायशक्क्वंनुऽओजिंष्ठाय ॥ अनाधृष्टमस्यनाधृष्ष्यन्देवानामो
जोनंभिशस्त्याभिशास्तिपाऽअंनाभिशस्तेन्न्यमञ्ज्सासुत्त्यमुपंगेष ॐ
स्विंतेमांधाऽः ॥ ५ ॥ अग्नेंव्व्रतपाऽः ॥ अग्नेंव्व्रतपास्त्वेव्व्रंतपायात
वंतनूरियᳪसामायियोममंतनूरेषासात्त्वयिं ॥ सहनौंव्व्रतपतेव्व्रता
न्न्यनुंमेदीक्षान्दीक्षापंतिर्म्मन्न्यंतामनुतपस्तपंस्पतिः ॥ ६ ॥ अᳪ
शुरᳪशुष्टे । देवसोमाप्प्यांयतामिन्द्रांयैकधनविदें ॥ आतुब्भ्यमि
न्द्रःप्प्यायंतामात्त्वामिन्द्रांयप्प्यायस्व ॥ आप्प्यांययास्म्मान्त्सखीं

संहि. न्त्सुम्न्यामेधयांस्वस्तितेदेवसोमसुत्त्यामंशीय ॥ एष्टारायःप्प्रेषेभ पू. अ.
॥२९॥ गायऽऋतमृतवादिब्भ्योनमोद्यावापृथिवीब्भ्याम् ॥ ७ ॥ याते ॥ ॥५॥
29 यातेऽअग्नेयःशयातनूर्वर्षिष्ठागह्वरेष्ठा ॥ उग्ग्रंव्वचोऽअपावधीत्त्वे
षंव्वचोऽअपावधीत्स्वाहा ॥ यातेऽअग्नेरजःशयातनूर्वर्षिष्ठागह्वरे
ष्ठा ॥ उग्ग्रंव्वचोऽअपावधीत्त्वेषंव्वचोऽअपावधीत्स्वाहा ॥ यातेऽअ
ग्नेहरिशयातनूर्वर्षिष्ठागह्वरेष्ठा ॥ उग्ग्रंव्वचोऽअपावधीत्त्वेषंव्वचोऽअ
पावधीत्स्वाहा ॥ ८ ॥ [४] तप्तायनीमे ॥ तप्तायनीमेऽसिवि ॥२९॥

त्तायनीमिस्यवंतान्मानाथितादवंतान्माव्याथितात् ॥ विदेदग्नि
र्न्नभोनामाग्नें ऽ अङ्गिर ऽ आयुंनानाम्नोहि योस्याम्पृंथिव्यामासियत्ते
नांधृष्टन्नामंयज्ञियन्तेनत्वादंधेविदेदग्निर्न्नभोनामाग्नें ऽ अङ्गिर ऽ
आयुंनानाम्नोहि योद्वितीयस्याम्पृथिव्यामासियत्तेनांधृष्टन्नामंयज्ञिय
न्तेनत्वादंधेविदेदग्निर्न्नभोनामाग्नें ऽ अङ्गिर ऽ आयुंनानाम्नोहि यस्तृ
तीयस्याम्पृथिव्यामासियत्तेनांधृष्टन्नामंयज्ञियन्तेनत्वादंधे ॥ अनु
त्वादेववीतये ॥ ९ ॥ सिंहस्यासि ॥ सपत्नसाहीदेवेभ्यंःकल्प

संहि. स्वसिꣳह्यसिसपत्नसाहीदेवेभ्यः शुन्धस्वासिꣳह्यसिसपत्नसा पू. अ.
॥३०॥ हीदेवेभ्यः शुम्भस्व ॥ १० ॥ [२] इन्द्रघोषस्त्वा ॥ इन्द्रघोषस्त्वा ॥५॥
वसुभिः पुरस्तांत्पातुप्रचेतास्त्वारुद्रैः पश्चात्पातुमनोजवास्त्वापितृ
भिर्दक्षिणतः पातुविश्वकर्म्मात्वादित्यैरुत्तरतः पात्विदमहन्तप्तं
वार्बहिर्द्धायज्ञान्निःसृजामि ॥ ११ ॥ सिꣳह्यसि ॥ सिꣳह्यसि
स्वाहासिꣳह्यस्यादित्यवनिः स्वाहासिꣳह्यसिब्रह्मवनिः क्षत्रव ॥३०॥
निः स्वाहासिꣳह्यसिसुप्रजावनीरायस्पोषवनिः स्वाहासिꣳह्य

स्यावहदेवान्यजमानायस्वाहाभूतेभ्यस्त्वा ॥ १२ ॥ ध्रुवोसि । पृथि
वीन्दृꣳहध्रुवक्षिदस्यन्तरिक्षन्दृꣳहाच्युतक्षिदसिदिवन्दृꣳहाग्नेः पुरी
षमसि ॥ १३ ॥ [३] युञ्जतेमनः ॥ युञ्जतेमनऽउतयुञ्जतेधियोवि
प्राविप्रस्यबृहतोविपश्चितः ॥ विहोत्रादधेवयुनाविदेकऽइन्महीदे
वस्यसवितुःपरिष्टुतिःस्वाहा ॥ १४ ॥ इदंविष्णुः ॥ इदंविष्णुर्वि
चक्रमेत्रेधानिदधेपदम् ॥ समूढमस्यपाꣳसुरेस्वाहा ॥ १५ ॥ इराव
तीधेनुमती ॥ इरावतीधेनुमतीहिभूतꣳसूयवसिनीमनवेदशस्या ॥

संहि. व्यस्कभ्नारोदसीव्विष्णवेतेदाधर्त्थपृथिवीमभितोमयूखै ꣳ स्वाहा पू. अ.
॥३१॥ ॥ १६ ॥ देवश्रुतौदेवेषु ॥ देवश्रुतौदेवेष्वाघोषतम्प्राचीप्प्रेतमद्ध्वर ॥५॥
ङ्कल्पयन्तीऽऊर्द्ध्वँय्यज्ञन्नयतम्माजिह्वरतम् ॥ स्वङ्गोष्ठमावदतन्दे
वीदुर्य्येऽआयुर्म्मानिर्व्वादिष्टम्प्रजाम्मानिर्व्वादिष्टमत्ररमेथांव्वर्ष्म्मन्पृ
थिव्याः ॥ १७ ॥ व्विष्णोर्न्नु । कंव्वीर्य्याणिप्प्रवोचंय्यः पार्थिवानि
व्विममेरजाꣳसि ॥ योऽअस्कभायदुत्तरꣳसधस्त्थंव्विचक्रमाणस्त्रे
धोरुगायोव्विष्णवेत्त्वा ॥ १८ ॥ दिवोवा । व्विष्णऽउतवापृथिव्या ॥३१॥

मुहोवाव्विष्णऽउरोरन्तरिक्षात् ॥ उभाहिहस्ताव्वसुनापृणस्वाप्प्रयं
च्छदक्षिणादोतसव्याद्विष्णवेत्त्वा ॥ १९ ॥ प्रतत् ॥ प्रतद्विष्णुस्त
वतेव्वीर्य्येणमृगोनभीमःकुचरोगिरिष्ठाः ॥ यस्योरुषुत्रिषुव्विक्क्रमणे
ष्वधिक्षियन्तिभुवनानिव्विश्वा ॥ २० ॥ व्विष्णोरराटम् ॥ व्विष्णो
रराटमसिव्विष्णोःश्नप्त्रेस्त्थोव्विष्णोःस्यूरसिव्विष्णोर्द्ध्रुवोसि ॥ व्वै
ष्णवमसिव्विष्णवेत्त्वा ॥ २१ ॥ [८] देवस्यत्त्वा । सवितुःप्प्रस
वेश्विनोर्ब्बाहुब्भ्याम्पूष्णोहस्ताब्भ्याम् ॥ आददेनार्य्यसीदमहꣳरक्ष

साङ्ग्रीवाऽअपिकृन्तामि ॥ बृहन्नसिबृहद्द्रवाबृहतीमिन्द्रायव्वाचंव्वद
॥ २२ ॥ रक्षोहणंव्वलगहनम् ॥ रक्षोहणंव्वलगहनंव्वैष्णवीमिद
महन्तंव्वलगमुत्किरामियम्मेनिष्ट्योयममात्योंनिचखानेदमहन्तं
व्वलगमुत्किरामियम्मेसमानोयमसंमानोनिचखानेदमहन्तंव्वलगमु
त्किरामियम्मेसबन्धुर्य्यमसंबन्धुर्न्निचखानेदमहन्तंव्वलगमुत्किरा
मियम्मेसजातोयमसंजातोनिचखानोत्कृत्याङ्किरामि ॥ २३ ॥ स्व
राडंसि । सपत्नहासंत्त्रराडंस्यभिमातिहाजंनराडंसिरक्षोहासंर्व्वराडं

स्यमित्रहा ॥ २४ ॥ रक्षोहणौवं ॥ रक्षोहणोवोबलगहनङ्प्प्रोक्षा
मिवैष्णवान्रक्षोहणोवोबलगहनोवंनयामिवैष्णवान्रक्षोहणोवोबल
गहनोवंस्तृणामिवैष्णवान्रक्षोहणौवांबलगहनाऽउपदधामिवैष्णु
वीरक्षोहणौवांबलगहनौपर्य्यूहामिवैष्णवीवैष्णवमसिवैष्णवा
स्स्थ ॥ २५ ॥ [४] देवस्यत्त्वा । सवितुःप्प्रसवेश्विनोर्बाहुभ्या
म्पूष्णोहस्ताभ्याम् ॥ आददेनार्य्यसीदमहꣳरक्षसाङ्ग्रीवाऽअपिकृ
न्तामि ॥ यवोसियवयास्म्मद्द्वेषोयवयारातीर्दिवेत्त्वान्तरिक्षायत्त्वा

संहि. पृथिव्यैत्त्वाशुन्धन्ताँल्लोकाऽपितृषदनाःपितृषदनमसि ॥ २६ ॥ उ पू. अ.
॥२३॥ द्दिवम् ॥ उद्दिवꣳस्तभानान्तरिक्षम्पृणदृꣳहस्वपृथिव्यान्द्युतानस्त्वा ॥ ५ ॥
मारुतोमिनोतुमित्रावरुणौध्रुवेणधर्म्मणा ॥ ब्रह्मवनिंत्वाक्षत्रवनिं
रायस्पोषवनिपर्य्यूहामि ॥ ब्रह्मदृꣳहक्षत्रन्दृꣳहायुर्दृꣳहप्रजान्दृꣳ
ह ॥ २७ ॥ ध्रुवासि ॥ ध्रुवोयंयजमानोस्मिन्नायतनेप्रजयापशु
भिर्भूयात् ॥ घृतेनद्यावापृथिवीपूर्य्येथामिन्द्रस्यच्छदिरसिविश्व ॥२३॥
जनस्यच्छाया ॥ २८ ॥ परित्वा । गिर्व्वणोगिरइमाभवन्तुविश्व

ते॑ ॥ वृ॒द्धायु॒मनु॑वृद्धं॒योजु॒ष्टोभ॑वन्तु॒जुष्ट॑य॑ः ॥ २९ ॥ इन्द्र॑स्य॒स्यूर॒सी
न्द्र॑स्य॒ध्रु॒वोसि ॥ ऐ॒न्द्रम॑सि॒वै॒श्व॒दे॒वम॑सि ॥ ३० ॥ [५] वि॒भूर॑सि ।
प्र॒वाह॑णो॒वह्नि॑रसिहव्य॒वाह॑नः ॥ श्वा॒त्रो॒सि॒प्रचे॑तास्तु॒थो॒सि॒वि॒श्ववे॑
दाऽउ॒शिग॑सि ॥ ३१ ॥ उ॒शिग॑सि । क॒विरङ्घा॑रिरसि॒बम्भा॑रिरव॒स्यूर॑
सि॒दुव॑स्वा॒ञ्छु॒न्ध्यूर॑सिमार्जा॒लीय॑ः सुम्रा॒डसि॑कृ॒शानु॑ः परि॒षद्यो॑सि॒
पव॑मानो॒नभो॑सि॒प्रत॑का॒मृ॒ष्टो॒सि॒ह॒व्य॒सूद॑नऽऋ॒तधा॑मासि॒स्व॒र्ज्यो॑तिः
स॒मु॒द्रो॒सि ॥ ३२ ॥ स॒मु॒द्रो॒सि । वि॒श्वव्य॑चाऽअ॒जो॒स्येक॑पा॒दहि॑र

सिबुध्न्योवागंस्यैन्द्रमंसिसदोस्यृतस्यद्वारौमामासन्ताप्तमध्वंनाम
ध्वपतेप्रमातिरस्वस्तिमेस्मिन्पथिदेवयानेभूयान्मित्रस्यमा ॥३३॥
मित्रस्यमा । चक्षुषेक्षध्वमग्नयःसगराःसगरास्थसगरेणनाम्नारौ
द्रेणानीकेनपातमाग्नयःपिपृतमाग्नयोगोपायतंमानमोवोस्तुमामा
हिꣳसिष्ट ॥ ३४ ॥ [४] ज्योतिरसि ॥ विश्वरूपंविश्वेषान्देवानांꣳ
समित् ॥ त्वꣳसोमतनूकृद्भ्योद्वेषोभ्योन्यकृतेभ्यऽउरुयन्तासिवरू
थꣳस्वाहाजुषाणोऽअप्तुराज्यस्यवेतुस्वाहा ॥ ३५ ॥ शतम् २०० ॥ ॥३४॥

अग्ग्नेनय।सुपथाराये ऽअस्म्मान्विश्वानिदेवव्वयुनानिव्विद्वान् ॥ युयो
द्ध्यस्म्मज्जुहुराणमेनोभूयिष्ठान्तेनम ऽउक्तिंव्विधेम ॥ ३६ ॥ अय
न्नः ॥ अयन्नो ऽअग्ग्निर्व्वरिवस्कृणोत्त्वयम्मृधः पुर ऽएतुप्प्रभिन्दन् ॥
अयंव्वाजाञ्जयतुव्वाजसातावयꣳशत्रूञ्जयतुजर्हृषाणः स्वाहा ॥३७॥
उरुव्विष्णोविक्क्रमस्वोरुक्षयायनस्कृधि ॥ घृतङ्घृतयोनेपिबप्प्रप्प्रय
ज्ञपतिन्तिरस्वाहा ॥ ३८ ॥ देवसवितः ॥ देवसवितरेषतेसोमस्तꣳ
रक्षस्वमात्त्वादभन् ॥ एतत्त्वन्देवसोमदेवोदेवाँ२ ऽउपागा ऽइदमह

संहि. म्मन्नुष्ष्यान्त्सहरायस्पोषेणस्वाहानिर्व्वरुणस्यपाशान्मुच्चये ॥ ३९ ॥ पू. अ.
॥३५॥ अग्ने॒व्रतपाः ॥ अग्ने॒व्रतपास्त्वेव्व्रतपायातवन्तनूर्म्मय्यभूदेषासात्त्वयि ॥५॥
योममन्तनूस्त्वय्यभूदियꣳसामयि ॥ यथायथन्नौव्व्रतपतेव्व्रतान्यनुमे
दीक्षान्दीक्षापतिरमꣳस्तानुतपस्तपस्पतिः ॥ ४० ॥ [६] उरुव्वि
ष्ष्णो ॥ उरुव्विष्ष्णोव्विक्क्रमस्वोरुक्षयायनस्कृधि ॥ घृतङ्घृतयोनेपि
बप्प्रप्प्रयज्ञपतिन्तिरस्वाहा ॥ ४१ ॥ अत्त्यन्यान् ॥ अत्त्यन्याँ२ऽ
अगान्नान्याँ२ऽउपागामर्व्वाक्त्वापरेब्भ्योविदम्परोवरेब्भ्यः ॥ तन्त्वा ॥३५॥

जुषामहे देवव्वनस्प्पते देवयुज्ज्यायै देवास्त्वा देवयुज्ज्यायै जुषन्ताँव्वि
ष्णवे त्त्वा ॥ ओषधे त्त्रायस्स्व स्वधिते मैनꣳहिꣳसीः ॥ ४२ ॥ द्याम्मा ॥
द्याम्मा लेखीरन्तरिक्षम्मा हिꣳसीः पृथिव्व्या सम्भव ॥ अयꣳहि त्त्वा स्व
धितिस्तेतिजानः प्प्रणिनाय महते सौभगाय ॥ अतस्त्वन्देव व्वनस्प्प
ते शतवल्शो व्विरोह सहस्स्रवल्शा व्वि वयꣳरुहेम ॥ ४३ ॥ [३] इति
श्रीवाजसनेयसंहितायां पञ्चमोऽध्यायः ॥ ५ ॥

अथानुवाकसूत्रम् । देवस्य त्त्वा षडुपावीरसि पञ्च माहिः षट्

संहि. सन्ते तिस्रः समुद्रङ्गच्छ हविष्मतीर्द्विकौ हृदेत्वा पञ्च देवस्यत्त्वाष्टा पू. अ.

॥३६॥ वष्टौ सप्तत्रिꣳशत् ॥ हरिः ॐ देवस्यत्त्वा । सवितुःप्रसवेश्विनोर्बा ॥ ६ ॥

हुभ्याम्पूष्णोहस्ताभ्याम् ॥ आददेनार्य्यसीदमहꣳरक्षसाङ्ग्रीवाऽ

अपिकृन्तामि ॥ यवोसियवयास्म्मद्द्वेषोयवयारातीर्द्दिवेत्त्वान्तरिक्षा

यत्त्वापृथिव्यैत्त्वाशुन्धन्ताँल्लोकाःपितृषदनाःपितृषदनमसि ॥ १ ॥

अग्ग्रेणीरसि । स्वावेशऽउन्नेतॄणामेतस्यवित्तादधित्त्वास्थास्यतिदे

वस्त्वासवितामद्ध्वानक्तुसुपिप्पलाभ्यस्त्वौषधीभ्यः ॥ द्यामग्ग्रेणा ॥३६॥

स्पृक्षऽआन्तरिक्षम्मद्ध्यैनाप्प्राः पृथिवीमुपरेणाद्दृꣳहीः ॥ २ ॥ याते ॥
यातेधामान्न्युश्मसिगमद्ध्यैयत्रगावोभूरिशृङ्गाऽअयासः ॥ अत्रा
हतदुरुगायस्यव्विष्ष्णोः परमम्पदमवभारिभूरि ॥ ब्रह्मवनिंत्त्वाक्ष
त्रवनिरायस्पोषवनिपर्य्यूहामि ॥ ब्रह्मदृꣳहक्षत्रन्दृꣳहायुर्दृꣳहप्र
जान्दृꣳह ॥ ३ ॥ व्विष्ष्णोः कर्म्माणि । पश्श्यतयतोव्व्रतानिपस्पशे ॥
इन्द्रस्ययुज्ज्यः सखा ॥ ४ ॥ तद्विष्ष्णोः । परमम्पदꣳसदापश्श्यन्ति
सूरयः ॥ दिवीवचक्षुराततम् ॥ ५ ॥ परिवीरसि ॥ परिवीरसिपरित्त्वा

संहि. दैवीर्व्विशोव्व्ययन्ताम्परीमंय्यजमानꣳरायोमनुष्ष्याणाम् ॥ दिवःसू १. अ.
॥३७॥ नुरस्येषतेपृथिव्व्याँल्लोकऽआरण्यस्तेपशुः ॥ ६ ॥ [६] उपावीरंसि ॥ ॥ ६ ॥
उपावीरस्युपदेवान्दैवीर्व्विशꣳप्प्रागुरुशिजोव्वह्निंतमान् ॥ देवंत्त्वष्ट
र्व्वसुरमहव्व्यातेस्वदन्ताम् ॥ ७ ॥ रेवतीरमंद्ध्वम् ॥ रेवतीरमंद्ध्वम्बृह
स्प्पतेधारयावसूंनि ॥ ऋतस्यत्त्वादेवहविꣳपाशेनप्प्रतिमुञ्चामिधर्षा
मानुंषꣳ ॥ ८ ॥ देवस्यत्त्वा । सवितुःप्प्रसवेश्विनोर्ब्बाहुब्भ्याम्पूष्णो
हस्ताब्भ्याम् ॥ अग्नीषोमाब्भ्याञ्जुष्टन्नियुनज्मि ॥ अद्भ्यस्त्वौ ॥३७॥

षधीब्भ्योनुत्त्वामातामन्न्यतामनुपितानुब्भ्रातासगर्ब्भ्योनुसखासयू
त्थ्यः ॥ अग्नीषोमाब्भ्यान्त्वाजुष्टम्प्प्रोक्षामि ॥ ९ ॥ अपाम्पेरुः ॥
अपाम्पेरुरस्यापोदेवीःस्वदन्तुस्वात्तञ्चित्सद्देवहविः ॥ सन्तेप्प्राणो
व्वातेनगच्छताꣳसमङ्गानियजत्रैःसंय्यज्ञपतिराशिषा ॥१०॥ घृतेना
क्तौ। पशूँस्त्रायेथाꣳरेवतियजमानेप्प्रियन्धाऽआविश ॥ उरोरन्तरि
क्षात्सजूर्द्देवेनव्वातेनास्यहविषस्त्मनायजसमस्यतन्न्वाभव ॥ व्वर्षो
व्वर्षीयसियज्ञेयज्ञपतिन्धाःस्वाहादेवेब्भ्योदेवेब्भ्यःस्वाहा ॥ ११ ॥

[५] माहिं÷ ॥ माहिर्भूर्म्मा पृदाकुर्न्नमंस्तऽआतानानुर्व्वा प्प्रेहि ॥
घृतस्यंकुल्याऽउपंऽऋतस्युपत्थ्याुऽअनुं ॥ १२ ॥ देवीरापंः ॥ शुद्धा
वो॒ᳪसुपंरिविष्टादुेवेषुसुपंरिविष्टाव्व्ुयम्पंरिवेुष्टारौभूयास्म्म ॥ १३ ॥
व्वाचंन्ते ॥ व्वाचंन्तेशुन्धामिप्प्राुणन्तैंशुन्धामिुचक्षुंस्तेशुन्धामिुश्श्रो
त्रन्तेशुन्धामिुनाभिंन्तेशुन्धामिुमेढ्रन्तेशुन्धामिपायुन्तैंशुन्धामिचु
रित्राँस्तेशुन्धामि ॥ १४ ॥ मनंस्ते ॥ मनंस्तुऽआप्प्यांयतांुव्वाक्कुऽआ
प्प्यांयताम्प्राुणस्तु ऽआप्प्यांयताुञ्चक्षुंस्तु ऽ आप्प्यांयताुᳪश्श्रोत्रंन्तु ऽ

आप्प्यायताम् ॥ यत्तेक्क्रूरंयदास्त्थितन्तत्तऽआप्प्यायतान्निष्ट्यायता
न्तत्तेशुद्ध्यतुशमहोब्भ्यः ॥ ओषधेत्त्रायस्वस्वधितेमैनꣳहिꣳसीः
॥ १५ ॥ रक्षसाम्भागः ॥ रक्षसाम्भागोसिनिरस्तꣳरक्षऽइदमहꣳ
रक्षोभितिष्ठामीदमहꣳरक्षोवबाधऽइदमहꣳरक्षोधमन्तमोनयामि ॥
घृतेनद्यावापृथिवीप्प्रोर्णुवाथांव्वायोवेस्तोकानामग्निराज्ज्यस्यव्वेतु
स्वाहास्वाहाकृतेऽऊर्द्ध्वनभसम्मारुतङ्गच्छतम् ॥ १६ ॥ इदमापः ॥
इदमापःप्प्रवहतावद्यञ्चमलञ्चयत् ॥ यच्चाभिदुद्रोहानृतंय्यच्चशेपेऽ

संहि. अभीरुणम् ॥ आपोमातस्म्मादेनसःपवमानश्चमुञ्चतु ॥१७॥ [६] पू. भ. ॥ ६ ॥
॥३९॥ सन्ते ॥ सन्तेमनोमनसासम्प्राणःप्प्राणेनगच्छताम् ॥ रेडस्यग्निष्ट्वा
श्रीणात्त्वापस्त्वासमरिणन्न्वातस्यत्त्वाध्राज्यैपूष्णोरँह्याऽऊष्म
णोव्यथिषत्त्प्रयुतन्द्वेषः ॥१८॥ घृतङ्घृतपावानः ॥ घृतङ्घृतपावानः
पिबतवसांवसापावानःपिबतान्तरिक्षस्यहविरसिस्वाहा ॥ दिशः
प्रदिशऽआदिशोविदिशऽउद्दिशोदिग्भ्यःस्वाहा ॥ १९ ॥ ऐन्द्रः ॥३९॥
प्प्राणः ॥ ऐन्द्रःप्प्राणोऽअङ्गेऽअङ्गेनिदीध्यदैन्द्रऽउदानोऽअङ्गेऽअङ्गे

निधींतं ॥ देवंत्वष्टर्भूरिंतेसꣳसंमेतुसलक्ष्मायद्विषुरूपम्भवाति ॥
देवुत्रायन्तुमवंसेसखायोनुत्वामातापितरौमदन्तु ॥ २० ॥ [३]
सुमुद्रङ्गच्छ ॥ सुमुद्रङ्गच्छस्वाहान्तरिक्षङ्गच्छस्वाहादेवꣳसंविता
रङ्गच्छस्वाहामित्रावरुणौगच्छस्वाहाहोरात्रेगंच्छस्वाहाच्छन्दा ꣳ
सिगच्छस्वाहाद्यावांपृथिवीगंच्छस्वाहायुज्ञङ्गच्छस्वाहासोमंङ्गच्छ
स्वाहादिव्यन्नभौगच्छस्वाहाग्निंवैश्वानरङ्गच्छस्वाहामनोंमेहार्दि
यच्छदिवन्तेधूमोगच्छतुस्वुर्ज्योति ÷ पृथिवीम्भस्मनापृणस्वाहा

संहि. ॥ २१ ॥ मापः ॥ मापोमौषधीर्हिँसीर्द्धाम्म्नोधाम्म्नोराजँस्ततोवरु पू. अ.

॥४०॥ णनोमुञ्च ॥ यदाहुरघ्न्याऽइतिवरुणेतिशपामहेततोवरुणनोमुञ्च ॥ ६ ॥

॥ सुमित्रियानऽआपऽओषधयःसन्तुदुर्म्मित्रियास्तस्म्मैसन्तुयो

स्म्मान्द्वेष्टियञ्चवयन्द्विष्म्मः ॥ २२ ॥ [२] हविष्म्मतीरिमाः ॥

हविष्म्मतीरिमाऽआपोहविष्म्माँ२ऽआविवासति ॥ हविष्म्मान्दे

वोऽअध्वरोहविष्म्माँ२ऽअस्तुसूर्य्यः ॥ २३ ॥ अग्नेर्व्वः ॥ अग्नेर्व्वो ॥४०॥

पन्नगृहस्यसदसिसादयामीन्द्राग्ग्न्योर्भागधेयीस्स्थमित्रावरुणयो

र्भागधेयीस्त्थविश्वेषान्देवानाम्भागधेयीस्त्थ ॥ अमूर्य्याऽउपसूर्य्ये
याभिर्व्वासूर्य्यः सह ॥ तानोहिन्वन्त्वद्ध्वरम् ॥ २४ ॥ [२] हृदेत्त्वा
मनसेत्त्वादिवेत्त्वासूर्य्यायत्त्वा ॥ ऊर्द्ध्वमिममद्ध्वरन्दिविदेवेषुहोत्त्राय
च्छ ॥ २५ ॥ सोमराजन् ॥ सोमराजन्विश्वास्त्वम्प्रजाऽउपावरोहवि
श्वास्त्वाम्प्रजाऽउपावरोहन्तु ॥ शृणोत्त्वग्निः समिधाहवम्मेशृण्ण्व
न्त्वापोधिषणाश्चदेवीः ॥ श्रोताग्ग्रावाणोविदुषोनयज्ञꣳ शृणोतुदेवः
सविताहवम्मेस्वाहा ॥ २६ ॥ देवीरापः ॥ देवीरापोऽअपान्नपाद्योवऽ

ऊर्म्मिर्हविष्यऽइन्द्रियावान्मदिन्तमः ॥ तन्देवेभ्योदेवत्रादत्तशुक्र
पेभ्योयेषाम्भागस्थस्वाहा ॥ २७ ॥ कार्षिरसि ॥ कार्षिरसिसमुद्र
स्यत्वाक्षित्याऽउन्नयामि ॥ समापोऽअद्भिरग्मतसमोषधीभिरोष
धीः ॥ २८ ॥ यमग्ने ॥ यमग्नेपृत्सुमर्त्त्यमवावाजेषुयञ्जुनाः ॥
सयन्ताशश्वतीरिषःस्वाहा ॥ २९ ॥ [५] देवस्यत्वा ॥ देवस्यत्वा
सवितुःप्रसवेश्विनोर्बाहुभ्याम्पूष्णोहस्ताभ्याम् ॥ आददेरावासि
गभीरमिममध्वरङ्कृधीन्द्रायसुषूतमम् ॥ उत्तमेनपविनोर्ज्जस्वन्तम्मधु

मन्तुम्पर्यस्यन्तान्निग्ग्राब्भ्यास्त्थदेवश्रुतस्तर्प्पयतमामनोमे ॥ ३० ॥
मनोमे । तर्प्पयतव्वाचम्मेतर्प्पयतप्प्राणम्मेतर्प्पयतचक्षुर्म्मेतर्प्पयत
श्रोत्रम्मेतर्प्पयतात्मानम्मेतर्प्पयतप्प्रजाम्मेतर्प्पयतपशून्मेतर्प्पयत
गणान्मेतर्प्पयतगणामेमाव्वितृषन् ॥ ३१ ॥ इन्द्रायत्त्वा ॥ इन्द्राय
त्वाव्वसुमतेरुद्रवतऽइन्द्रायत्त्वादित्यवतऽइन्द्रायत्त्वाभिमातिग्घ्ने
॥ श्येनायत्त्वासोमभृतेग्नयेत्त्वारायस्पोषदे ॥ ३२ ॥ यत्ते । सोम
दिविज्ज्योतिर्य्यत्पृथिव्याय्यदुरावन्तरिक्षे । तेनास्म्मैयजमानायोरु

 रायेकृध्व्याधिंदात्रेवोचः ॥ ३३ ॥ श्वात्रास्त्थ ॥ श्वात्रास्त्थंवृत्रतुरोरा
॥४२॥ धीगूर्ताऽअमृतस्यपत्नीः ॥ तादेवीर्देवत्रेमंय्यज्ञन्नयतोपहूताःसोमं ॥ ६ ॥
स्यपिबत ॥३४॥ माभेः ॥ माभेर्म्मासंव्विक्थाऽऊर्ज्जन्धत्स्वधिषंणे
वीड्वीसतीवीडयेथामूर्ज्जन्दधाथाम् ॥ पाप्माहतोनसोमः ॥३५॥
प्रागपाक् ॥ प्रागपागुदगधराक्सर्वतस्त्वादिशऽआधावन्तु ॥ अम्बनि
ष्पररसमरीर्व्विदाम् ॥३६॥ त्वमङ्गप्रशंसिषोदेवःशविष्ठमर्त्त्यम् ॥ ॥४२॥
नत्त्वदन्न्योमघवन्नस्तिमर्डितेन्द्रब्रवीमितेवचः ॥३७॥ [८] इति

श्रीवाजसनेयसंहितायां षष्ठोऽध्यायः ॥ ६ ॥

अथानुवाकसूत्रम्। वाचस्पतय उपयामगृहीतोसि त्रिकावावायो यंवा द्विकौ यावामेका तम्प्रत्क्कथा चतस्रोऽयंवेनो येदेवासस्त्रिका विन्द्राय मूर्द्धानन्द्विकौ यस्त एका प्राणाय तिस्रो मघवइन्द्राग्नीआ गतमाघौमासश्चर्षणीधृतोविश्वेदेवासऽआगतेन्द्रमरुत्वोमरुत्वन्तं वृषभम्मरुतान्त्वौजसे सजोषाइन्द्र मरुत्वाँ२इन्द्र महाँ२इन्द्रो महाँ२इन्द्र एकैकोदुत्यमष्टौ पञ्चविꣳशतिरष्टाचत्वारिꣳशत् ॥

संहि. हरिः ॐ व्वाचस्प्पतये ॥ व्वाचस्प्पतयेपवस्व्ववृष्णोऽअꣳशुब्भ्याङ्ग पू. अ.
॥४३॥ भस्तिपूतꣳ ॥ देवोदेवेब्भ्यः पवस्वयेषाम्भागोसि ॥ १ ॥ मधुमती ॥७॥
र्न्नꣳ ॥ मधुमतीर्न्नऽइषस्कृधियत्तेसोमादाब्भ्यन्नामजागृवितस्मैतेसो
मसोमायस्वाहास्वाहोर्व्वन्तरिक्षमन्न्वेमिस्वाङ्कृतोसि ॥ २ ॥ स्वाङ्कृ
तोसि । व्विश्वेब्भ्यऽइन्द्रियेब्भ्योदिव्व्येब्भ्यꣳपार्थिवेब्भ्योमनस्त्वाष्टु
स्वाहात्त्वासुभवसूर्य्यायदेवेब्भ्यस्त्वामरीचिपेब्भ्योदेवाꣳशोयस्मै ॥४३॥
त्वेडेतत्सत्यमुपरिप्प्रुताभङ्गेनहतोसौफट्प्राणायत्त्वाव्व्यानायत्त्वा

॥ ३ ॥ [३] उपयामगृंहीतोसि ॥ उपयामगृंहीतोस्यन्तर्य्यंच्छमघव
न्पाहिसोमंम् ॥ उरुष्ष्यरायऽएषोंयजस्व ॥ ४ ॥ अन्तस्तें ॥ अन्तस्ते
द्यावांपृथिवीदंधाम्म्यन्तर्दंधाम्म्युर्व्वन्तरिंक्षम् ॥ सजूर्देवेभिरवंरैःपरैं
श्चान्तर्य्यामेमंघवन्मादयस्व ॥ ५ ॥ स्वाङ्कृंतोसि ॥ स्वाङ्कृंतोसिविश्वें
भ्यऽइन्द्रियेभ्योंदिव्येभ्यःपार्थिवेभ्योमनंस्त्वाष्टुस्वाहांत्वासुभ
वसूर्य्यांयदेवेभ्यंस्त्वामरीचिपेभ्यंऽउदानायंत्त्वा ॥ ६ ॥ [३] आवां
यो ॥ आवांयोभूपशुचिपाऽउपंनःसहस्रंन्तेनियुतोंविश्ववार ॥ उपोंते

ऽअन्धोमद्यंमयामियस्यदेवदधिषेपूर्व्वपेयंवायवेत्त्वा ॥ ७ ॥ इन्द्रवा
युऽइमे । सुताऽउपप्प्रयोभिरागतम् ॥ इन्दवोव्वामुशन्तिहि ॥ उपया
मगृहीतोसिव्वायवऽइन्द्रवायुब्भ्यान्त्वैषतेयोनिः सजोषोब्भ्यान्त्वा
॥ ८ ॥ [२] अयंव्वाम् ॥ अयंव्वाम्मित्त्रावरुणासुतःसोमऽऋतावृधा ॥ म
मेदिहश्श्रुतꣳहवम् ॥ उपयामगृहीतोसिमित्त्रावरुणाब्भ्यान्त्वा ॥ ९ ॥
रायाव्वयम् ॥ रायाव्वयꣳससवाꣳसोमदेमहव्येनदेवायवसेनगावः ॥
तान्धेनुम्मित्त्रावरुणायुवन्नोव्विश्श्वाहाधत्तमनपस्फुरन्तीमेषतेयोनिः ॥४४॥

ऋतायुभ्यान्त्वा ॥१०॥ [२] यावाम् ॥ यावाङ्कशामधुमत्त्यश्विना
सूनृतावती ॥ तयायज्ञम्मिमिक्षतम् ॥ उपयामगृहीतोस्यश्विभ्यां
न्त्वैषतेयोनिर्म्माद्ध्वीभ्यान्त्वा ॥११॥ [१] तम्प्रत्नथा । पूर्वथाविश्व
थेमथाज्ज्येष्ठतातिम्बर्हिषदꣳ स्वर्व्विदम् ॥ प्रतीचीनंवृजनन्दोहसेधु
निमाशुञ्जयन्तमनुयासुवर्द्धसे ॥ उपयामगृहीतोसिशण्डाय त्वैषते
योनिर्व्वीरताम्पाह्यपमृष्टꣳ शण्डोदेवास्त्वाशुक्रपाः प्प्रणयन्त्वनाधृष्टा
सि ॥१२॥ सुवीरोव्वीरान् ॥ सुवीरोव्वीरान्प्प्रजनयन्परीह्यभिरायस्पो

संहि. ॥४५॥

पू. अ. ॥७॥

षेणयजमानम् ॥ सञ्जग्मानोदिवापृथिव्याशुक्रःशुक्रशोचिषानिरं
स्तःशण्डःशुक्रस्याधिष्ठानमसि ॥ १३ ॥ अच्छिन्नस्यते । देवसोम
सुवीर्य्यस्यरायस्प्पोषस्यददितारःस्याम ॥ साप्प्रथमासंस्कृतिर्व्विश्श्व
वारासप्प्रथमोव्वरुणोमित्रोऽअग्निः ॥ १४ ॥ सप्प्रथमः ॥ सप्प्रथमोबृह
स्पतिश्चिकित्वाँस्तस्माऽइन्द्रायसुतमाजुहोतस्वाहा ॥ तृम्पन्तुहो
त्रामध्वोयाःस्विष्टायाःसुप्रीताःसुहुतायत्स्वाहायाडग्नीत् ॥ १५ ॥ ॥४५॥
[४] अयंव्वेनꣳ ॥ अयंव्वेनश्चोदयत्पृश्निगर्भाज्ज्योतिर्ज्जरायूरजसो

व्विमानै ॥ इममुपाꣳसङ्गमेसूर्य्यस्यशिशुन्नविप्प्रामुतिभीरिहन्ति ॥
उपयामगृहीतोसिमर्क्कायत्त्वा ॥१६॥ मनोन । येषुहवनेषुतिग्ग्मंव्वि
पुःशच्च्यांव्वनुथोद्द्रवन्ता ॥ आयःशर्य्याभिस्तुविनृम्म्णोऽअस्याश्री
णीतादिशङ्गभस्तावेषतेयोनिः प्रजाःपाह्यपमृष्टोमर्क्कोदेवास्त्वाम
न्थिपाःप्प्रणयन्त्वनाधृष्टासि ॥ १७ ॥ सुप्प्रजाःप्प्रजाःप्प्रजनयन्प
रीह्यभिरायस्पोषेणयजमानम् ॥ सञ्जग्मानोदिवापृथिव्व्यामन्थीम
न्थिशोचिषानिरस्तोमर्क्कोमन्थिनोधिष्ठानमसि ॥ १८ ॥ [३] येदेवा

सꣳ ॥ येदेवासोदिव्येकादशस्त्थपृथिव्यामध्येकादशस्त्थ ॥ अप्सु
क्षितोमहिनैकादशस्त्थतेदेवासोयज्ञमिमञ्जुषद्ध्वम् ॥ १९ ॥ उपयाम
गृहीतोसि ॥ उपयामगृहीतोस्याग्रयणोसिस्वाग्रयणꣳ । पाहिय
ज्ञम्पाहियज्ञपतिंविष्णुस्त्वामिन्द्रियेणपातुविष्णुन्त्वम्पाह्यभिस
वनानिपाहि ॥ २० ॥ सोमः पवते ॥ सोमः पवतेसोमः पवतेस्मै
ब्रह्मणेस्मैक्षत्रायास्मैसुन्वतेयजमानायपवतऽइषऽऊर्ज्जेपवतेद्भ्य ॥४६॥
ऽओषधीभ्यꣳ पवतेद्यावापृथिवीभ्याम्पवतेसुभूतायपवतेविश्वेभ्य

स्त्वादेवेभ्यऽएषतेयोनिर्विश्वेभ्यस्त्वादेवेभ्यः ॥ २१ ॥ [३]
उपयामगृहीतोसि । उपयामगृहीतोसीन्द्रायत्त्वाबृहद्वतेवयस्वतऽ
उक्थाव्यङ्गृह्णामि ॥ यत्तऽइन्द्रबृहद्वयस्तस्मैत्त्वाव्विष्णवेत्त्वैषतेयो
निरुक्थेभ्यस्त्वादेवेभ्यस्त्वादेवाव्यंयज्ञस्यायुषेगृह्णामिमित्रावरु
णाभ्यान्त्वा ॥ २२ ॥ मित्रावरुणाभ्यान्त्वा । देवाव्यंयज्ञस्यायु
षेगृह्णामीन्द्रायत्त्वादेवाव्यंयज्ञस्यायुषेगृह्णामीन्द्राग्निभ्यान्त्वा
देवाव्यंयज्ञस्यायुषेगृह्णामीन्द्रावरुणाभ्यान्त्वादेवाव्यंयज्ञस्यायु

संहि. षेगृह्णामीन्द्राबृहस्पतिभ्यान्त्वादेवाव्यंयज्ञस्यायुषेगृह्णामीन्द्रावि पू. अ.
॥४७॥ ष्णुभ्यान्त्वादेवाव्यंयज्ञस्यायुषेगृह्णामि ॥२३॥ [२] मूर्द्धानंन्दि ॥ ७ ॥
वः ॥ मूर्द्धानंन्दिवोऽअरतिम्पृथिव्यावैश्वानरमृतऽआजातमग्निम् ॥
कविंसम्राजमतिथिञ्जनानांमासन्नापात्रञ्जनयन्तदेवाः ॥ २४ ॥
उपयामगृहीतोसि ॥ ध्रुवोसिध्रुवक्षितिर्ध्रुवाणान्ध्रुवतमोच्युतानाम
च्युतक्षित्तमऽएषतेयोनिर्वैश्वानरायत्त्वा ॥ ध्रुवन्ध्रुवेणमनसावाचा ॥४७॥
सोममवनयामि ॥ अथानऽइन्द्रइद्विशोसपत्नाःसमनसस्करत्

॥२५॥ [२] यस्ते । द्रप्पस्स्कन्दतियस्तेऽअ॒ꣳशुर्ग्ग्रावंच्च्युतोधिषणं

योरुपस्त्थात् ॥ अद्ध्वर्य्योर्वापरिवायस्पवित्रात्तन्तेजुहोमिमनसावष

ट्कृत॒ꣳस्वाहादेवानामुत्क्क्रमणमसि ॥२६॥ [१] प्राणायमे । वर्च्चो

दावर्च्चसेपवस्वव्व्यानायमेवर्च्चोदावर्च्चसेपवस्वोदानायमेवर्च्चोदावर्च्च

सेपवस्ववाचेमेवर्च्चोदावर्च्चसेपवस्वक्क्रतूदक्षाब्भ्याम्मेवर्च्चोदावर्च्चसेप

वस्वश्श्रोत्रायमेवर्च्चोदावर्च्चसेपवस्वचक्षुब्भ्याम्मेवर्च्चोदसौवर्च्चसेपवे

थामात्मनेमे ॥२७॥ आत्मनेमे । वर्च्चोदावर्च्चसेपवस्वौजसेमेवर्च्चो

संहि. दावर्च्चँसेपवस्वायुषेमेवर्च्चोदावर्च्चँसेपवस्वविश्वाभ्योमेप्प्रजाभ्योवर्व पू. अ.
॥४८॥ र्च्चोदसौवर्च्चँसेपवेथाम् ॥२८॥ कोँसि । कतमोसिकस्यासिकोनामा ॥७॥
सि ॥ यस्यंतेनामामंन्महियन्त्वासोमेनातीतृपाम ॥ भूर्ब्भुवः स्वः
सुप्प्रजाः प्प्रजाभिः स्याꣳ सुवीरो व्वीरैः सुपोषः पोषैः ॥ २९ ॥ [३]
उपयामगृहीतोसि ॥ उपयामगृहीतोसिमधवेत्त्वोपयामगृहीतोसिमा
धवायत्त्वोपयामगृहीतोसिशुक्रायत्त्वोपयामगृहीतोसिशुचयेत्वोप
यामगृहीतोसिनभसेत्त्वोपयामगृहीतोसिनभस्यायत्त्वोपयामगृही ॥४८॥

तोसीषेत्त्वोपयामगृहीतोस्यूर्ज्जेत्त्वोपयामगृहीतोसिसहसेत्त्वोपयाम
गृहीतोसिसहस्यायत्त्वोपयामगृहीतोसितपसेत्त्वोपयामगृहीतोसित
पस्यायत्त्वोपयामगृहीतोस्यꣳहसस्पतयेत्त्वा ॥ ३० ॥ [१] इन्द्रा
ग्ग्नीऽआगतम् ॥ इन्द्राग्ग्नीऽआगतꣳसुतङ्गीर्ब्भिर्न्नभोव्वरेण्यम् ॥
अस्यपातन्धियेषिता ॥ उपयामगृहीतोसीन्द्राग्निभ्यान्त्वैषतेयोनि
रिन्द्राग्निभ्यान्त्वा ॥ ३१ ॥ [१] आघं ॥ आघायेऽअग्निमिन्धतेस्तृ
णन्तिबर्हिरानुषक् ॥ येषामिन्द्रोसुवासखा ॥ उपयामगृहीतोस्यग्नी

संहि. ॥४९॥ न्द्राब्भ्यान्त्वैषतेयोनिरग्नीन्द्राब्भ्यान्त्वा ॥ ३२ ॥ [१] ओमासश्च पू. अ. ॥७॥
र्षणीधृतः ॥ ओमासश्चर्षणीधृतोव्विश्श्वेदेवासऽआगत ॥ दाश्वाꣳसोदा
शुषःसुतम् ॥ उपयामगृहीतोसिव्विश्श्वेब्भ्यस्त्वादेवेब्भ्यऽएषतेयोनि
र्व्विश्श्वेब्भ्यस्त्वादेवेब्भ्यः ॥ ३३ ॥ [१] व्विश्श्वेदेवासः ॥ व्विश्श्वेदेवासऽआ
गतशृणुतामऽइमꣳहवम् ॥ एदम्बर्हिर्न्निषीदत ॥ उपयामगृहीतोसि
व्विश्श्वेब्भ्यस्त्वादेवेब्भ्यऽएषतेयोनिर्व्विश्श्वेब्भ्यस्त्वादेवेब्भ्यः ॥ ३४ ॥
[१] इन्द्रमरुत्वः ॥ इन्द्रमरुत्वऽइहपाहिसोमंय्यथाशार्य्यातेऽअपि ॥४९॥

वꣳसुतस्य ॥ तवप्प्रणीतीतवꣳशूरशर्म्मन्नाविवासन्तिकवयꣳसुयज्ञाः
॥ उपयामगृहीतोसीन्द्रायत्त्वामरुत्त्वतऽएषतेयोनिरिन्द्रायत्त्वामरु
त्त्वते ॥ ३५ ॥ [१] मरुत्त्वन्तव्वृषभंव्वावृधानमकवारिन्दिव्यꣳशा
समिन्द्रम् ॥ व्विश्वासाहमवसेनूतनायोग्ग्रꣳसहोदामिहतꣳहुवेम
॥ उपयामगृहीतोसीन्द्रायत्त्वामरुत्त्वतऽएषतेयोनिरिन्द्रायत्त्वामरु
त्त्वते ॥ उपयामगृहीतोसिमरुतान्त्वौजसे ॥ ३६ ॥ [१] सजोषाऽ
इन्द्र ॥ सजोषाऽइन्द्रसगणोमरुद्भिꣳसोमम्पिबवृत्रहाशूरविद्वान् ॥

संहि. जहिशत्रूँ१रपमृधौनुदस्वाथाभयङ्कृणुहिविश्वतौनः ॥ उपयामगृ

॥५०॥ हीतोसीन्द्रायत्त्वामरुत्त्वतऽएषतेयोनिरिन्द्रायत्त्वामरुत्त्वते ॥३७॥ पू. अ.

१० [१] मरुत्त्वाँ२ऽइन्द्र ॥ वृषभोरणायपिबासोमंमनुष्ष्वधम्मदाय ॥ ॥ ७ ॥

आसिञ्चस्वजठरेमद्ध्वऽऊर्म्मिन्त्वꣳराजासिप्प्रतिपत्त्सुतानाम् ॥ उप

यामगृहीतोसीन्द्रायत्त्वामरुत्त्वतऽएषतेयोनिरिन्द्रायत्त्वामरुत्त्वते

॥ ३८ ॥ [१] महाँ२ऽइन्द्रः ॥ महाँ२ऽइन्द्रोनृवदाचर्षणिप्प्राऽउत

द्विबर्हाऽअमिनःसहोभिः ॥ अस्म्मद्र्यग्वावृधेवीर्य्यायोरुःपृथुः ॥५०॥

सुकृतङ्कर्त्तृभिर्ब्भृत ॥ उपयामगृहीतोसिमहेन्द्रायत्त्वैषतेयोनिर्म्महे
न्द्रायत्त्वा ॥३९॥ [१] महाँ२ऽइन्द्रः ॥ महाँ२ऽइन्द्रोयऽओजसाप
र्ज्जन्योवृष्टिमाँ२ऽइव ॥ स्तोमैर्व्वत्स्यस्यंव्वावृधे ॥ उपयामगृहीतोसिम
हेन्द्रायत्त्वैषतेयोनिर्म्महेन्द्रायत्त्वा ॥ ४० ॥ [१] उदुत्त्यम् ॥ उदुत्त्य
ञ्जातवेदसन्देवंव्वहन्तिकेतवः ॥ दृशेविश्वायसूर्य्यꣳस्वाहा ॥ ४१ ॥
चित्रन्देवानाम् ॥ चित्रन्देवानामुदगादनीकञ्चक्षुर्म्मित्रस्यवरुण
स्याग्नेः ॥ आप्राद्यावापृथिवीऽअन्तरिक्षꣳसूर्य्यऽआत्माजगत

स्तुस्त्युषक्श्नुस्वाहा ॥ ४२ ॥ अग्ग्नेनय । सुपथाराये॒ऽअस्मान्विश्वानि
देववयुनानिविद्वान् ॥ युयोद्ध्यस्म्मज्जुहुराणमेनोभूयिष्ठान्तेनमऽउ
क्तिंव्विधेमस्वाहा ॥ ४३ ॥ अयन्नः ॥ अयन्नोऽअग्निर्व्वरिवस्कृणोत्व
यम्मृधःपुरऽएतुप्प्रभिन्दन् ॥ अयंव्वाजाञ्जयतुव्वाजसातावयꣳशत्रू
ञ्जयतुजर्हृषाणꣳस्वाहा ॥ ४४ ॥ रूपेणवꣳ ॥ रूपेणवोरूपमभ्यागां
तुथोवोव्विश्ववेदाव्विभजतु ॥ ऋतस्यपथाप्प्रेतचन्द्रदक्षिणाव्विस्वꣳप
श्यव्व्यन्तरिक्षंय्यतस्वसदस्यैꣳ ॥ ४५ ॥ ब्राह्मणमद्य । व्विदेयम्पितृ ॥५१॥

१५०

मन्तम्पैतृमत्त्यमृषिमार्षेयꣳ सुधातुदक्षिणम् ॥ अस्म्मद्राताद्देवत्राग

च्छतप्प्रदातारमाविशत ॥ ४६ ॥ अग्नयेत्त्वा ॥ अग्नयेत्त्वामह्यंवरु

णोददातुसोमृतत्त्वमंशीयायुर्द्दात्त्रऽएधिमयोमह्यम्प्रतिग्ग्रहीत्त्रेरुद्रा

यत्त्वामह्यंवरुणोददातुसोमृतत्त्वमंशीयप्प्राणोदात्त्रऽएधिवयोमह्य

म्प्रतिग्ग्रहीत्त्रेबृहस्प्पतयेत्त्वामह्यंवरुणोददातुसोमृतत्त्वमंशीयत्त्व

ग्ग्दात्त्र ऽ एधिमयोमह्यम्प्रतिग्ग्रहीत्त्रेयमायत्त्वामह्यंवरुणोददातु

सोमृतत्त्वमंशीयहयोदात्त्रऽएधिवयोमह्यम्प्रतिग्ग्रहीत्त्रे ॥ ४७ ॥

कोदात् ॥ कोदात्कस्माऽअदात्कामोदात्कामायादात् ॥ कामो
दाताकामः प्रतिग्रहीताकामैतत्ते ॥ ४८ ॥ [८] इति श्रीवाजसनेय
संहितायां सप्तमोऽध्यायः ॥ ७ ॥

अथानुवाकसूत्रम् । उपयामगृहीतोस्यादित्येभ्यः पंच वाममद्यद्वे
सुशर्मास्येका बृहस्पतिसुतस्यद्वे हरिरसिचतस्रः समिन्द्रणोष्टौमाहि
रेजतुर्दशमास्यः पंचकाबातिष्ठयुक्ष्वाहींद्रमिदेकैका यस्मान्नद्वेऽग्नेप
वस्वोत्तिष्ठन्नऽइत्यमुदुत्यमेकैकाऽजिघ्रद्वे विनइन्द्रवाचस्पतिंविश्वक

॥५२॥

मन्नेकैकाग्नयेत्वाचतस्र इहरातिस्तिस्रः परमेष्ठीदश त्रयोविꣳशति
स्त्रिषष्टिः ॥ हरिः ॐ उपयामगृहीतोसि ॥ उपयामगृहीतोस्यादित्त्ये
भ्यस्त्वा ॥ विष्णऽउरुगायैषतेसोमस्तꣳरक्षस्वमात्त्वादभन् ॥ १ ॥
कदाचन । स्तरीरसिनेन्द्रसश्चसिदाशुषे ॥ उपोपेन्नुमघवन्भूयऽइन्नुते
दानन्देवस्यपृच्यतऽआदित्त्येभ्यस्त्वा ॥२॥ कदाचन । प्रयुच्छस्यु
भेनिपासिजन्मनी ॥ तुरीयादित्त्यसवनन्तऽइन्द्रियमातस्त्थावमृत
न्दिव्यादित्त्येभ्यस्त्वा ॥३॥ यज्ञोदेवानाम् ॥ यज्ञोदेवानाम्प्रत्त्योति

सं॰हि॰ सुम्नमादित्यासोभवंतामृडयन्तः ॥ आवोर्वाचीसुमतिर्ववृत्यादꣳ पू॰ अ॰
॥५३॥ होश्चिद्यावरिवोवित्तरासदादित्येभ्यस्त्वा ॥ ४ ॥ विवस्वन्नादित्य ॥ ॥ ८ ॥
53 विवस्वन्नादित्यैषतेसोमपीथस्तस्मिन्मत्स्व ॥ श्रदस्मैनरोवचसेद
धातनयदाशीर्दादम्पतीवाममश्नुतः ॥ पुमान्पुत्रोजायतेविन्दतेव
स्वधाविश्वाहारपऽएधतेगृहे ॥५॥ [५] वाममद्य । संवितर्वाममुश्वो
दिवेदिवेवाममस्मभ्यꣳसावीः ॥ वामस्यहिक्षयस्यदेवभूरेरयाधि ॥५३॥
यावामभाजःस्याम ॥ ६ ॥ उपयामगृहीतोसि । सावित्रोसिचनोधा

श्वंनोधाऽआसिचनोमयिधेहि ॥ जिन्वंयज्ञञ्जिन्वंयज्ञपतिम्भगायदे
वायत्त्वासवित्रे ॥७॥ [२] शतम् ॥३००॥ उपयामगृहीतोसि । सुश
र्म्मासिसुप्प्रतिष्ठानोबृहदुक्षायनमः ॥ विश्वेभ्यस्त्वादेवेभ्यऽएषते
योनिर्व्विश्वेभ्यस्त्वादेवेभ्यः ॥ ८ ॥ [१] उपयामगृहीतोसि ॥
उपयामगृहीतोसिबृहस्प्पतिसुतस्यदेवसोमतऽइन्दोरिन्द्रियावतः प
त्नीवतोग्ग्रहाँ२ऽऋध्यासम् ॥ अहम्परस्तादहमवस्ताद्यदन्तरिक्षन्त
दुमेपिताभूत ॥ अहꣳसूर्य्यमुभयतोददर्शाहन्देवानाम्परमङ्गुहायत्

॥ ९ ॥ अग्ना३ऽइपत्नीवन् ॥ अग्ना३ऽइपत्नीवन्त्सजूर्द्देवेनुत्त्व
ष्ट्रासोमम्पिबस्वाहा ॥ प्रजापतिर्वृषासिरेतोधारेतोमयिधेहिप्प्रजापते
स्तेवृष्ण्णोरेतोधसोरेतोधामशीय ॥ १० ॥ [२] उपयामगृहीतोसि ॥
उपयामगृहीतोसिहरिरसिहारियोजनोहरिब्भ्यान्त्वा ॥ हय्योर्द्धाना
स्त्थसहसोमाऽइन्द्राय ॥ ११ ॥ यस्ते। ऽअश्वसनिर्भक्षोयोगोसनि
स्तस्यत ऽ इष्टयजुषस्तुतस्तोमस्यशस्तोक्थस्योपहूतस्योपहूतोभक्ष
यामि ॥ १२ ॥ देवकृतस्यैनसऽ ॥ देवकृतस्यैनसोवयजनमासिमनु

ष्यकृतस्यैनंसोवयजंनमसिपितृकृतस्यैनंसोवयजनमस्यात्मकृत
स्यैनंसोवयजंनमस्येनंसऽएनसोवयजंनमसि ॥ यच्चाहमेनोंविद्द्वाँ
श्चकारयच्चाविद्द्वाँस्तस्यसर्व्वस्यैनंसोवयजंनमसि ॥ १३ ॥ संव्वर्च्चसा ॥
संव्वर्च्चसापयंसासन्तनूभिरगंन्महिमनंसासꣳशिवेनं ॥ त्वष्टासुद
त्रोव्विदधातुरायोनुमार्ष्टुतन्न्वोयद्विलिष्टम् ॥ १४ ॥ [४] समिन्द्र ।
समिन्द्रणोमनसानेषिगोभिꣳसꣳसूरिभिर्म्मघवन्त्सꣳस्वस्त्या ॥
१० सम्ब्रह्मणादेवकृतंय्यदस्तिसन्देवानाꣳसुमतौयज्ञियानाꣳस्वाहा ।

। संहि. ॥ १५ ॥ संवर्च्चँसा ॥ संवर्च्चँसापयसासन्तनूभिरगन्महिमनसासꣳशि पू. अ. ।
॥५५॥ वेन । त्वष्टासुदत्रोविदधातुरायोऽनुमार्ष्टुतन्वोयद्विलिष्टम् ॥ १६ ॥ धा ॥ ८ ॥
तारातिः । सवितेदञ्जुषन्ताम्प्रजापतिर्न्निधिपादेवोऽअग्निः ॥ त्वष्टा
व्विष्णुःप्रजयासꣳरराणायजमानायद्रविणन्दधातस्वाहा ॥ १७ ॥
सुगावः ॥ सुगावोदेवाःसदनाऽअकर्म्मयऽआजग्मेदꣳसवनञ्जुषा
णाः ॥ भरमाणावहमानाहवीꣳष्यस्मेधत्तवसवोवसूनिस्वाहा
॥ १८ ॥ याँ२ऽआवह ॥ याँ२ऽआवहऽउशतोदेवदेवाँस्तान्प्रेरयस्वेऽ ॥५५॥

अग्नेसधस्थे ॥ जक्षिवाꣳसः पपिवाꣳसश्चविश्वेसुंघर्म्मꣳस्वराति

ष्ठतानुस्वाहा ॥ १९ ॥ वयꣳहि । त्वाप्प्रयतियज्ञेऽअस्मिन्नग्नेहोतार

मवृणीमहीह ॥ ऋधगयाऽऋधगुताशमिष्ठाःप्प्रजानन्यज्ञमुपयाहि

विद्वान्त्स्वाहा ॥ २० ॥ देवागातुविदः ॥ देवागातुंविदोगातुंवित्त्वागा

तुमित ॥ मनसस्पतऽइमन्देवयज्ञꣳस्वाहावातेधाः ॥ २१ ॥ यज्ञय

ज्ञम् ॥ यज्ञंयज्ञङ्गच्छयज्ञपतिङ्गच्छस्वांय्योनिङ्गच्छस्वाहा ॥ एषते

यज्ञोयज्ञपतेसहसूक्तवाकःसर्ववीरस्तञ्जुषस्वस्वाहा ॥ २२ ॥ [८]

सं.हि. माहिः ॥ माहिर्भूर्म्मापृदाकुः । उरुꣳहिराजावरुणश्चकारसूर्य्याय पू. अ.
॥५६॥ पन्थामन्वेतवाऽउ ॥ अपदेपादाप्प्रतिधातवेकरुतापवक्ताहृदयाविधं ॥ ८ ॥
श्चित् ॥ नमोवरुणायाभिष्ठितोवरुणस्यपाशः ॥ २३ ॥ अग्नेरनी
कम् ॥ अग्नेरनीकमपऽआविवेशापान्नपात्प्रतिरक्षन्नसुर्य्यम् ॥ दमेद
मेसमिधंयक्ष्यग्नेप्प्रतितेजिह्वाघृतमुच्चरण्यत्स्वाहा ॥ २४ ॥ समुद्रे
ते ॥ समुद्रेतेहृदयमप्स्वन्तःसन्त्वाविशन्त्वोषधीरुतापः ॥ यज्ञस्य
त्वायज्ञपतेसूक्तोक्तौनमोवाकेविधेमयत्स्वाहा ॥ २५ ॥ देवीरापः ॥ ॥५६॥

देवीरापऽएषवोगर्ब्भस्तꣳसुप्प्रीतꣳसुभृतम्बिभृत ॥ देवसोमैषतेलोक
स्तस्मिञ्छञ्चवक्ष्वपरिचवक्ष्व ॥ २६ ॥ अवभृथनिचुम्पुण । निचेरुर
सिनिचुम्पुणः ॥ अवदेवैर्द्देवकृतमेनोयासिषमवमर्त्यैर्म्मर्त्यकृतम्पुरु
राव्णोदेवरिषस्पाहिदेवानाꣳसमिदसि ॥ २७ ॥ [५] एजतुदश
मास्यः ॥ एजतुदशमास्योगर्ब्भोजरायुणासह ॥ यथायंव्वायुरेजति
यथासमुद्रऽएजति ॥ एवायन्दशमास्योऽअस्रञ्जरायुणासह ॥ २८ ॥
यस्यैते । यज्ञियोगर्ब्भोयस्यैयोनिर्हिरण्ययी ॥ अङ्गान्यहुतायस्यत

संहि. ॥९७॥ म्मात्त्रासमंजीगमुॐ स्वाहा ॥२९॥ पुरुदस्म्मोव्विषुरूपऽ ॥ पुरुदस्म्मो पू. अ.
व्विषुरूपऽइन्दुरन्तर्म्महिमानमानञ्जधीरः ॥ एकम्पदीन्द्विपदीन्त्रि ॥८॥
पदीञ्चतुष्पदीमष्टापदीम्भुवनानुप्प्रथन्ताॐ स्वाहा ॥ ३० ॥ मरुतो
यस्य ॥ मरुतोयस्याहिक्षयेपाथादिवोव्विमहसः ॥ ससुगोपातमोज
नः ॥ ३१ ॥ महीद्यौः । पृथिवीचनऽइमंय्यज्ञम्मिमिक्षताम् ॥ पिपृ
तान्नोभरीमभिः ॥ ३२ ॥ [५] आतिष्ठ । वृत्त्रहन्नथंय्युक्तातेब्रह्मा
णाहरी ॥ अर्व्वाचीनंसुतेमनोग्ग्रावाकृणोतुवग्गुना ॥ उपयामगृही ॥५७॥

तोसीन्द्रायत्त्वाषोडशिनेऽएषतेयोनिरिन्द्रायत्त्वाषोडशिने ॥ ३३ ॥
[१] सुष्वाहि । केशिनाहरीवृषणाकक्ष्यप्रा ॥ अथानऽइन्द्रसोमपा
गिरामुपश्रुतिञ्चर ॥ उपयामगृहीतोसीन्द्रायत्त्वाषोडशिनेऽएषतेयो
निरिन्द्रायत्त्वाषोडशिने ॥३४॥ [१] इन्द्रमित् ॥ इन्द्रमिद्धरीवहतो
प्रतिधृष्टशवसम् ॥ ऋषीणाञ्चस्तुतीरुपयज्ञञ्चमानुषाणाम् ॥ उप
यामगृहीतोसीन्द्रायत्त्वाषोडशिनेऽएषतेयोनिरिन्द्रायत्त्वाषोडशिने
॥ ३५ ॥ [१] यस्मान्न । जातःपरोऽअन्योऽअस्तियऽआविवेशभुवं

नानिद्विश्श्वा ॥ प्रजापतिहंम्प्रजयासꣳरराणस्त्रीणिज्ज्योतीꣳषिसचते
सषोडशी ॥३६॥ इन्द्रश्श्च । सम्म्राड्वरुणश्श्वराजातौतेभक्षञ्चक्रतुरग्ग्रऽ
एतम् ॥ तयोरहमनुभक्षम्भक्षयामिवाग्ग्देवीजुषाणासोमस्यतृप्प्य
तुसहप्प्राणेनस्वाहा ॥३७॥ [२] अग्ग्नेपवस्स्व ॥ अग्ग्नेपवस्स्वस्वपाऽ
अस्म्मेवर्च्चःसुवीर्य्यम् ॥ दधद्रयिम्मयिपोषम् ॥ उपयामगृहीतोस्य
ग्नयेत्त्वावर्च्चसऽएषतेयोनिरग्ग्नयेत्त्वावर्च्चसे ॥ अग्ग्नेवर्च्चस्विन्वर्च्चस्वाँ ॥५८॥
स्त्वन्देवेष्ष्वासिवर्च्चस्वानहम्मनुष्ष्येषुभूयासम् ॥ ३८ ॥ [१] उत्ति

ष्ठन्नोजंसा ॥ उत्तिष्ठन्नोजंसासहपीत्वीशिप्प्रेऽअवेपयः ॥ सोमंमि
न्द्रचमूसुतम् ॥ उपयामगृंहीतोसीन्द्रायत्त्वौजंसऽएषतेयोनिरिन्द्रा
यत्त्वौजंसे ॥ इन्द्रौजिष्ठौजिष्ठस्त्वन्देवेष्ष्वस्योजिष्ठोहम्मंनुष्ष्येषु
भूयासम् ॥ ३९ ॥ [१] अदृश्रमस्य ॥ केतवोव्विरश्म्मयोजनाँ२ऽअ
नुं ॥ भ्राजंन्तोऽअग्नयोयथा ॥ उपयामगृंहीतोसिसूर्य्यायत्त्वाभ्रा
जायैषतेयोनिःसूर्य्यायत्त्वाभ्राजाय ॥ सूर्य्यभ्राजिष्ठभ्राजिष्ठ
स्त्वन्देवेष्ष्वसिभ्राजिष्ठोहम्मंनुष्ष्येषुभूयासम् ॥ ४० ॥ [१] उदु

संहि. त्त्यम् ॥ उदुत्त्यञ्जातवेदसन्देवंव्वहन्तिकेतवः॥ दृशेव्विश्श्वायसूर्य्यम् ॥ पू. अ.
॥५९॥ उपयामगृहीतोसिसूर्य्यायत्त्वाभ्भ्राजायैषतेयोनि ꣳ सूर्य्यायत्त्वाभ्भ्रा ॥८॥
जाय ॥ ४१ ॥ [१] आजिग्घ्र ॥ आजिग्घ्रकलशम्मह्यात्त्वाव्विशन्त्वि
न्दवꣳ ॥ पुनरूर्जानिवर्त्तस्वसानः सहस्रन्धुक्ष्वोरुधारापयस्वतीपुन
र्म्माविशताद्द्रयिः ॥ ४२ ॥ इडेरन्ते ॥ इडेरन्तेहव्व्येकाम्म्येचन्द्रेज्ज्यो
तेदितिसरस्वतिमहिव्विश्श्रुति॥ एतातेऽअग्घ्न्येनामानिदेवेब्भ्योमासु
कृतम्ब्रूतात् ॥ ४३ ॥ [२] व्विनः । व्विनऽइन्द्रम्मृधोजहिनीचायच्छपृ ॥५९॥

तन्न्यतः ॥ योऽअस्म्माँ२ऽअभिदासत्त्यधरङ्गमयातमः ॥ उपयाम
गृहीतोसीन्द्रायत्त्वाविमृधऽएषतेयोनिरिन्द्रायत्त्वाविमृधे ॥ ४४ ॥
[१] वाचस्पतिं । विश्वकर्म्माणमूतयेमनोजुवंवाजेऽअद्याहुवेम ॥
सनोविश्वानिहवनानिजोषाद्विश्वशम्भूरवसेसाधुकर्म्मा ॥ उपयाम
गृहीतोसीन्द्रायत्त्वाविश्वकर्म्मणऽएषतेयोनिरिन्द्रायत्त्वाविश्वकर्म्म
णे ॥ ४५ ॥ [१] विश्वकर्म्मन्हविषा ॥ विश्वकर्म्मन्हविषावर्द्धनेनत्रा
तारमिन्द्रमकृणोरवद्ध्यम् ॥ तस्म्मैविशःसमनमन्तपूर्वीरयमुग्ग्रोवि

संहि. हव्योसथासत् ॥ उपयामगृहीतोसीन्द्रायत्त्वाविश्श्वकर्म्मणऽएषतेयो पू. अ.
॥६०॥ निरिन्द्रायत्त्वाविश्श्वकर्म्मणे ॥ ४६ ॥ [१] उपयामगृहीतोसि ॥ उप ॥ ८ ॥
यामगृहीतोस्यग्ग्नयेत्त्वागायत्रच्छन्दसङ्गृह्णामीन्द्रायत्त्वात्रिष्टुप्च्छं
न्दसङ्गृह्णामिविश्श्वेब्भ्यस्त्वादेवेब्भ्योजगच्छन्दसङ्गृह्णाम्म्यनुष्टुप्ते
ऽभिगरः ॥४७॥ व्रेशीनान्त्वा ॥ व्रेशीनान्त्वापत्मन्नाधूनोमिकुकून
नानान्त्वापत्मन्नाधूनोमिभन्दनानान्त्वापत्मन्नाधूनोमिमदिन्त ॥६०॥
मानान्त्वापत्मन्नाधूनोमिमधुन्तमानान्त्वापत्मन्नाधूनोमिशुक्र

न्त्वांशुक्रआधूंनोम्म्यन्हांरूपेसूर्य्यस्यरश्मिषु ॥ ४८ ॥ कुकुभꣳरूपं
॥ वृंषभस्यरोचतेबृहच्छुक्रःशुक्रस्यपुरोगाःसोमꣳसोमस्यपुरोगाः ॥
यत्तेसोमादाभ्यन्नामजागृंवितस्म्मैत्त्वागृह्णामितस्म्मैतेसोमसोमा
यस्वाहा ॥ ४९ ॥ उशिक्त्वम् ॥ उशिक्त्वन्देवसोमाग्नेःप्प्रियम्पाथो
पीहिव्वशीत्त्वन्देवसोमेन्द्रस्यप्प्रियम्पाथोपीह्यस्म्मत्सखात्त्वन्देवसो
मव्विश्वेषान्देवानांप्प्रियम्पाथोपीहि ॥ ५० ॥ [४] इहरतिः ॥ इहर
तिरिहरमध्वमिहधृतिरिहस्वधृतिꣳस्वाहा ॥ उपसृजन्धरुणम्मात्रेधरु

णौमातरन्धयन् ॥ रायस्पोषमस्मासुदीधरत्स्वाहा ॥ ५१ ॥ सत्र
स्यऽऋद्धिः ॥ सत्रस्यऽऋद्धिरस्यगन्मज्योतिरमृताऽअभूम ॥ दिव
म्पृथिव्याऽअध्यारुहामाविदामदेवान्त्स्वर्ज्योतिः ॥ ५२ ॥ युवन्तम्
॥ युवन्तमिन्द्रापर्व्वतापुरोयुधायोनःपृतन्यादपतन्तमिद्धतंव्वज्रेणत
न्तमिद्धतम् ॥ दूरेचत्तायच्छन्त्सद्गहनंयदिनक्षत् ॥ अस्माकंशत्
त्रून्परिशूरव्विश्वतोदर्माद्दर्षीष्टव्विश्वतः ॥ भूर्भुवःस्वःसुप्रजाःप्र
जाभिःस्यामसुवीरावीरैःसुपोषाःपोषैः ॥ ५३ ॥ [३] परमेष्ठ्यभिधी

तᳪं प्रजापतिर्वाचिव्याहृतायामन्धोऽअच्छेतᳪं सवितासन्यांविश्वक
र्म्मादीक्षायाम्पूषासोमक्रयण्यामिन्द्रश्च॥५४॥इन्द्रश्च।मरुतश्चक्रया
योपोत्थितोसुरᳪं पण्यमानोमित्रःक्रीतोविष्णुः शिपिविष्टऽऊरावा
सन्नोविष्णुर्न्नरन्धिषᳪं प्रोह्यमाणᳪं सोमः ॥५५॥ प्रोह्यमाणᳪं सोम
ऽआगतोवरुण ऽआसन्द्यामासन्नोग्निराग्नीध्र ऽइन्द्रोहविर्द्धानेथर्व्वो
पावह्रियमाणोविश्वेदेवाः॥५६॥ विश्वेदेवाः॥ विश्वेदेवाऽअᳪंशुषु
न्युप्तोविष्णुराप्रीतपाऽआप्प्याय्यमानोयमःसूयमानोविष्णुः

सम्भ्रियमाणोव्वायुःपूयमानःशुक्रःपूतःशुक्रःक्षीरश्रीर्म्मन्थीसक्तु
श्रीर्व्वैश्वदेवाः ॥ ५७ ॥ विश्वेदेवाः ॥ विश्वेदेवाश्चमसेषून्नीतोसु
हौमायोद्यतोरुद्रोहूयमानोव्वातोऽभ्यावृत्तोनृचक्षाःप्रतिख्यातोभ
क्षोभक्ष्यमाणःपितरोनाराशꣳसाःसन्नःसिन्धुः ॥ ५८ ॥ सन्नःसि
न्धुरवभृथायोद्यतःसमुद्रोऽभ्यवह्रियमाणःसलिलःप्रप्लुतोययोरो
जꣳसास्कभितारजाꣳसिवीर्य्यैभिर्व्वीरतमाशविष्ठा ॥ यापत्येतेऽअप्र
तीतासहोभिर्व्विष्णूऽअगन्वरुणापूर्व्वहूतौ ॥ ५९ ॥ देवान्दिवम् ॥

देवान्दिवमगन्यज्ञस्ततोमाद्रविणमष्टुमनुष्यानन्तरिक्षमगन्यज्ञ
स्ततोमाद्रविणमष्टुपितॄन्पृथिवीमगन्यज्ञस्ततोमाद्रविणमष्टुयङ्कञ्च
लोकमगन्यज्ञस्ततोमेभद्रमभूत् ॥ ६० ॥ चतुस्त्रिꣳशत्तन्तवोयेवि
तत्निरेयऽइमंयज्ञꣳस्वधयाददन्ते ॥ तेषाञ्छिन्नꣳसम्वेतद्दधा
मिस्वाहाघर्म्मोऽअप्येतुदेवान् ॥ ६१ ॥ यज्ञस्यदोहः ॥ यज्ञस्य
दोहोविततःपुरुत्रासोऽअष्टधादिवमन्वाततान ॥ सयज्ञधुक्ष्वमहि
मेप्प्रजायाꣳरायस्पोषंविश्वमायुरशीयस्वाहा ॥ ६२ ॥ आपवस्व ॥

संहि. आपवस्वहिरण्यवदश्वंवत्सोमवीरवत् ॥ वाजङ्गोमन्तमाभरस्वाहा पू. अ.

॥६३॥ ॥६३॥ [१०] इति श्रीवाजसनेयसंहितायां अष्टमोऽध्यायः ॥ ८ ॥ ॥ १ ॥

अथानुवाकसूत्रम् । देवसवितश्चतस्र इन्द्रस्यवज्रः पञ्च देवस्या
हंदशापयेतिस्रो वाजस्येममष्टावग्निरेकाक्षरेणैषतेचतुष्कौ सविताद्वे
अष्टौ चत्वारिꣳशत् ॥ हरिः ॐ देवसवितः ॥ देवसवितःप्रसुवयज्ञ
म्प्रसुवयज्ञपतिम्भगाय ॥ दिव्योगन्धर्वःकेतपूःकेतन्नःपुनातुवाच
स्पतिर्वाजन्नःस्वदतुस्वाहा ॥ १ ॥ ध्रुवसदन्त्वा । नृषदम्मनःसदमु ॥६३॥

पयामगृहीतोसीन्द्रायत्त्वाजुष्टङ्गृह्णाम्म्येषतेयोनिरिन्द्रायत्त्वाजुष्टत
मम् ॥ अप्प्सुषदन्त्वाघृतसदंव्योमसदमुपयामगृहीतोसीन्द्रायत्त्वा
जुष्टङ्गृह्णाम्म्येषतेयोनिरिन्द्रायत्वाजुष्टतमम् ॥ पृथिविसदन्त्वान्त
रिक्षसदन्दिविसदन्देवसदन्नाकसदमुपयामगृहीतोसीन्द्रायत्त्वाजुष्टं
गृह्णाम्म्येषतेयोनिरिन्द्रायत्त्वाजुष्टतमम् ॥ २ ॥ अपाꣳरसम् ॥
अपाꣳरसमुद्वयसꣳसूर्य्येसन्तꣳसमाहितम् ॥ अपाꣳरसस्ययोरस
स्तंव्वोगृह्णाम्म्युत्तममुपयामगृहीतोसीन्द्रायत्त्वाजुष्टङ्गृह्णाम्म्येषतेयो

निरिन्द्रायत्त्वाजुष्टतमम् ॥ ३ ॥ ग्रहाऽऊर्ज्जाहुतयः ॥ ग्रहाऽऊर्ज्जाहु
तयोव्व्यन्तोव्विप्प्रायमतिम् ॥ तेषांव्विशिप्प्रियाणांव्वोहमिषमूर्ज्जꣳस
मग्ग्रभमुपयामगृहीतोसीन्द्रायत्त्वाजुष्टङ्गृह्णाम्म्येषतेयोनिरिन्द्राय
त्त्वाजुष्टतमम् ॥ सम्पृचौस्त्थः सम्माभद्द्रेणपृङ्क्तंव्विपृचौस्त्थोव्विमापा
प्मनापृङ्क्तम् ॥ ४ ॥ [४] इन्द्रस्यव्वज्ज्रः ॥ इन्द्रस्यव्वज्ज्रोसिव्वाजसा
स्त्वयायंव्वाजꣳसेत् ॥ व्वाजस्यनुप्प्रसवेमातरम्म्महीमदितिन्नामव्वच
साकरामहे ॥ यस्यामिदंव्विश्श्वम्भुवनमाविवेशतस्यान्नोदेवः सविता ॥६४॥

धर्म्मैसाविषत् ॥ ५ ॥ अप्प्स्वुन्तः ॥ अप्प्स्वुन्तरमृतंमप्प्सुभेषज
मपामुतप्प्रशंस्तिष्ष्वश्श्वाभवंतव्वाजिनः ॥ देवीरापोयोवंऽऊर्म्मिःप्प्र
तूर्तिःकुकुन्मांव्वाजसास्तेनायंव्वाजꣳसेत् ॥ ६ ॥ व्वातोवा ॥ व्वातोवा
मनोवागन्धर्व्वाःसप्तविꣳशतिः ॥ तेऽअग्रेश्वमयुञ्जँस्तेऽअस्मिञ्जु
वमादधुः ॥ ७ ॥ व्वातरꣳहाभवव्वाजिन्न्युज्यमानऽइन्द्रस्येवदक्षिणः
श्रियैधि ॥ युञ्जन्तुत्त्वामरुतोविश्श्ववेदसऽआतेत्त्वष्टापत्सुजवन्द
धातु ॥ ८ ॥ जवोयः ॥ जवोयस्तेव्वाजिन्निहितोगुहायःश्येनेपरीत्तो

ऽअचरन्वाते ॥ तेनंनोवाजिन्बलंवान्बलेनवाजजिच्चभवसमनेच
पारयिष्णुः ॥ वाजिनोवाजजितोवाजꣳसरिष्यन्तोबृहस्पतेर्भा
गमवजिघ्रत ॥ ९ ॥ [५] देवस्याहम् ॥ देवस्याहꣳसवितुःसवेसत्य
संवसोबृहस्पतेरुत्तमन्नाकꣳरुहेयम् ॥ देवस्याहꣳसवितुःसवेसत्य
संवसऽइन्द्रस्योत्तमन्नाकꣳरुहेयम् ॥ देवस्याहꣳसवितुःसवेसत्यप्प्रं
सवसोबृहस्पतेरुत्तमन्नाकमरुहम् ॥ देवस्याहꣳसवितुःसवेसत्यप्प्रं ॥६५॥
सवसऽइन्द्रस्योत्तमन्नाकमरुहम् ॥ १० ॥ बृहस्पतेवाजम् ॥ बृहस्प

तेव्वाजंञ्जयतबृहस्पतयेव्वाचंव्वदतबृहस्पतिंव्वाजंञ्जापयत ॥ इन्द्रव्वा
जंञ्जयेन्द्रायव्वाचंव्वदतेन्द्रंव्वाजंञ्जापयत ॥ ११ ॥ एषावं÷ ॥ एषावꣳ
सासत्त्यासंव्वागभूद्ययाबृहस्पतिंव्वाजमजीजपताजीजपतबृहस्पतिं
व्वाजंव्वनस्पतयोव्विमुञ्चध्वम् ॥ एषावꣳसासत्त्यासंव्वागभूद्ययेन्द्रं
व्वाजमजीजपताजीजपतेन्द्रंव्वाजंव्वनस्पतयोव्विमुञ्चध्वम् ॥ १२ ॥
देवस्याहम् ॥ देवस्याहꣳसवितुःसवेसत्त्यप्प्रसवसोबृहस्पतेर्व्वाज
जितोव्वाजंञ्जेषम् ॥ व्वाजिनोव्वाजजितोध्वनस्कभ्नुवन्तोयोजनामि

संहि. मांनाꣳकाष्ठाङ्गच्छत ॥ १३ ॥ एषस्यः ॥ एषस्यव्वाजीक्षिपणिन्तुर पू. अ.
॥६६॥ ण्ण्यतिग्ग्रीवायांम्बद्धोऽअपिकक्षऽआसनि ॥ क्रतुन्दधिक्क्राऽअनुसꣳ ॥ ९ ॥
सनिष्ष्यदत्पथामङ्काꣳस्यन्वापनीफणत्स्वाहा ॥ १४ ॥ उतस्म ॥
उतस्मास्यद्द्रवतस्तुरण्ण्यतः पर्ण्णन्नवेरनुवातिप्प्रगर्द्धिनः ॥ श्येनस्येव
वद्ध्रजतोऽअङ्कसम्परिदधिक्क्राव्णः सहोर्ज्जातरित्रतꣳस्वाहा ॥ १५ ॥
शन्नः ॥ शन्नोभवन्तुव्वाजिनोहवेषुदेवतातामितद्द्रवꣳस्वर्क्काः ॥ जम्भ
यन्तोहिम्वृकꣳरक्षाꣳसिसनेम्म्यस्मद्युयवन्नमीवाः ॥ १६ ॥ तेनः ॥ ॥६६॥

८

तेनोऽअर्व्वन्तोहवनश्श्रुतोहवंविश्वेशृण्वन्तुवाजिनोमितद्द्रवः ॥ स
हस्रसामेधसातासनिष्यवोमहोयेधनंसमिथेषुजभ्रिरे ॥ १७ ॥ वा
जेवाजेवत ॥ वाजिनोनोधनेषुविप्राऽअमृताऽऋतज्ञाः ॥ अस्यमद्ध्वः
पिबतमादयद्ध्वन्तृप्तायातपथिभिर्द्देवयानैः ॥ १८ ॥ आमावाजस्य
प्रसवोजगम्म्यादेमेद्यावापृथिवीविश्वरूपे ॥ आमागन्ताम्पितरामा
तराचामासोमोऽअमृतत्वेनगम्म्यात् ॥ वाजिनोवाजजितोवाजंस
१२ ससृवांसोबृहस्पतेर्भागमवजिघ्रतनिमृजानाः ॥ १९ ॥ [१०]

आ॒प॒ये॒स्वाहा॑ ॥ स्वा॒प॒ये॒स्वाहा॑पि॒जाय॒स्वाहा॒क्क्रत॑वे॒स्वाहा॒व्वस॑वे॒स्वा
हा॑ह॒र्प्पत॑ये॒स्वाहा॒ह्न्हे मु॒ग्धाय॒स्वाहा॑मु॒ग्धाय॑व्वैन॑ꣳशि॒नाय॒स्वाहा॑व्विन॒ꣳ
शि॒नऽआ॒न्त्याय॒नाय॒स्वाहा॒न्त्या॑यभौव॒नाय॒स्वाहा॒भुव॑नस्य॒पत॑ये
स्वाहाधि॑पतये॒स्वाहा॑ ॥ २० ॥ आयु॑र्य॒ज्ञेन॑ । कल्पताम्प्प्रा॒णोय॒ज्ञे
न॑कल्पता॒ञ्चक्षु॑र्य॒ज्ञेन॑कल्पता॒ꣳश्श्रोत्रं॑य॒ज्ञेन॑कल्पताम्पृ॒ष्ठंय॒ज्ञे
न॑कल्पतांय॒ज्ञोय॒ज्ञेन॑कल्पताम् ॥ प्र॒जाप॑तेःप्प्र॒जाऽअ॑भूम॒स्व॑र्द्देवा
ऽअगन्म॒मृता॑ऽअभूम ॥ २१ ॥ अ॒स्मेवः॑ ॥ अ॒स्मेवो॑ऽअस्त्विन्द्रि॒ ॥६७॥

यमुस्म्मेनृम्म्णमुतक्क्रतुंरस्म्मेव्वर्च्चाँऽसिसन्तुवः ॥ नमोमात्रेपृथिव्व्यै
नमोमात्रेपृथिव्व्याऽइयन्तेराड्यन्तासियमनोध्रुवोसिधरुणः ॥ कृ
ष्यैत्त्वाक्षेमायत्त्वारय्यैत्त्वापोषायत्त्वा ॥ २२ ॥ [३] व्वाजस्येमम्
॥ व्वाजस्येमम्प्रसवःसुषुवेग्ग्रेसोमꣳराजानमोषधीष्ष्वप्प्सु ॥ ताऽ
अस्म्मब्भ्यम्मधुमतीर्ब्भवन्तुव्वयꣳराष्ट्रेजागृयामपुरोहिताः स्वाहा
॥ २३ ॥ व्वाजस्येमाम् । व्वाजस्येमाम्प्रसवःशिश्रियेदिवमिमाचव्वि
श्वाभुवनानिसम्म्राट् ॥ अदित्सन्तन्दापयतिप्प्रजानन्त्सनोरयिꣳस

देवीरग्निर्यच्छतुस्वाहा ॥ २४ ॥ वाजस्यनु । प्रसवऽआबभूवेमाचवि
श्वाभुवनानिसर्वतः ॥ सनेमिराजापरियातिविद्वान्प्रजांपुष्टिंवर्द्धय
मानोऽअस्मेस्वाहा ॥ २५ ॥ सोमꣳराजानम् । सोमꣳराजानमवसे
ग्निमन्वारभामहे ॥ आदित्यान्विष्णुꣳसूर्यम्ब्रह्माणञ्चबृहस्प
तिꣳस्वाहा ॥ २६ ॥ अर्यमणम्बृहस्पतिम् ॥ अर्यमणम्बृहस्पतिमि
न्द्रन्दानायचोदय ॥ वाचंविष्णुꣳसरस्वतीꣳसवितारञ्चवाजिनꣳ ॥६८॥
स्वाहा ॥ २७ ॥ अग्नेऽअच्छ ॥ अग्नेऽअच्छावदेहनःप्रतिनःसुमना

भव ॥ प्रनोयच्छसहस्रजित्त्वᳬहिधंनदाऽअसिस्वाहा ॥२८॥ प्रनः ॥
प्रनोयच्छत्त्वर्य्यमाप्रपूषाप्रबृहस्पतिः ॥ प्रवाग्देवीददातुनःस्वा
हा ॥ २९ ॥ देवस्यत्त्वासवितुःप्प्रसवेश्विनोर्ब्बाहुभ्याम्पूष्णोहस्ता
भ्याम् ॥ सरस्वत्यैवाचोयन्तुर्यन्त्रियैदधामिबृहस्पतेष्ट्वासाम्रा
ज्ज्येनाभिषिञ्चाम्यसौ ॥ ३० ॥ [८] अग्निरेकाक्षरेण। प्प्राणमुदज
यत्तमुज्जेषमश्विनौद्व्यक्षरेणद्विपदोमनुष्यानुदजयतान्तानुज्जेषंवि
ष्णुस्त्र्यक्षरेणत्रीँल्लोकानुदजयत्तानुज्जेषᳬसोमश्चतुरक्षरेणचतुष्प

॥६९॥ दꣳपशूनुदजयत्तानुज्जेषम्पूषापञ्चाक्षरेण ॥ ३१ ॥ पूषापञ्चाक्षरेण ।
पञ्चदिशऽउदजयत्ताऽउज्जेषꣳसविताषडक्षरेणषड्ऋतूनुदजयत्तानुज्जे ॥९॥
षम्मरुतः सप्ताक्षरेणसप्तग्राम्यान्पशूनुदजयँस्तानुज्जेषम्बृहस्प
तिरष्टाक्षरेणगायत्रीमुदजयत्तामुज्जेषम्मित्रोनवाक्षरेण ॥ ३२ ॥ मि
त्रोनवाक्षरेण । त्रिवृतꣳस्तोममुदजयत्तमुज्जेषंवरुणोदशाक्षरेणवि
राजमुदजयत्तामुज्जेषमिन्द्रऽएकादशाक्षरेणत्रिष्टुभमुदजयत्तामुज्जे
षंविश्वेदेवाद्वादशाक्षरेणजगतीमुदजयँस्तामुज्जेषंवसवस्त्रयोदशाक्ष ॥६९॥

रेण ॥ ३३ ॥ वसवस्त्रयोदशाक्षरेण । त्रयोदशꣳ स्तोममुदजयँस्तमु

ज्जेषꣳ रुद्राश्चतुर्दशाक्षरेणचतुर्दश ꣳ स्तोममुदजयँस्तमुज्जेषमादि

त्याः पञ्चदशाक्षरेणपञ्चदश ꣳ स्तोममुदजयँस्तमुज्जेषमदितिः षोड

शाक्षरेणषोडशꣳ स्तोममुदजयत्तमुज्जेषम्प्रजापतिः सप्तदशाक्षरेण

सप्तदशꣳ स्तोममुदजयत्तमुज्जेषम् ॥३४॥ [४] एषते । निर्ऋतेभा

गस्तञ्जुषस्वस्वाहाग्निनेत्रेभ्योदेवेभ्यः पुरःसद्भ्यः स्वाहायमनेत्रे

भ्योदेवेभ्योदक्षिणासद्भ्यः स्वाहाविश्वदेवनेत्रेभ्योदेवेभ्यः पश्चा

त्सद्भ्यः स्वाहा॑मि॒त्रावरु॑णनेत्रेभ्योवामरु॒न्नेत्रेभ्योवादे॒वेभ्य॑ उत्त
रा॒सद्भ्यः स्वाहा॒सोम॑नेत्रेभ्योदे॒वेभ्य॑ उपरि॒सद्भ्यो॒दुव॑स्वद्भ्यः स्वाहा॑
॥ ३५ ॥ येदे॒वाऽअ॒ग्निनेत्राः पु॒रः स॒दस्तेभ्यः॒ स्वाहा॒येदे॒वाय॒मने॑त्रा
दक्षिणा॒सद॒स्तेभ्यः स्वाहा॒येदे॒वावि॒श्वदे॑वनेत्राः प॒श्चात्सद॒स्तेभ्यः
स्वाहा॒येदे॒वामि॒त्रावरु॑णनेत्रावामरु॒न्नेत्रावोत्तरा॒सद॒स्तेभ्यः स्वाहा॒ये
दे॒वाः सोम॑नेत्राऽउपा॒रि॒सद॒ो॒दुव॑स्वन्त॒स्तेभ्यः स्वाहा ॥ ३६ ॥ अग्ने॒
सह॑स्व ॥ अग्ने॒सह॑स्वपृत॑नाऽअ॒भिमा॑ती॒रपा॑स्य ॥ दु॒ष्टर॒स्तर॒न्नरा॑ती॒र्व

च्चोधायुज्ञवांहसि ॥ ३७॥ देवस्यत्त्वा ॥ सवितुः प्प्रसवेश्विनोर्ब्बाहु
भ्यांम्पूष्णोहस्ताभ्याम् ॥ उपाᳫंशोर्व्वीर्य्येणजुहोमिहुतᳫंरक्षुᳫं
स्वाहारक्षसान्त्वाबुधायावधिष्म्मुरक्षोवधिष्म्मामुमसौहुतः ॥३८॥
[४] सवितात्त्वासवानाᳫंसुवतामुग्निर्ग्गृहपतीनाᳫंसोमोव्वनुस्पती
नाम् ॥ बृहस्पतिर्व्वाचऽइन्द्रोज्ज्यैष्ठ्यायरुद्रः पशुभ्योमित्रः सुत्यो
व्वरुणोधर्म्मपतीनाम् ॥ ३९ ॥ इमन्देवाᳫं ॥ इमन्देवाऽअसपुत्नᳫं
सुवध्वम्महतेक्षुत्रायमहतेज्ज्यैष्ठ्यायमहतेजानराज्यायेन्द्रस्येन्द्रि

संहि. याय ॥ इममुमुष्यैपुत्रममुष्यैपुत्रमस्यैव्विशऽएषवोमीराजासोमो पु. अ

॥७१॥ स्म्माकंम्ब्राह्मणानाᳫंराजा ॥ ४० ॥ [२] इति श्रीवाजसनेयसंहि ॥१०॥

7। तायां नवमोऽध्यायः ॥ ९ ॥

अथानुवाकसूत्रम् । अपोदेवाश्चतस्रः सोमस्यत्विषिः पञ्चावेष्टाः सप्त सोमस्यत्वाचतस्र इन्द्रस्यवज्रः पञ्च स्योनासिचतस्रः सवित्रैकाश्विभ्यांचतस्रोष्टौ चतुस्त्रिᳫंशत् ॥ हरिःॐ अपोदेवाः ॥ अपोदेवामधुमतीरगृभ्णन्नूर्जस्वतीराजस्वश्चितानाः ॥ याभिर्म्मित्रावरुणावभ्य ॥७१॥

षिञ्चन्त्याभिरिन्द्रमनंयन्नत्यरांतीः ॥ १ ॥ वृष्णंऽऊर्म्मिः ॥ वृष्णंऽऊ
र्म्मिरंसिराष्ट्रदाराष्ट्रम्मेंदेहिस्वाहावृष्णं ऽ ऊर्म्मिरंसिराष्ट्रदाराष्ट्रम
मुष्म्मैंदेहिवृषसेनोसिराष्ट्रदाराष्ट्रम्मेंदेहिस्वाहांवृषसेनोसिराष्ट्रदा
राष्ट्रममुष्म्मैंदेह्यर्त्थैतंस्त्थ ॥ २ ॥ अर्त्थैतंस्त्थराष्ट्रदाराष्ट्रम्मेंदत्तस्वा
हार्त्थैतंस्त्थराष्ट्रदाराष्ट्रममुष्म्मैंदत्तौजंस्वतीस्त्थराष्ट्रदाराष्ट्रम्मेंद
त्तस्वाहौजंस्वतीस्त्थराष्ट्रदाराष्ट्रममुष्म्मैंदत्तापं÷परिवाहिणीस्त्थरा
ष्ट्रदाराष्ट्रम्मेंदत्तस्वाहापं ÷ परिवाहिणींस्त्थराष्ट्रदाराष्ट्रममुष्मैंद

त्तापाम्पतिरसिराष्ट्रदाराष्ट्रम्मेदेहिस्वाहापाम्पतिरसिराष्ट्रदाराष्ट्रम
मुष्मैदेह्यपाङ्गर्भोसिराष्ट्रदाराष्ट्रम्मेदेहिस्वाहापाङ्गर्भोसिराष्ट्रदा
राष्ट्रममुष्मैदेहिसूर्य्यत्त्वचसस्थ ॥३॥ सूर्य्यत्त्वचसस्थ । राष्ट्रदा
राष्ट्रम्मेदत्तस्वाहासूर्य्यत्त्वचसस्थराष्ट्रदाराष्ट्रममुष्मैदत्तसूर्य्यव
र्चसस्थराष्ट्रदाराष्ट्रम्मेदत्तस्वाहासूर्य्यवर्चसस्थराष्ट्रदाराष्ट्रममु
ष्मैदत्तमान्दास्स्थराष्ट्रदाराष्ट्रम्मेदत्तस्वाहा मान्दास्स्थराष्ट्रदाराष्ट्र ॥७२॥
ममुष्मैदत्तव्रजक्षितस्स्थराष्ट्रदाराष्ट्रम्मेदत्तस्वाहाव्रजक्षितस्स्थरा

ष्ट्रदाराष्ट्रममुष्मैदत्तव्वाशाःस्त्थराष्ट्रदाराष्ट्रम्मेदत्तस्वाहाव्वाशाःस्त्थ
राष्ट्रदाराष्ट्रममुष्मैदत्तशविष्ठास्त्थराष्ट्रदाराष्ट्रम्मेदत्तस्वाहाशवि
ष्ठास्त्थराष्ट्रदाराष्ट्रममुष्मैदत्तशक्वरीस्त्थराष्ट्रदाराष्ट्रम्मेदत्तस्वाहा
शक्वरीस्त्थराष्ट्रदाराष्ट्रममुष्मैदत्तजनभृतःस्त्थराष्ट्रदाराष्ट्रम्मेद
त्तस्वाहाजनभृतःस्त्थराष्ट्रदाराष्ट्रममुष्मैदत्तव्विश्वभृतःस्त्थराष्ट्रदा
राष्ट्रम्मेदत्तस्वाहाव्विश्वभृतःस्त्थराष्ट्रदाराष्ट्रममुष्मैदत्तापःस्वराज
१२ स्त्थराष्ट्रदाराष्ट्रममुष्मैदत्त ॥ मधुमतीर्म्मधुमतीभिःपृच्यन्ताम्म

संहि.

॥७३॥ हिंक्षत्रङ्क्षत्रियायवन्न्वानाऽअनाधृष्टाꣳसीदतसहौजसोमहिंक्षत्रङ्क्षत्रि पू. अ.

यायदधतीꣳ ॥४॥ [४] शतम् ॥४००॥ सोमस्यत्त्विषिः ॥ सोमस्य ॥१०॥

त्त्विषिरसितवेवमेत्त्विषिम्भूयात् ॥ अग्नयेस्वाहासोमायस्वाहासवि

त्रेस्वाहासरस्वत्त्यैस्वाहापूष्णेस्वाहाबृहस्पतयेस्वाहेन्द्रायस्वाहा

घोषायस्वाहाश्लोकायस्वाहा ꣴ शायस्वाहाभगायस्वाहार्य्यम्णे

स्वाहा ॥५॥ पवित्रेस्त्थः ॥ पवित्रेस्त्थोवैष्णव्यौसवितुर्व्वःप्प्रसवऽ ॥७३॥

उत्पुनाम्म्यच्छिद्रेणपवित्रेणसूर्य्यस्यरश्मिभिः ॥ अनिभृष्टमसिवा

चोबन्धुस्तपोजाश्सोमस्यदात्रमसिस्वाहाराजस्वः ॥ ६ ॥ सधमादो
द्युम्निनीः ॥ सधमादोद्युम्निनीरापऽएताऽअनाधृष्टाऽअपस्योव्वसा
नाः ॥ पस्त्यासुचक्रेव्वरुणःसधस्थमपाꣳशिशुर्मातृतमास्वन्तः
॥ ७ ॥ क्षत्रस्योल्बम् ॥ क्षत्रस्योल्बमसिक्षत्रस्यजराय्वसिक्षत्रस्य
योनिरसिक्षत्रस्यनाभिरसीन्द्रस्यव्वार्त्रघ्नमसिमित्रस्यासिव्वरुण
स्यासित्वयायंव्वृत्रंव्वधेत् ॥ दृवासिरुजासिक्षुमासि ॥ पातैनम्प्राञ्चम्पा
तैनम्प्रत्यञ्चम्पातैनन्तिर्यञ्चन्दिग्भ्यःपात ॥८॥ आविर्मर्याः ॥

घाँद. आविर्म्मर्य्याऽआवित्तोऽअग्निर्गृहपतिरावित्तऽइन्द्रोवृद्धश्रवाऽआ पू. अ.

॥७४॥ वित्तौमित्रावरुणौधृतव्रतावावित्तꣳपूषाविश्ववेदाऽआवित्तेद्यावापृथि ॥१०॥

वीविश्वशम्भुवावावित्तादितिरुरुशर्म्मा ॥ ९ ॥ [५] अवेष्टादन्द

शूकाꣳ ॥ अवेष्टादन्दशूकाꣳप्राचीमारोहगायत्रीत्त्वावतुरथन्तरꣳ

सामंत्रिवृत्स्तोमोवसन्तऽऋतुर्ब्रह्मद्रविणन्दक्षिणामारोह ॥ १० ॥

दक्षिणामारोह । त्रिष्टुप्त्वावतुबृहत्सामपञ्चदशस्तोमोग्ग्रीष्मऽ

ऋतुःक्षत्रन्द्रविणम्प्रतीचीमारोह ॥ ११ ॥ प्रतीचीमारोह । जगती ॥७४॥

त्त्वावतुव्वैरूपꣳसामंसप्तदुशस्तोमोव्वर्षा ऽ ऋतुर्व्विड्द्रविणमुदीचीमा
रोह ॥ १२ ॥ उदीचीमारोहानुष्टुप्त्वावतुव्वैराजꣳसामैकविꣳशस्तो
मःशरदृतुःफलन्द्रविणमूर्द्ध्वामारोह ॥ १३ ॥ ऊर्द्ध्वामारोह । पङ्क्तिस्त्वा
वतुशाक्क्वररैवतेसामनीत्रिणवत्रयस्त्रिꣳशौस्तोमौहेमन्तशिशिरावृतू
व्वर्चोद्रविणम्प्रत्यस्तन्नमुचेःशिरः ॥ १४ ॥ सोमस्यत्त्विषिः ॥ सोम
स्यत्त्विषिरसितवेवमेत्त्विषिर्भूयात् ॥ मृत्योःपाह्योजोसिसहोस्य
मृतमसि ॥ १५ ॥ हिरण्ण्यरूपा ऽ उषसोव्विरोक ऽ उभाविन्द्रा ऽ उदिथः

सं॰हि. सूर्य्यश्च ॥ आरोहतंव्वरुणमित्त्रगर्त्तन्ततश्चक्षाथामदितिन्दितिञ्चमि पू. अ.
॥७५॥ त्रोसिव्वरुणोसि ॥ १६ ॥ [७] सोमस्यत्वाद्युम्न्नेनाभिषिञ्चाम्म्यग्ने ॥१०॥
र्ब्भ्राजसासूर्य्यस्यव्वर्च्चसेन्द्रस्येन्द्रियेण ॥ क्षत्त्राणाङ्क्षत्त्रपतिरेद्ध्यति
दिद्द्यून्पाहि ॥ १७॥ इमन्देवाः ॥ इमन्देवाऽअसपत्नꣳसुवद्ध्वम्मह
तेक्षत्त्रायमहतेज्ज्यैष्ठ्यायमहतेजानराज्ज्यायेन्द्रस्येन्द्रियाय ॥ इम
ममुष्ष्यपुत्त्रममुष्ष्यैपुत्त्रमस्यैव्विशऽएषवोमीराजासोमोस्म्माकम्ब्रा
ह्मणानाꣳराजा ॥ १८ ॥ प्रपर्व्वतस्य ॥ वृषभस्यपृष्ठान्नावश्चरन्तिस्व ॥७५॥

सिच्चंऽइयानाः ॥ ताऽआवंवृत्त्रन्नधरागुदंक्ताऽअहिंम्बुध्न्यमनुरीय

माणाः ॥ व्विष्णोर्व्विक्क्रमणमसिव्विष्णोर्व्विक्क्रान्तमसिव्विष्णोःक्क्रा

न्तमंसि ॥१९॥ प्रजांपतेन । त्त्वादेतान्न्यन्न्योव्विश्श्वारूपाणिपरिताबं

भूव ॥ यत्कामास्तेजुहुमस्तन्नोऽअस्त्वयममुष्ष्यंपितासावस्यपिता

व्वयꣳस्यांमपतयोरयीणाꣳस्वाहा ॥ रुद्द्रयत्तेक्क्रिविपरन्नामतस्म्मिं

न्हुतमंस्यमेष्टमंसिस्वाहा ॥ २० ॥ [४] इन्द्रंस्यव्वज्ज्रः ॥ इन्द्रंस्य

व्वज्ज्रोऽसिमित्त्रावरुणयोस्त्वाप्प्रशास्त्रोःप्प्रशिषायुनज्म्मि ॥ अव्यथा

॥७६॥ यैत्त्वास्वधायैत्त्वारिष्टो ऽ अर्ज्जुनोमरुताम्प्रसवेनंजयापाममनंसास
मिन्द्रियेणं ॥ २१ ॥ मातें ॥ मातंऽइन्द्रतेव्वयन्तुराषाडयुंक्तासोऽअ ।१०॥
ब्रह्मताव्विदंसाम ॥ तिष्ठारथमधियंव्वज्रहस्तारश्मीन्देंवयमसेस्व
श्वान् ॥ २२ ॥ अग्नयेंगृहपंतये ॥ अग्नयेंगृहपंतयेस्वाहासोमायव्वन
स्पतंयेस्वाहांमरुतामोजंसेस्वाहेन्द्रंस्येन्द्रियायस्वाहां ॥ पृथिंविमा
तम्मांमांहिꣳसीम्मोंऽअहन्त्वाम्॥ २३ ॥ हꣳसःशुंचिषत् ॥ हꣳसः
शुंचिषद्वसुंरन्तरिक्षसद्धोतांव्वेदिषदतिंथिर्दुरोणसत् ॥ नृषद्वंरसदृंतस ॥७६॥

द्व्योमसदब्जागोजाऽऋतजाऽअद्रिजाऽऋतम्बृहत् ॥ २४ ॥ इयं
दसि ॥ इयदस्यायुरस्यायुर्म्मयिधेहियुङ्ङसिवर्च्चोसिवर्च्चोमयिधेह्यू
र्गस्यूर्ज्जम्मयिधेहि ॥ इन्द्रस्यवांवीर्य्यकृतोबाहूऽअभ्युपावहरामि
॥२५॥[५] स्योनासि । सुषदासिक्षत्रस्ययोनिरसि ॥ स्योनामासी
दसुषदामासीदक्षत्रस्ययोनिमासीद ॥ २६ ॥ निषसाद ॥ धृतव्रतोव
रुणःपस्त्यास्वा ॥ साम्म्राज्ज्यायसुक्रतुः ॥ २७॥ अभिभूरसि ॥ अ
भिभूरस्येतास्तेपञ्चदिशःकल्पन्ताम्ब्रह्मँस्त्वम्ब्रह्मासिसवितासि

सत्यप्प्रसवोव्वरुणोसिसत्यौजाऽइन्द्रोसिव्विशौजारुद्रोसिसुशेवः ॥
बहुकारश्रेयस्करभूयस्करेन्द्रस्यव्वज्रोसितेनमेरध्य ॥ २८ ॥ अ
ग्निःपृथुः ॥ अग्निःपृथुर्द्धर्म्मणस्पतिर्ज्जुषाणोऽअग्निःपृथुर्द्धर्म्मणस्प
तिराज्यस्यव्वेतुस्वाहास्वाहाकृताःसूर्य्यस्यरश्मिभिर्य्यतध्वꣳसजा
तानांम्मध्यमेष्ठ्याय ॥ २९ ॥ [४] सवित्राप्प्रसवित्रा ॥ सरस्वत्याव्वा
चात्वष्ट्रारूपैःपूष्णापशुभिरिन्द्रेणास्मेबृहस्पतिनाब्रह्मणाव्वरुणे
नौजसाग्निनातेजसासोमेनराज्ञाव्विष्णुनादशम्म्यादेवतयाप्प्रसूतः ॥७७॥

ष्प्रसंर्प्पामि ॥ ३० ॥[१] अश्विभ्यांम्पच्यस्व ॥ अश्विभ्यांम्पच्य
स्वसरस्वत्यैपच्यस्वेन्द्रायसुत्राम्म्णेपच्यस्व ॥ वायुःपूतःपवित्रेणप्प्र
त्यङ्क्सोमोऽअतिस्रुतः ॥ इन्द्रस्ययुज्ज्यःसखा ॥ ३१ ॥ कुविदङ्ग ।
यवमन्तोयवञ्चिद्यथादान्त्यनुपूर्वंव्वियूय ॥ इहेहैषाङ्कृणुहिभोजना
नियेबर्हिषोनमऽउक्तिंय्यजन्ति ॥ उपयामगृहीतोस्यश्विभ्यान्त्वा
सरस्वत्यैत्त्वेन्द्रायत्त्वासुत्राम्म्णे ॥ ३२ ॥ युवꣳसुराममम् ॥ युवꣳसु
रामंमश्विनानमुचावासुरेसचा ॥ व्विपिपानाशुभस्पतीऽइन्द्रङ्कर्म्म

स्वावतम् ॥ ३३ ॥ पुत्त्रमिंवपितरौं ॥ पुत्त्रमिंवपितरांवुश्विनोभेन्द्रा
वथुंकाव्यैर्द्दुहुसनौंभिः ॥ यत्सुरामुंव्यपिंवुःशचींभिःसरंस्वतीत्त्वा
मघवन्नभिष्णक् ॥ ३४ ॥ [४] इति श्रीवाजसनेयसंहितायां
दशमोऽध्यायः ॥ १० ॥

अथानुवाकसूत्रम् । युञ्जानएकादश प्रतूर्त्तंषोडश देवस्य
त्वादशापोदेवीर्द्वादशापोह्येकादशादितिश्चापञ्चाकूतिमष्टादश सप्त
त्र्यशीतिः ॥ हरिः ॐ युञ्जानःप्रथमम् ॥ युञ्जानःप्रथमम्मनंस्त

त्त्वायंसविताधियंः ॥ अग्नेर्ज्योतिर्निचाय्यंपृथिव्याऽअध्याभंरत्
॥ १ ॥ युक्तेनमनंसा । व्वयन्देवस्यंसवितुःसवे ॥ स्वर्ग्यायशक्त्या
॥ २ ॥ युक्त्वायंसविता । देवान्त्स्वर्य्यतोधियादिवंम् ॥ बृहज्ज्योतिः
करिष्यतःसंविताप्रसुंवातितान् ॥ ३ ॥ युञ्जतेमनंः ॥ युञ्जतेमनंऽ
उतयुंञ्जतेधियोव्विप्राव्विप्रंस्यबृहतोव्विपश्चितंः ॥ व्विहोत्रादधेव्वयु
नाविदेकऽइन्महीदेवस्यंसवितुःपरिंष्टुतिः ॥ ४ ॥ युजेवांम् ॥ युजेवां
१४ म्ब्रह्मंपूर्व्यन्नमोंभिर्व्विश्लोकऽएतुपथ्येवसूरेः ॥ शृण्वन्तुविश्वेऽअमृ

संहि. ॥७९॥ तस्यपुत्त्राऽआयेधामानिदिव्यानितस्थुः ॥ ५ ॥ यस्यप्प्रयाणम् । पू. अ. ॥११॥
यस्यप्प्रयाणमन्न्वन्न्यऽइद्ययुर्देवादेवस्यमहिमानमोजसा ॥ यःपार्थि
वानिविममेसऽएतशोरजाꣳसिदेवःसवितामहित्वना ॥ ६ ॥ देवसवि
तः ॥ देवसवितःप्प्रसुवयज्ञम्प्प्रसुवयज्ञपतिम्भगाय ॥ दिव्योगन्धर्व्वः
केतपूःकेतन्नःपुनातुव्वाचस्प्पतिर्व्वाचन्नःस्वदतु ॥ ७ ॥ इमन्नः ॥ इम
न्नोदेवसवितर्य्यज्ञम्प्प्रणयदेवाव्व्यꣳसखिविदꣳसत्राजितन्धनजितꣳ ॥७९॥
स्वर्जितम् ॥ ऋचास्तोमꣳसमर्द्धयगायत्रेणरथन्तरम्बृहद्गायत्रवर्त्तनि

स्वाहा ॥८॥ देवस्यत्त्वा । सवितुःप्प्रसवेऽश्विनोर्बाहुब्भ्याम्पूष्णोह
स्ताब्भ्याम् ॥ आददेगायत्रेणच्छन्दसाङ्गिरस्वत्पृथिव्याःसधस्थाद
ग्निम्पुरीष्यमङ्गिरस्वदाभरत्त्रैष्टुभेनच्छन्दसाङ्गिरस्वत् ॥ ९ ॥ अ
भ्रिरसि । नार्य्यसित्त्वयाव्वयमग्निꣳशकेमखनितुꣳसधस्थऽआ ॥
जागतेनच्छन्दसाङ्गिरस्वत् ॥ १० ॥ हस्तऽआधाय । सविताबिभ्रद
भ्रिꣳहिरण्ययीम् ॥ अग्नेर्ज्ज्योतिर्न्निचाय्यपृथिव्याऽअध्याभरदानु
ष्टुभेनच्छन्दसाङ्गिरस्वत् ॥११॥ [११] प्रतूर्त्तंव्वाजिन् ॥ प्रतूर्त्तंव्वाजि

न्नाद्रेवुव्रिरिष्ठामनुसंव्वतम् ॥ दिवितेजन्मपरममन्तरिक्षेतवनाभिः
॥८०॥ पृथिव्यामधियोनिरित् ॥ १२ ॥ सुज्ञाथाꣳरासंभम् ॥ सुज्ञाथाꣳरा ॥११॥
संभंऽसुवमस्मिम्मन्यामैवृषण्वसू ॥ अग्निम्भरन्तमस्मयुम् ॥ १३ ॥
योगेयोगेतवस्तरम् ॥ योगेयोगेतवस्तरंव्वाजेवाजेहवामहे ॥ सखायऽ
इन्द्रमूतये ॥ १४ ॥ प्रतूर्व्वन्नेहि ॥ प्रतूर्व्वन्नेह्यवक्रामन्नशस्तीरुद्रस्यगाणं
पत्यम्मयोभूरेहि ॥ उर्व्वन्तरिक्षंव्वीहिस्वस्तिगव्यूतिरभयानिकृण्वन्पू
ष्णासयुजासह ॥ १५ ॥ पृथिव्याःसधस्थात् ॥ पृथिव्याःसधस्था ॥८०॥

दुग्निम्पुरीष्यमङ्गिरस्वदाभंराग्निम्पुरीष्यमङ्गिरस्वदच्छैमोग्निम्पु
रीष्यमङ्गिरस्वद्भंरिष्यामः ॥ १६॥ अन्वग्निः॥ अन्वग्निरुपसाम
ग्रंमक्ख्यदन्वहानिप्प्रथमोजातवेदाः॥अनुसूर्य्यस्यपुरुत्राचरश्म्मी
ननुद्यावापृथिवीऽआततंथ ॥ १७॥ आगत्त्यंवाजी ॥ आगत्त्यंवाज्य
ध्वानः सर्वामृधोविधूनुते ॥ अग्निः सधस्त्थेमहतिचक्षुषानिचिकी
षते ॥ १८ ॥ आक्रम्म्यवाजिन् ॥ आक्रम्म्यवाजिन्पृथिवीमाग्निमि
च्छरुचात्त्वम् ॥ भूम्म्यावृत्त्वायंनोब्रूहियतःखनेमतंवयम् ॥ १९॥

द्यौस्ते । पृष्ठम्पृथिवीसधस्थमात्मान्तरिक्षꣳसमुद्रोयोनिः ॥ वि
ख्यायचक्षुषात्त्वमभितिष्ठपृतन्यतः ॥२०॥ उत्क्राम । महतेसौभगा
यास्मादास्थानाद्द्रविणोदावाजिन् ॥ वयꣳस्यामसुमतौपृथिव्याऽ
अग्निङ्खनन्तऽउपस्थेअस्याः ॥ २१ ॥ उदक्रमीत् ॥ उदक्रमीद्द्रवि
णोदावाज्यर्वाकःसुलोकꣳसुकृतम्पृथिव्याम् ॥ ततःखनेमसुप्रती
कमग्निꣳस्वोरुहाणाऽअधिनाकमुत्तमम् ॥ २२ ॥ आत्त्वाजिघर्म्मि ॥८१॥
मनसाघृतेनप्रतिक्षियन्तम्भुवनानिविश्वा ॥ पृथुन्तिरश्चावयसाबृह

न्तंऽयचिह्नमन्नैरभुसन्दृशानम् ॥ २३ ॥ आविश्वतंः । प्प्रत्यञ्चञ्जि
घर्म्मर्यरक्षसामनेसातञ्जुंपेत ॥ मस्यैंश्रीस्पृहवर्द्धंणोऽअग्निर्नाभिमृ
शैतन्त्व्याजभ्मुंरणंऽ॥२४॥परिवाजंपतिंऽ॥परिवाजंपतिंऽकविरग्निर्हं
व्यान्यंक्रमीत् ॥ दधद्रत्नानिदाशुषे ॥२५॥ परित्वा । ग्नेपुरंव्वयंवि
प्प्रंऽसहस्यधीमहि ॥ धृषद्वर्णन्दिवेदिवेहन्तारम्भङ्गुरावताम् ॥२६॥
त्वमंग्ने । द्युभिस्त्वमाशुशुक्षणिस्त्वमद्भ्यस्त्वमश्मनस्परि ॥ त्वंव्वने
भ्यस्त्वमोषधीभ्यस्त्वन्नृणान्नृपतेजायसेशुचिंः ॥ २७ ॥ [१६]

संहि. देवस्यत्त्वा । सवितुःप्रसवेश्विनोर्बाहुभ्याम्पूष्णोहस्ताभ्याम् ॥ पू. अ.
॥८२॥ पृथिव्याःसधस्थादग्निम्पुरीष्यमङ्गिरस्वत्त्वन्नामि ॥ ज्योतिष्मम ॥११॥
न्तन्त्वाग्नेसुप्रतीकमजस्रेणभानुनादीद्यतम् ॥ शिवम्प्रजाभ्योहिंᳫ
सन्तम्पृथिव्याःसधस्थादग्निम्पुरीष्यमङ्गिरस्वत्त्वन्नामऽं ॥ २८ ॥
अपाम्पृष्ठम् ॥ अपाम्पृष्ठमसियोनिरग्नेःसमुद्रमभितऽपिन्वमानम् ॥
वर्द्धमानोमहाँ२ऽआचपुष्करेदिवोमात्रयावरिम्णाप्रथस्व ॥ २९ ॥
शर्म्मच ॥ शर्म्मचस्थोवर्म्मचस्थोच्छिद्रेबहुलेऽउभे ॥ व्यचस्वती ॥८२॥

संव्वसाथाम्भृतमग्निम्पुरीष्यम् ॥ ३० ॥ संव्वसाथाम् ॥ संव्वसाथाꣳ
स्वर्व्विदासमीचीऽउरसात्मना ॥ अग्निमन्तर्ब्भरिष्यन्तीज्ज्योति
ष्मन्तमजस्रमित् ॥३१॥ पुरीष्योसि । विश्वभराऽअथर्व्वात्वाप्र
थमोनिरमन्थदग्ने ॥ त्वामग्नेपुष्कराद्ध्यथर्व्वानिरमन्थत ॥ मू
र्द्ध्नोविश्वस्यवाघतः ॥ ३२ ॥ तमुत्त्वा । दध्यङ्ङृषिःपुत्रऽईधेऽअथ
र्व्वणः ॥ वृत्रहणम्पुरन्दरम् ॥ ३३ ॥ तमुत्त्वा । पाथ्योवृषासमीधे
दस्युहन्तमम् ॥ धनञ्जयꣳरणेरणे ॥३४॥ सीदहोतः ॥ सीदहोतः

ग्रंहि. स्वऽउंलोकेचिकित्वान्त्सादयायज्ञꣳसुकृतस्ययोनौ ॥ देवावीर्देवा पृ. अ.
॥८३॥ न्हविषायजास्यग्नेबृहद्यजमानेवयोधाः ॥३५॥ निहोता। होतृष ॥११॥
दनेविदानस्त्वेषोदीदिवाँ२ऽअसदत्सुदक्षः ॥ अदब्धव्रतप्रमतिर्व्व
सिष्ठःसहस्रम्भरःशुचिजिह्वोऽअग्निः ॥ ३६ ॥ सꣳसीदस्वमहाँ२
ऽअसिशोचस्वदेववीतमः ॥ विधूममग्नेऽअरुषम्मियेध्यसृजप्प्रशस्त
दर्शतम् ॥ ३७ ॥ [१०] अपोदेवीः ॥ अपोदेवीरुपसृजमधुमतीर ॥८३॥
यक्ष्मायप्प्रजाब्भ्यः ॥ तासामास्थानादुज्जिहतामोषधयःसुपिप्प

लाः ॥ ३८ ॥ सन्ते । वायुर्म्मातरिश्वादधातूत्तानायाहृदयंयद्विकं
स्तम् ॥ योदेवानाञ्चरसिप्प्राणथेनकस्म्मैदेववषडस्तुतुभ्यम् ॥३९॥
सुजातोज्ज्योतिषा । सहशर्म्मवरूथमासदत्स्वः ॥ वासोऽअग्नेवि
श्वरूपꣳसंव्ययस्वविभावसो ॥४०॥ उदुतिष्ठ । स्वध्वरावानोदेव्या
धिया ॥ दृशेचभासाबृहतासुशुक्क्वनिराग्ग्नेयाहिसुशस्तिभिः ॥४१॥
ऊर्द्ध्वऽऊषुणः ॥ ऊर्द्ध्वऽऊषुणऽऊतयेतिष्ठादेवोनसविता ॥ ऊर्द्ध्वोवाज
स्यसनितायदञ्जिभिर्व्वाघद्भिर्व्विह्वयामहे ॥४२॥ सजातः ॥ सजातो

वंदि. ॥८४॥ गर्ब्भोऽअसिरोदस्योरग्ग्नेचारुर्व्विभृतऽओषधीषु ॥ चित्रःशिशुःपरि पृ. अ.
तमाᳬंस्यक्तून्प्रमातृब्भ्योऽअधिकनिक्क्रदज्जाः ॥४३॥ स्थिरोभव । ॥११॥
वीड्वङ्गऽआशुर्भववाज्यर्व्वन् ॥ पृथुर्भवसुषदस्त्वमग्ग्नेःपुरीषवाह
णः ॥४४॥ शिवोभव । प्रजाब्भ्योमानुषीब्भ्यस्त्वमङ्गिरः ॥ माद्या
वापृथिवीऽअभिशोचीर्म्मान्तरिक्षम्माव्वनस्प्पतीन् ॥ ४५ ॥ प्रैतु ॥
वाजीकनिक्क्रदन्नानदद्रासभःपत्त्वा ॥ भरन्नग्ग्निम्पुरीष्यम्मापाद्यायु
षःपुरा ॥ वृषाग्ग्निंव्वृषणम्भरन्नपाङ्गर्ब्भᳬंसमुद्रियम् ॥ अग्नऽआयाᳬं ॥८४॥

हिव्वीतये ॥ ४६ ॥ ऋतꣳसत्यमृतꣳसत्यमग्निम्पुरीष्यमङ्गिरस्व
द्भरामः ॥ ओषधयःप्प्रतिमोदध्वमग्निमेतꣳशिवमायन्तमभ्यत्रयु
ष्माः ॥ व्यस्यन्विश्वाऽअनिराऽअमीवानिषीदन्नोऽअपदुर्म्मतिञ्ज
हि ॥ ४७ ॥ ओषधयःप्प्रति ॥ ओषधयःप्प्रतिगृभ्णीतपुष्पवतीःसु
पिप्पलाः ॥ अयंव्वोगर्भऽऋत्त्वियःप्प्रत्नꣳसधस्थमासदत् ॥ ४८ ॥
व्विपाजसा ॥ पृथुनाशोशुचानोबाधस्वद्विषोरक्षसोऽअमीवाः ॥ सुश
र्म्मणोबृहतःशर्म्मणिस्यामग्नेरहꣳसुहवस्यप्प्रणीतौ ॥ ४९ ॥ [१२]

वंहि. आपोहि । ष्ठामयोभुवस्तानऽऊर्जेदधातन ॥ महेरणायचक्षसे ॥५०॥ पृ. अ.
॥८५॥ योवः । शिवतमोरसस्तस्यभाजयतेहनः ॥ उशतीरिवमातरः ॥५१॥ ॥११॥
तस्म्माऽअरम् ॥ तस्म्माऽअरङ्गमामवोयस्स्यक्षयायजिन्न्वथ ॥ आपो
जनयथाचनः ॥ ५२ ॥ मित्रःसꣳसृज्ज्य ॥ पृथिवीम्भूमिञ्चज्ज्योति
षासह ॥ सुजातञ्जातवेदसमयक्ष्मायत्त्वासꣳसृजामिप्प्रजाब्भ्यः
॥५३॥ रुद्राःसꣳसृज्ज्य । पृथिवीम्बृहज्ज्योतिःसमीधिरे ॥ तेषाम्भा
नुरजस्स्रऽइच्छुक्क्रोदेवेषुरोचते ॥५४॥ सꣳसृष्टांवसुभिः ॥ सꣳसृष्टां ॥८५॥

वसुंभीरुद्रैर्द्दीरैं ऽकर्म्मण्ण्याम्मृदम् ॥ हस्ताब्भ्याम्मृद्धीङ्कृत्त्वासिनीवा
लीकृणोतुताम् ॥ ५५ ॥ सिनीवालीसुकपर्द्दा । सुकुरीरस्वौपशा ॥ सा
तुब्भ्यमदितेमह्योखान्दधातुहस्तयोः ॥ ५६ ॥ उखाङ्कृणोतु । श
क्त्याबाहुब्भ्यामदितिर्द्धिया ॥ मातापुत्रंरुयथोपस्त्थेसाग्निम्बिभर्त्तु
गर्ब्भऽआ ॥ मखस्यशिरोसि ॥ ५७ ॥ वसवस्त्वा । कृण्ण्वन्तुगाय
त्रेणच्छन्दसाङ्गिरस्वद्ध्रुवासिपृथिव्व्यसिधारयामयिप्प्रजाᳬरायस्प्पो
षङ्गौपत्त्यᳬसुवीर्य्यᳬसजातान्न्यजमानायरुद्रास्त्वाकृण्ण्वन्तुत्रैष्टुभे

नुच्छन्दसाङ्गिरुस्वद्ध्रुवास्यन्तरिक्षमसिधारयामयिंप्प्रजाꣳ रायस्पो
षङ्गौपुत्त्यꣳ सुवीर्य्यꣳ सजातान्न्यजमानायादित्त्यास्त्वाकृण्ण्वन्तुजा
गतेनुच्छन्दसाङ्गिरुस्वद्ध्रुवासिद्यौरसिधारयामयिंप्प्रजाꣳ रायस्पोष
ङ्गौपुत्त्यꣳ सुवीर्य्यꣳ सजातान्न्यजमानायुविश्वेत्त्वादेवावैश्वानराः
कृण्ण्वन्त्वानुष्टुभेनुच्छन्दसाङ्गिरुस्वद्ध्रुवासिदिशोसिधारयामयिंप्प्र
जाꣳ रायस्पोषङ्गौपुत्यꣳ सुवीर्य्यꣳ सजातान्न्यजमानाय ॥ ५८ ॥
अदित्त्यैरास्ना ॥ अदित्त्यैरास्नास्यदितिष्टेबिलङ्गृभ्णातु । कृत्त्वायसा ॥८६॥

मुहीमुखांमृन्मयींयोनिमुग्नये ॥ पुत्रेभ्युंप्प्रायंच्छुदादीतिंश्रप
यानिति ॥ ५९ ॥ व्वसंवस्त्वा । धूपयन्तुगायत्रेणुच्छन्दसाङ्गिरस्वद्रु
द्रास्त्वाधूपयन्तुत्रैष्टुभेनुच्छन्दसाङ्गिरुस्वदादित्यास्त्वाधूपयन्तुजा
गंतेनुच्छन्दसाङ्गिरुस्वद्विश्श्वेत्वादेवाव्वैश्श्वानुराधूपयन्त्वानुष्टुभेनुच्छ
न्दसाङ्गिरुस्वदिन्द्रस्त्वाधूपयतुव्वरुणस्त्वाधूपयतुव्विष्णुस्त्वाधूपयतु
॥ ६० ॥ [११] अदितिष्ट्वा । देवीव्विश्श्वदेव्यावतीपृथिव्याःसध
स्थेऽअङ्गिरस्वत्खनत्ववटदेवानान्त्वापत्नीर्द्देवीर्व्विश्श्वदेव्यावती ंपृ

मा०सं०
॥८७॥ थिव्याः सधस्थे ऽ अङ्गिरस्वद्दधतूखे धिषणास्त्वा देवीर्विश्वदेव्याव पू.अ.
तीः पृथिव्याः सधस्थे ऽ अङ्गिरस्वदभीन्धतामुखे वरूत्रीष्ट्वा देवीर्वि ।११।
श्वदेव्यावतीः पृथिव्याः सधस्थे ऽ अङ्गिरस्वच्छ्रपयन्तूखे ग्नास्त्वा दे
वीर्विश्वदेव्यावतीः पृथिव्याः सधस्थे ऽ अङ्गिरस्वत्पचन्तूखे जनय
स्त्वाच्छिन्नपत्रा देवीर्विश्वदेव्यावतीः पृथिव्याः सधस्थे ऽ अङ्गिरस्व
त्पचन्तूखे ॥ ६१ ॥ मित्रस्य चर्षणीधृतः ॥ मित्रस्य चर्षणीधृतोऽवो दे
वस्य सानसि ॥ द्युम्नं चित्रश्रवस्तमम् ॥ ६२ ॥ देवस्त्वा । सवितोद्व ॥८७॥

पतुसुपाणिःस्वङ्गुरिःसुबाहुरुतशक्वर्या ॥ अव्यथमानापृथिव्यामा
शादिशुऽआपृण ॥ ६३ ॥ उत्थायबृहती । भवोदुतिष्ठध्रुवात्वम् ॥
मित्रैतान्तंऽउखाम्परिददाम्म्यभित्त्याऽएषामाभेदि ॥ ६४ ॥ वसं
वस्त्वा ॥ च्छृन्दन्तुगायत्रेणच्छन्दसाङ्गिरस्वद्रुद्रास्त्वाच्छृन्दन्तु
त्रैष्टुभेनच्छन्दसाङ्गिरस्वदादित्यास्त्वाच्छृन्दन्तुजागतेनच्छन्दसा
ङ्गिरस्वद्विश्वेत्वादेवाव्वैश्वानराऽआच्छृन्दन्त्वानुष्टुभेनच्छन्दसाङ्गिर
स्वत् ॥६५॥ [५] आकूतिमग्निम् ॥ आकूतिमग्निम्प्रयुजꣳस्वा

संहि. हामनोमेधामग्निम्प्रयुजꣳस्वाहाचित्तंव्विज्ञातमग्निम्प्रयुजꣳस्वा पू. अ.

॥८८॥ हावाचोव्विधृतिमग्निम्प्रयुजꣳस्वाहाप्रजापतयेमनवेस्वाहाग्नयेवै ॥११॥

श्वानरायस्वाहा ॥ ६६ ॥ व्विश्वोदेवस्य । नेतुर्म्मर्त्तोव्वुरीतसख्यम् ॥

व्विश्वोरायऽइषुध्यतिद्युम्नंव्वृणीतपुष्यसेस्वाहा ॥ ६७ ॥ मासु । भि

त्थामासुरिषोम्बधृष्णुव्वीरयस्वसु ॥ अग्निश्चेदङ्करिष्यथः ॥ ६८ ॥

दृꣳहस्वदेवि । पृथिविस्वस्तयऽआसुरीमायास्वधयाकृतासि ॥ जु

ष्टन्देवेब्भ्यऽइदमस्तुहव्यमरिष्टात्वमुदिहियज्ञेऽअस्मिन् ॥ ६९ ॥ ॥८८॥

द्व॒न्नꣳस॒र्प्पिरा॑सुतिꣳप्र॒त्नोहोता॒व्वरे॑ण्यꣳ ॥ सह॑सस्पु॒त्रोऽअद्भु॑तꣳ
॥ ७० ॥ शतम् ॥ ५०० ॥ पर॑स्या॒ऽअधि॑ । सं॒व्वतोव॑राँ२ऽअ॒भ्यातर ॥
य॒त्रा॒हमस्मि॒ताँ२ऽअ॑व ॥ ७१ ॥ प॒रमस्या॑ꣳपरा॒वतः॑ ॥ प॒रमस्याꣳ
परा॒वतो॑रो॒हिद॑श्वऽइ॒हाग॑हि ॥ पु॒री॒ष्यः॑पु॒रुप्प्रि॒योग्ने॒त्वन्त॑रा॒मृधः॑
॥ ७२ ॥ यद॑ग्ने । यद॑ग्ने॒कानि॒कानि॑चि॒दाते॒दारू॑णिद॒ध्मसि॑ ॥
सर्व्व॒न्तद॑स्तुते घृ॒तन्तज्जु॑षस्वयविष्ठ्य ॥ ७३ ॥ यदत्ति॑ ॥ यद॒त्त्यु॑पजि
ह्वि॑का॒यद्व॒म्म्रोऽअ॑ति॒सर्प्प॑ति ॥ सर्व्व॒न्तद॑स्तुते घृ॒तन्तज्जु॑षस्वयविष्ठ्य

मां.इ. ॥ ७४ ॥ अहरहरप्प्रयावम् ॥ अहरहरप्प्रयावम्भरन्तोश्वायेवतिष्ठते पू. ॥
॥८९॥ घासमस्म्मै ॥ रायस्पोषेणसमिषामदन्तोग्नेमातेप्प्रतिवेशारिषाम ॥११॥
॥ ७५ ॥ नाभापृथिव्याः । संमिधानेऽअग्नौरायस्पोषायबृहतेह
वामहे ॥ इरम्मदम्बृहदुक्थंय्यजत्रञ्जेतारमग्निम्पृतनासुसासहिम्
॥७६॥ याःसेनाꣳ ॥ याःसेनाऽअभीत्वरीराव्याधिनीरुगणाऽउत ॥
येस्तेनायेचतस्करास्तांस्तेऽअग्नेपिदधाम्म्यास्ये ॥७७॥ दꣳष्ट्रा
भ्यामलिम्म्लून् ॥ दꣳष्ट्राभ्याम्मलिम्म्लुञ्जम्भ्यैस्तस्कराँ२उत ॥ ॥८९।

हनुभ्याᳫंस्तेनान्भगवस्ताँस्त्वङ्खादसुखादितान् ॥ ७८ ॥ येजनेषु ।
मलिम्लवस्तेनासस्तस्करावने ॥ येकक्षेष्वघायवस्ताँस्तेदधामिज
म्भयोः ॥ ७९ ॥ योऽअस्म्मभ्यम् ॥ योऽअस्म्मभ्यमरातीयाद्यश्च
नोद्वेषतेजनः ॥ निन्दाद्योऽअस्म्मान्धिप्प्साच्चसर्वन्तम्मस्म्मसा
कुरु ॥ ८० ॥ सᳫंशितम्मे ॥ सᳫंशितम्मेब्रह्मसᳫंशितंवीर्य्यम्बलम् ॥
सᳫंशितङ्क्षत्रञ्जिष्णुयस्याहमस्म्मिम्पुरोहितः ॥ ८१ ॥ उदेषाम् ॥
उदेषाम्बाहूऽअतिरमुद्वर्च्चोऽअथोबलम् ॥ क्षिणोमिब्रह्मणामित्रानुन्न

यामिस्वाँ२ऽअहम् ॥८२॥ अन्नपतेन्नस्य । नोदेह्यनमीवस्यशुष्मिम पृ. अ

णः ॥ प्रप्रंदातारन्तारिषऽऊर्ज्जन्नोधेहिद्विपदेचतुष्पदे ॥ ८३ ॥ ॥१२॥

[१८] इति श्रीवाजसनेयसंहितायां एकादशोऽध्यायः ॥ ११ ॥

अथानुवाकसूत्रम् । दृशानः सप्तदश दिवस्परिद्वादश सामिधा

ग्निंपञ्चदशापेतसप्तदशासुन्वन्तंत्रयोदश याओषधीसप्तविꣳशतिर्मा

माषोडश सप्त सप्तदशाꣳशतम् ॥ हरिः ॐ दृशानोरुक्मः ॥ दृशानो

रुक्मऽउर्व्याव्ध्यंद्यौर्हुर्म्मर्षमायुःश्रियेरुचानः ॥ अग्निरमृतोऽअभव ॥९०॥

र्व्वयोभिर्य्यदेनन्द्यौरजनयत्सुरेताः ॥ १ ॥ नक्तोषासासमनसा । वि
रूपेधापयेतेशिशुमेकꣳसमीची ॥ द्यावाक्षामारुक्मोऽअन्तर्व्विभाति
देवाऽअग्निन्धारयन्द्द्रविणोदाः ॥ २ ॥ विश्वारूपाणि ॥ विश्वारूपा
णिप्प्रतिमुञ्चतेकविः प्प्रासावीद्भद्रन्द्विपदेचतुष्पदे ॥ विनाकमख्य
त्सवितावरेण्योनुप्प्रयाणमुषसोविराजति ॥ ३ ॥ सुपर्णोसि ॥ गरु
त्माँस्त्रिवृत्तेशिरोगायत्रञ्चक्षुर्बृहद्रथन्तरेपक्षौ ॥ स्तोमऽआत्माच्छ
न्दाꣳस्यङ्गानियजूꣳषिनाम ॥ सामतेतनूर्व्वामदेव्यंयज्ञायज्ञियम्पु

च्छन्धिष्ण्याᳵशफाः ॥ सुपर्णोऽसिगरुत्मान्दिवङ्गच्छस्वः पत ॥ ४ ॥
व्विष्णोᳵक्रमः ॥ व्विष्णोᳵक्रमोऽसिसपत्नहागायत्त्रञ्छन्दऽआरो
हप्पृथिवीमनुविक्रमस्वव्विष्णोᳵक्रमोऽस्यभिमातिहात्त्रैष्टुभञ्छन्दऽ
आरोहान्तरिक्षमनुविक्रमस्वव्विष्णोᳵक्रमोऽस्यरातीयतोहन्ताजाग
तञ्छन्दऽआरोहदिवमनुविक्रमस्वव्विष्णोᳵक्रमोऽसिशत्त्रूयतोहन्ता
नुष्टुभञ्छन्दऽआरोहदिशोनुविक्रमस्व ॥ ५ ॥ अक्रन्ददग्निः ॥
अक्रन्ददग्निस्तनयन्निवद्यौःक्षामारेरिहद्वीरुधः समञ्जन् ॥ सद्योज

ज्ज्ञानोव्विहीमिद्धोऽअकख्यदारोदसीभानुनाभात्युन्तः ॥ ६ ॥ अग्ग्ने
ब्भ्यावर्त्तिन् ॥ अग्ग्नेब्भ्यावर्त्तिन्नभिमानिवर्तस्वायुषाव्वर्च्चसाप्प्रजया
धनेन ॥ सन्न्यामेधयारय्यापोषेण ॥७॥ अग्ग्नेऽअङ्गिरः । शतन्तेस
न्त्वावृतः सहस्रन्तऽउपावृतः ॥ अधापोषस्यपोषेणपुनर्न्नोनष्टमाकृ
धिपुनर्न्नोरयिमाकृधि ॥८॥ पुनरूर्ज्जा । न्निवर्त्तस्वपुनरग्ग्नऽइषायुषा ॥
पुनर्न्नःपाह्यꣳहसः ॥९॥ सहरय्या । निवर्त्तस्वाग्ग्नेपिन्न्वस्वधारया ॥
व्विश्श्वप्प्स्न्याव्विश्श्वतस्परि ॥ १० ॥ आत्त्वा । हार्षमन्तरभूर्द्ध्रुवस्ति

संहि. ष्ठाविंचाचलिᳪं ॥ व्विशस्त्वासर्व्वाव्वाञ्छन्तुमात्वद्द्राष्ट्रमधिब्भ्रशत् पृ. अ.

॥१२॥ ॥ ११ ॥ उदुत्तमम् ॥ उदुत्तमंव्वरुणपाशमस्म्मदवाधमंव्विमध्य ॥१२॥

म ᳪं श्रथाय ॥ अथाव्वयमादित्यव्व्रतेतवानागसोऽअदितयेस्याम

॥ १२ ॥ अग्ग्रेबृहन् ॥ अग्ग्रेबृहन्नुषसामूर्द्ध्वोऽअस्त्थान्निर्ज्जगन्वा

न्तमसोज्ज्योतिषागात् ॥ अग्निर्भानुनारुशताम्स्वङ्गऽआजातोव्वि

श्वासद्मान्यप्प्राᳪं ॥ १३ ॥ हᳪंसःशुचिषत् ॥ हᳪंसःशुचिष

द्वसुरन्तरिक्षसद्धोतावेदिषदतिथिर्द्दुरोणसत् ॥ नृषद्वरसदृतसद्व्योमं ॥१२॥

सदब्जागोजाऽऋतजाऽअद्रिजाऽऋतंबृहत् ॥ १४ ॥ सीदत्त्वम् ॥
सीदत्त्वम्मातुरस्याऽउपस्थेविश्वान्यग्नेवयुनानिविद्वान् ॥ मैना
न्तपसामार्चिषाभिशोचीरन्तरस्याꣳशुक्रज्ज्योतिर्विभाहि ॥ १५ ॥
अन्तरग्ने । रुचात्त्वमुखायाऽंसदनेस्वे ॥ तस्यास्त्वꣳहरसातपञ्जात
वेदःशिवोभव ॥१६॥ शिवोभूत्वा । मह्यमग्नेअथोसीदशिवस्त्वम् ॥
शिवाःकृत्वादिशःसर्वाःस्वंयोनिमिहासदः ॥ १७ ॥ [१७]
दिवस्परि । प्रथमञ्जज्ञेऽअग्निरस्माद्द्वितीयम्परिजातवेदाः ॥ तृतीयं

मप्सुनृमणाऽअजस्त्रमिन्धानऽएनञ्जरतेस्वाधीः ॥ १८ ॥ विद्माते ।
ऽअग्नेत्रेधात्रयाणिविद्मातेधामविभृतापुरुत्रा ॥ विद्मातेनामपरम
ङ्गुहायद्विद्मातमुत्सँयतऽआजगन्थ ॥ १९ ॥ समुद्रेत्वा । नृमणाऽ
अप्स्वन्तर्नृचक्षाऽईधेदिवोऽअग्नऽऊधन् ॥ तृतीयेत्वारजसित
स्थिवाꣳसमपामुपस्थेमहिषाऽअवर्द्धन् ॥ २० ॥ अक्रन्ददग्निः ॥
अक्रन्ददग्निस्तनयन्निवद्यौःक्षामारेरिहद्वीरुधःसमञ्जन् ॥ सद्योज
ज्ञानोविहीमिद्धोऽअख्यदारोदसीभानुनाभात्यन्तः ॥ २१ ॥ श्री ॥१९३॥

णामुदारः ॥ श्रीणामुदारोधरुणोरयीणाम्मनीषाणाम्प्रार्पणःसोमं
गोपाः ॥ वसुःसूनुःसहसोऽअप्सुराजाविभात्यग्रेऽउषसामिधा
नः ॥ २२ ॥ विश्वस्यकेतुः ॥ विश्वस्यकेतुर्भुवनस्यगर्भऽआरोद
सीऽअपृणाज्जायमानः ॥ वीडुञ्चिदद्रिमभिनत्परायञ्जनायदग्निम
यजन्तपञ्च ॥ २३ ॥ उशिक्पावकः ॥ उशिक्पावकोऽअरतिःसुमे
धामर्तेष्वग्निरमृतोनिधायि ॥ इयर्तिधूममरुषम्भरिभ्रदुच्छुक्रेण
शोचिषाद्यामिनक्षन् ॥ २४ ॥ दृशानोरुक्मः ॥ दृशानोरुक्मऽउ

संहि. पु. अ.

॥९४॥ ॥१२॥

ह्व्यांह्व्यंद्यौहृदुम्मर्षमायुः श्रियेरुचानः ॥ अग्निरमृतोऽअभवद्वयोभि

र्यदेनन्द्यौरजनयत्सुरेताः ॥ २५ ॥ यस्ते । ऽअद्यकृणवद्भद्रशोचेपू

पन्देवघृतवन्तमग्ने ॥ प्रतन्नयप्प्रतरंवस्योऽअच्छाभिसुम्नन्देवभ

क्तंयविष्ठ ॥ २६ ॥ आतम् ॥ आतम्भजसौश्रवसेष्वग्नऽउक्थऽउ

क्थऽआभजशस्यमाने ॥ प्प्रियःसूर्य्येप्प्रियोऽअग्नाभवात्युज्जाते

नभिनदुदुज्जानित्वैः ॥ २७ ॥ त्वामग्ने ॥ त्वामग्नेयजमानाऽअनु

द्यून्विश्वावसुदधिरेवार्य्याणि ॥ त्वयासहद्द्रविणमिच्छमानाव्व्रजङ्गो ॥९४॥

मंन्तमुशिजोविवंबुः ॥२८॥ अस्तांव्यग्निः ॥ अस्ताव्युग्निर्न्नराꣳ

सुशेवोवैश्वानुरऽऋषिभिःसोमंगोपाः ॥ अद्वेषेद्यावापृथिवीहुवेमुदे

वांधत्तरायिमुस्मेसुवीरंम् ॥२९॥ [१२] समिधाग्निम् ॥ समिधा

ग्निन्दुवस्यतघृतैर्बोधयुतातिथिम् ॥ आस्मिन्हुव्याजुहोतन ॥३०॥

उदुत्त्वा ॥ उदुत्त्वाविश्वेदेवाऽअग्नेभरन्तुचित्तिभिः ॥ सनोभवशिव

स्त्वꣳसुप्प्रतींकोविभावंसुः ॥३१॥ प्रेत् ॥ प्रेदग्नेज्ज्योतिष्म्यान्याहि

शिवेभिरर्चिभिष्ट्वम् ॥ बृहद्भिर्भानुभिर्भासन्माहिꣳसीस्तन्वाप्प्र

संहि. जाः ॥३२॥ अक्रन्ददग्निः ॥ अक्रन्ददग्निस्तनयन्निवद्यौःक्षामारेरि पू. अ.
॥९५॥ हद्वीरुधः समञ्जन् ॥ सद्योजज्ञानोविहीमिद्धोऽअख्यदारोदसीभा ॥१२॥
नुनाभात्यन्तः ॥३३॥ प्रप्रायम् ॥ प्रप्रायमग्निर्भरतस्यशृण्वेविय
त्सूर्योनरोचतेबृहद्भाः ॥ अभियःपूरुम्पृतनासुतस्थौदीदायदैव्योऽ
अतिथिꣳशिवोनः ॥ ३४ ॥ आपोदेवीꣳ ॥ आपोदेवीꣳप्रतिगृभ्णी
तभस्मैतत्स्योनेकृणुध्वꣳसुरभाऽउलोके ॥ तस्मैनमन्ताञ्जनयꣳसु
पत्नीम्मातेवपुत्रम्बिभृताप्स्वेनत् ॥ ३५ ॥ अप्स्वग्ने ॥ अप्स्वग्ने ॥९५॥

सधिष्ठ्वसौषधीरनुरुध्यसे ॥ गर्भेसञ्जायसेपुनः ॥ ३६ ॥ गर्भोऽ
असि ॥ गर्भोऽअस्योषधीनाङ्गर्भोवनस्पतीनाम् ॥ गर्भोविश्श्व
स्यभूतस्याग्ग्नेगर्भोऽअपामसि ॥ ३७॥ प्रसद्यभस्म्मना ॥ प्रसद्य
भस्म्मनायोनिमुपश्श्चपृथिवीमग्ग्ने ॥ सꣳसृज्ज्यमातृभिष्ट्वञ्ज्योति
ष्म्मान्पुनरासदः ॥ ३८ ॥ पुनरासद्य । पुनरासद्यसदनमुपश्श्चपृथि
वीमग्ग्ने ॥ शेषेमातुर्य्यथोपस्त्थेन्तरस्याꣳशिवतमः ॥ ३९ ॥ पुन
रूर्ज्जा । निवर्त्तस्वपुनरग्ग्नऽइषायुषा ॥ पुनर्न्नःपाहयꣳहसः ॥४०॥

संहि. सहरुष्या । निर्वर्त्तस्वाग्नेपिन्वस्वधारया ॥ विश्वप्प्स्न्याविश्वतस्प्प पू. अ.
॥९६॥ रि ॥४१॥ बोधामे । ऽअस्यवचसोयविष्ठमꣳहिष्ठस्यप्प्रभृतस्यस्वधा ॥१२॥
वꣳ ॥ पीयतित्वोऽअनुत्वोगृणातिवन्दारुष्टेतन्वंवन्देऽअग्ने ॥४२॥
सबोधि । सूरिर्म्मघवावसुपतेवसुदावन् ॥ युयोध्यस्म्मद्द्वेषाꣳसिवि
श्वकर्म्मणेस्वाहा ॥४३॥ पुनस्त्वा । दित्यारुद्रावसवꣳसमिन्धता
म्पुनर्ब्रह्माणोवसुनीथयज्ञैः ॥ घृतेनत्वन्तन्वंवर्द्धयस्वसत्याःसन्तु ॥९६॥
यजमानस्यकामाꣳ ॥ ४४ ॥ [१५] अपेत ॥ अपेतवीतविचसर्प्पता

तोयेत्रस्त्थपुराणायेचनूतनाः ॥ अदाद्युमोवुसानम्पृथिव्याऽअक्रन्निमम्पितरोलोकमस्म्मै ॥४५॥ सुँज्ञानंमसि । कामधरंणम्मयितेकामधरंणम्भूयात् ॥ अग्ग्नेर्भस्म्मास्यग्ग्नेःपुरीषमसिचितस्त्थपरिचितऽऊर्द्ध्वचितःश्रयद्ध्वम् ॥ ४६ ॥ अयꣳसः ॥ अयꣳसोऽअग्ग्निर्य्यस्म्मिन्त्सोममिन्द्रःसुतन्दधेजठरेव्वावशानः ॥ सहस्रियम्व्वाजमत्त्यन्नसप्तिꣳससवान्त्सन्स्तूयसेजातवेदः ॥ ४७ ॥ अग्ग्नेयत् ॥ अग्ग्नेयत्तेदिविव्वर्च्चःपृथिव्व्यांय्यदोषधीष्ष्वप्प्स्वायजत्र ॥ येनान्तरिक्षमुर्व्वा

संहि.

॥९७ ततन्थत्त्वेषꣳसम्भानुरर्ण्णवोनृचक्षाः ॥ ४८ ॥ अग्नेदिवः ॥ अग्नेदि पू. अ.

वोऽअर्ण्णमच्छाजिगास्यच्छादेवाँ२॥ऽऊँचिषेधिष्ण्यासे ॥ यारो ॥१२॥

चनेपरस्तात्सूर्य्यस्ययाश्चावस्तादुपतिष्ठन्तऽआपः ॥ ४९ ॥ पुरी

ष्यासोऽअग्नयः । प्रावणेभिःसजोषसः ॥ जुषन्ताँय्यज्ञमद्रुहो

नमीवाऽइषोमहीः ॥ ५० ॥ इडामग्ने । पुरुदꣳसꣳसनिङ्गोःशश्वत्त

मꣳहवमानायसाध ॥ स्यान्नःसूनुस्तनयोविजावाग्नेसातेसुमति ॥९७॥

र्ब्भूत्त्वस्मे ॥५१॥ अयन्ते ॥ अयन्तेयोनिर्ऋत्वियोयतोजातोऽअरो

२४२

चथाꣳ ॥ तज्ञानन्नंग्मुऽआरोहाथांनोवर्द्धयारयिम् ॥ ५२ ॥ चिदसि ॥
चिदसितयादेवतयाङ्गिरस्वद्ध्रुवासीदपरिचिदसितयादेवतयाङ्गिरस्व
द्ध्रुवासीद ॥५३॥ लोकम्पृण । च्छिद्रम्पृणाथोसीदद्ध्रुवात्त्वम् ॥ इन्द्रा
ग्नीत्त्वाबृहस्पतिरस्मिन्नन्योनावसीषदन् ॥ ५४ ॥ ताऽअस्य । सू
ददोहसꣳसोमꣳश्रीणन्तिपृश्नयꣳ ॥ जन्मन्देवानांविशस्त्रिष्वारो
चनेदिवः ॥ ५५ ॥ इन्द्रंविश्वाः ॥ इन्द्रंविश्वाऽअवीवृधन्त्समुद्रव्य
चसङ्गिरः ॥ रथीतमꣳरथीनांवाजानाꣳसत्पतिम्पतिम् ॥ ५६ ॥ स

संहि. मितम् ॥ समितꣳसङ्कल्पेथाꣳसम्प्रियौरोचिष्णूसुमनस्यमानौ ॥ पू. अ.
।१८।। इषमूर्जमभिसंवसानौ ॥५७॥ संवाम् ॥ संवाम्मनाꣳसिसंव्रतास ॥१२॥
मुचित्तान्याकरम् ॥ अग्नेपुरीष्याधिपाभवत्त्वन्नऽइषमूर्जँय्यजमा
नायधेहि ॥ ५८ ॥ अग्नेत्त्वम् ॥ अग्नेत्त्वम्पुरीष्योरयिमान्पुष्टि
माँ२ऽअसि॥ शिवाःकृत्त्वादिशःसर्वाःस्वँय्योनिमिहासदः ॥५९॥
भवतन्नः ॥ भवतन्नःसमनसौसचेतसावरेपसौ ॥ मायज्ञꣳहिꣳसिष्ट
म्मायज्ञपतिञ्जातवेदसौशिवौभवतमद्यनः ॥ ६० ॥ मातेवपुत्रम् ॥ ॥१८॥

मातेवपुत्रम्पृथिवीपुरीष्यमग्निꣳस्वेयोनावभारुखा ॥ तांविश्वैर्देवै

ऋतुभिः संविदानः प्रजापतिर्विश्वकर्म्माविमुञ्चतु ॥ ६१ ॥ [१७]

असुन्वन्तमयजमानम् ॥ असुन्वन्तमयजमानमिच्छस्तेनस्येत्या

मन्विहितस्करस्य ॥ अन्यमस्मदिच्छसातऽइत्त्यानमोदेविनिर्ऋ

तेतुभ्यमस्तु ॥ ६२ ॥ नमꣳसुतेनिर्ऋतेतिग्मतेजोयस्मयंविचृताब

न्धमेतम् ॥ यमेनत्त्वंयम्म्यासंविदानोत्तमेनाकेऽअधिरोहयैनम्

॥ ६३ ॥ यस्यास्ते । घोरऽआसञ्जुहोम्म्येषाम्बन्धानामवसर्ज्जनाय

॥ सान्त्वाजनोभूमिरितिप्प्रमर्द्द • तेनिर्ऋतिन्त्वाहम्परिवेदाविश्वतः
॥ ६४ ॥ यन्तेदेवीनिर्ऋतिराबबन्धपाशङ्ग्रीवास्वविचृत्त्यम् ॥ तन्तेविष्
ष्याम्म्यायुषोनमद्ध्यादथैतामिपतुमद्धिप्प्रसूतः ॥ नमोभूत्त्यैयेदञ्च
कार ॥ ६५ ॥ निवेशनःसङ्गमनः ॥ निवेशनःसङ्गमनोवसूनांविश्वा
रूपाभिचष्टेशचीभिः ॥ देवऽइवसवितासत्त्यधर्म्मेन्द्रोनतस्त्थौसमरे
पथीनाम् ॥ ६६ ॥ सीरायुञ्जन्ति । कवयोयुगाव्वितन्वतेपृथक् ॥ धीरा
देवेषुसुम्नया ॥ ६७ ॥ युनक्तसीरा ॥ युनक्तसीराव्वियुगातनुद्ध्वङ्कृते ॥९९॥

सोनौंव्वपतेहबीजम् ॥ गिराचंश्श्रुष्टिःसभंराऽअसंन्नोनेदीयुऽइन्त्सृ
ण्य्ःपृक्कमेयात् ॥ ६८ ॥ शुनह्ःसु । फालुाव्विकृषन्तुभूमिंह्शुनङ्कीं
नाशांऽअभियन्तुव्वाहैः ॥ शुनांसीराहुविषातोशंमानासुपिप्पलाऽ
ओषधीःकर्त्तनास्म्मे ॥ ६९ ॥ घृतेनुसीतां ॥ घृतेनुसीतामधुनासमं
ज्ज्यतांव्विश्श्वैर्द्देवैरनुमतामुरुद्भिः ॥ ऊर्ज्जस्वतीपयंसापिन्न्वमानास्म्मा
न्त्सीतेपयंसाभ्भ्यावंवृत्स्व ॥ ७० ॥ लाङ्गंलम्पवीरवत् ॥ लाङ्गंलम्प
वीरवत्त्सुशेवंह्सोमुपित्सरु ॥ तदुद्वपतिगामविंम्प्रफर्व्यञ्चपीवंरीम्प्र

स्त्थावंद्रथवाहंणम् ॥ ७१ ॥ कामंङ्कामदुघे । धुक्ष्वमित्रायवरुणाय
च ॥ इन्द्रायाश्विभ्यांम्पूष्णेप्रजाभ्युऽओषधीभ्यः ॥ ७२ ॥ वि
मुञ्चयद्ध्वम् ॥ विमुंञ्चयद्ध्वमघ्न्यादेवयानाऽअगंन्मतमंसस्पारमुस्य ॥
ज्योतिरापाम ॥ ७३ ॥ सजूरब्दः ॥ सजूरब्दोऽअयंवोभिः सजूरुषा
ऽअरुणीभिः ॥ सजोषसावश्विनादꣳसोभिः सजूःसूरऽएतंशेनसजू
र्वैश्वानुरऽइडयाघृतेनुस्वाहा ॥ ७४ ॥ [१३] याऽओषधीः ॥ याऽओ
षधीःपूर्व्वाजातादेवेभ्यस्त्रियुगम्पुरा ॥ मनैनुबभ्रूणामहꣳशतन्धा ॥१००॥

मांनिसप्तच ॥ ७५ ॥ शतंवः ॥ शतंवोऽअम्बधामानिसहस्त्रमुतवो

रुहः ॥ अधाशतक्क्त्वोसूयमिमम्मेऽअगदङ्कृत ॥ ७६ ॥ ओषधीः

प्प्रति । मोदद्ध्वम्पुष्पवतीःप्प्रसूवरीः ॥ अश्वाऽइवसजित्वरीर्वीरुधः

पारयिष्ण्वः ॥ ७७ ॥ ओषधीरिति । मातरस्तद्वोदेवीरुपब्रुवे ॥ सने

यमश्वङ्गांवासऽआत्मानन्तवपूरुष ॥ ७८ ॥ अश्वत्थेवः ॥ अश्वत्थे

वोनिषदंनम्पर्णेवोव्वसतिष्कृता ॥ गोभाजऽइत्किलासथयत्सनवथ

पूरुषम् ॥ ७९ ॥ यत्रौषधीः । समग्मतराजानःसमिताविव ॥ व्वि

ष्प्र॒ꣳस॑ऽउ॒च्च्य॑ते॒भि॒ष॒ग्रक्षो॒हामी॑व॒चात॑नः ॥ ८० ॥ अ॒श्वा॒व॒तीꣳसो॑मा
व॒तीम् ॥ अ॒श्वा॒व॒तीꣳसो॑मा॒व॒ती॑मू॒र्ज्ज॑य॑न्ती॒मु॒दो॑जसम् ॥ आवि॑त्सि
सर्वा॑ऽओष॑धीर॒स्म्माऽअ॑रि॒ष्टता॑तये ॥ ८१ ॥ उच्छु॒ष्मा॑ः ॥ उच्छु
ष्म्मा॒ऽओष॑धीना॒ङ्गावो॑गो॒ष्ठादि॑वेरते ॥ धनꣳ॑सनि॒ष्यन्ती॑नामा॒त्मा
न॒न्तव॑पूरुष ॥८२॥ इष्कृ॑ति॒र्न्नाम॑ । वोमा॒ताथो॑यू॒यꣳस्थ॒निष्कृ॑तीः ॥
सी॒राः॑प॑त॒त्रिणी॑स्थन॒यदा॒मय॑ति॒निष्कृ॑थ ॥ ८३ ॥ अति॒विश्वाः॑ ।
परि॒ष्ठास्ते॑नऽइ॑वव्र॒जम॑क्रमुः ॥ ओष॑धी॒ꣳप्राचु॑च्यवु॒र्य्यत्किञ्च॑त॒न्वो॒ ॥१०१॥

रपः ॥ ८४ ॥ यदिमाः ॥ यदिमावाजयन्नहमोषधीर्हस्तऽआदधे ॥
आत्मायक्ष्मस्यनश्यतिपुराजीवगृभोयथा ॥ ८५ ॥ यस्यौषधीः ।
प्प्रसर्प्पथाङ्गमङ्गम्परुष्पपरुः ॥ ततोयक्ष्मंव्विबाधद्ध्वऽउग्ग्रोमद्ध्यमशी
रिव ॥ ८६ ॥ साकंय्यक्ष्म ॥ साकंय्यक्ष्मप्रपतचाषेणकिकिदीवि
ना ॥ साकंव्वातस्यद्ध्राज्यासाकन्नश्यनिहाकया ॥ ८७ ॥ अन्न्या
वः ॥ अन्न्यावोऽअन्न्यामवत्त्वन्न्यान्न्यस्याऽउपावत ॥ ताःसर्व्वाः सं
विदानाऽइदम्मेप्प्रावतावचः ॥ ८८ ॥ याःफलिनीः ॥ याःफलिनी

संहि.

॥१०२॥ य्याँऽअफलाऽअपुष्पायाश्चपुष्पिणीः ॥ बृहस्प्पतिप्प्रसूतास्तानो पू. अ.

मुञ्चन्त्वꣳहसः ॥ ८९ ॥ मुञ्चन्तुमा । शपत्थ्यादथोव्वरुण्यादुत ॥ अ ॥१२॥

थोयमस्यपड्वीशात्सर्व्वस्म्माद्देवकिल्ब्बिषात् ॥ ९० ॥ अवपतन्तीरव

दन् ॥ अवपतन्तीरवदन्दिवऽओषधयस्प्परि ॥ यञ्जीवमश्नवामहै

नसरिष्ष्यातिपूरुषः ॥ ९१ ॥ याऽओषधीः ॥ याऽओषधीःसोमरा

ज्ञीर्बह्वीःशतविचक्षणाः ॥ तासामसित्वमुत्तमारङ्कामायशꣳहृदे

॥ ९२ ॥ याऽओषधीः ॥ याऽओषधीःसोमराज्ञीर्व्विष्ठिताःपृथिवीम ॥१०२॥

नुं ॥ बृहस्पतिंप्रसूताऽअस्यैसन्दंत्तवीर्र्यम् ॥ ९३ ॥ याश्चे ॥ याश्चे
दमुंपशृण्वन्तियाश्चंदूरम्परांगताः ॥ सर्व्वाः सुङ्गत्त्यंवीरुधोस्यैसन्दंत्त
वीर्र्यम् ॥ ९४ ॥ मावः ॥ मावोंरिषत्त्खनितासस्मैंचाहङ्खनांमिवः ॥
द्विपाच्चतुष्पादस्म्माकः सर्व्वंमस्त्वनातुरम् ॥ ९५ ॥ ओषंधयः सम् ॥
ओषंधयः समंवदन्तुसोमेंनसहराज्ञां ॥ यस्म्मैकृणोतिंब्राह्मणस्तः
राजन्पारयामासि ॥ ९६ ॥ नाशयित्रीबलासस्याशंसऽउपचितांमासि ॥
अथोंशतस्यंयक्ष्मांणाम्पाकारोरंसिनाशंनी ॥ ९७ ॥ त्वाङ्गन्धर्व्वाः ॥

१८ २५३

संहि.

॥१०३॥ त्वाङ्गन्धर्व्वाऽअखनँस्त्वामिन्द्रुस्त्वाम्बृहुस्पतिः ॥ त्वामोषधेसोमो पू. अ.
राजाविद्वान्यक्ष्मादमुञ्चयत ॥ ९८ ॥ सहस्वमे ॥ सहस्वमेऽअरातीः ॥१२॥
सहस्वपृतनायतः ॥ सहस्वसर्व्वैपाप्मानुꣳसहमानास्योषधे ॥ ९९ ॥
दीर्ग्घायुस्ते ॥ दीर्ग्घायुस्तऽओषधेखनितायस्म्मैचत्वाखनाम्म्यहम्
॥ अथोत्त्वन्दीर्ग्घायुर्भूत्वाशतवल्शाविरोहतात् ॥ १०० ॥ त्वमु
त्तमा । स्योषधेतववृक्षाऽउपस्तयः ॥ उपस्तिरस्तुसोस्म्माकंय्योऽअ ॥१०३॥
स्म्माँ२ऽअभिदासति ॥ १०१ ॥ [२७] मामाहिꣳसीज्जनितायःपृ

थिव्या॒यो वा॒दि॑वं॒ सत्यधे॑र्म्मा॒व्या न॑द्र् ॥ यश्चा॒पश्च॒न्द्राः प्र॑थ॒मो ज॒जा

न॒ कस्मै॑ दे॒वाय॑ ह॒विषा॑ विधेम ॥ १०२ ॥ अ॒भ्याव॑र्त्तस्व । पृ॒थिवि य॒ज्ञे

न॒ पय॑सा स॒ह ॥ व॒पान्ते॑ऽअ॒ग्निरि॑षि॒तोऽअ॑रोहत् ॥ १०३ ॥ अग्ने॒ यत् ॥

अग्ने॒ यत्ते॑ शु॒क्रं यच्च॒न्द्रं यत्पू॒तं यच्च॑ य॒ज्ञियं॑म् ॥ तद्दे॒वेभ्यो॑ भरामसि

॥ १०४ ॥ इष॒मूर्ज॑म् ॥ इष॒मूर्ज॑म॒हमि॒तऽआद॑मृ॒तस्य॒ योनिं॑म्म॒हि॒ष

स्य॒ धारा॑म् ॥ आमा॒ गोषु॒ विश॒त्वा त॒नूषु॒ जहा॑मि से॒दिम॒निरा॒मम॑मीवाम्

॥ १०५ ॥ अग्ने॒ तव॑ ॥ अग्ने॒ तव॒ श्रवो॒ वयो॒ महि॑ भ्राजन्ते॒ऽअ॒र्च्चयो॑ वि

संहि. भावसो ॥ बृहद्भानोशवंसाव्वाजंमुक्थ्यन्दधासिदाशुषेकवे ॥ १०६ ॥ पू. अ.
॥१०४॥ पावकवंर्चाःशुक्रवंर्चाः ॥ पावकवंर्चाःशुक्रवंर्चाऽअनूंनवर्चाऽउदिंय ॥१२॥
र्षिभानुना ॥ पुत्रोमातराव्विचरन्नुपावसिपृणक्षिरोदसीऽउभे ॥ १०७ ॥
ऊर्ज्जोनपात् ॥ ऊर्ज्जोनपाज्जातवेदःसुशस्तिभिर्म्मन्दस्वधीतिभिर्हि
तः ॥ त्वेऽइषःसन्दधुर्ब्भूरिवर्प्पसश्चित्रोतयोव्वामजाताः ॥ १०८ ॥
इरज्यन्नग्ने । प्प्रथयस्वजन्तुभिरस्मेरायोऽअमर्त्त्य ॥ सदर्शतस्यव्व
पुषोव्विराजसिपृणक्षिसानसिङ्क्रतुम् ॥ १०९ ॥ इष्कर्त्तारमद्ध्वरस्य ॥ इ ॥१०४॥

ष्कुर्त्तारमद्ध्वरस्यप्प्रचेतसङ्क्षयन्तꣳराधसोमहः ॥ रातिंव्वामस्यसुभगा
म्महीमिषन्दधासिसानसिꣳरयिम् ॥ ११० ॥ ऋतावानम्महिषं । व्वि
श्वदर्शतमग्निꣳसुम्म्नायंदधिरेपुरोजनाः ॥ श्रुत्कर्णꣳसप्प्रथस्तमन्त्वा
गिरादैव्व्यम्मानुषायुगा ॥ १११ ॥ आप्प्यायस्व । समेतुतेव्विश्वतः
सोमव्वृष्ण्यम् ॥ भवाव्वाजस्यसङ्गथे ॥ ११२ ॥ सन्ते ॥ सन्तेपयाꣳ
सिसंयन्तुव्वाजाः संव्वृष्ण्यान्यभिमातिषाहः ॥ आप्प्यायमानोऽ
अमृतायसोमदिविश्रवाꣳस्युत्तमानिधिष्ष्व ॥ ११३ ॥ आप्प्याय

स्व ॥ मदिन्तमुसोमुविश्वेभिरुद्ग्शुभिः ॥ भवानर्ःसुप्पथंस्तमुर्ःसखा
वृधे ॥ ११४ ॥ आते । वृत्सोमनौयमत्परुमाच्चित्सधस्त्थात् ॥ अग्ने
त्वाङ्कामयागिरा ॥ ११५ ॥ तुभ्यन्ताः ॥ तुभ्यन्ताऽअङ्गिरस्तमाव्वि
श्वाःसुक्षितयःपृथक् ॥ अग्नेकामायमेमिरे ॥ ११६ ॥ अग्निःप्प्रिये
षु ॥ अग्निःप्प्रियेषुधामसुकामोभूतस्यभव्यस्यसम्म्राडेकोव्विराजति
॥११७॥ [१६] इति श्रीवाजसनेयसंहितायां द्वादशोऽध्यायः ॥ १२ ॥
अथानुवाकसूत्रम् । मयिगृह्णामिपञ्चदश ध्रुवासिमधुव्वाताएका ॥१०५॥

दशकौ सम्यक्स्रवन्तिनवेमम्माषडपान्त्वैकाऽयम्पुरःपञ्च सप्ताष्टा
पञ्चाशत् ॥ हरिः ॐ मयिगृह्णामि ॥ मयिगृह्णाम्म्यग्ग्रेऽअग्निढ॰राय
स्प्पोषांयसुप्प्रजास्त्वायंसुवीर्य्यांय ॥ मामुंदेवतांऽसचन्ताम् ॥१॥ अ
पाम्पृष्ठम् ॥ अपाम्पृष्ठमंसियोनिरग्ग्नेःसंमुद्रमभितंऽपिन्वंमानम् ॥
वर्द्धमानोमहाँ २ ऽआचपुष्क्करेदिवोमात्र्यांवरिम्म्णाप्प्रंथस्व ॥ २ ॥
ब्रह्मंजज्ञानम् ॥ ब्रह्मंजज्ञानम्प्रंथमम्पुरस्ताद्विसींमुतःसुरुचोंवेनऽ
आवः ॥ सबुध्न्याऽउपमाऽअंस्यविष्ठाःसतश्चयोनिमसंतश्चविवं÷

॥ ३ ॥ हिरण्यगर्भःसमवर्त्तताग्ग्रेभूतस्यजातःपतिरेकऽआसीत् ॥
सदाधारपृथिवीन्द्यामुतेमाङ्कस्म्मैदेवायहविषाविधेम ॥४॥ द्रप्प्सश्च
स्कन्द ॥ पृथिवीमनुद्यामिमञ्चयोनिमनुयश्चपूर्व्वः ॥ समानंय्योनि
मनुसञ्चरन्तन्द्रप्प्सञ्जुहोम्म्यनुसप्तहोत्राः ॥५॥ नमोस्तु। सर्प्पेब्भ्यो
येकेचपृथिवीमनु ॥ येऽअन्तरिक्षेयेदिवितेब्भ्यः सर्प्पेब्भ्योनमः
॥ ६ ॥ याऽइषवः ॥ याऽइषवोयातुधानानांय्येवावनस्प्पतीँ१रनु॥
येवावटेषुशेरतेतेब्भ्यःसर्प्पेब्भ्योनमः ॥ ७ ॥ येवा। मीरोचनेदिवो ॥१०६॥

येवासूर्य्यस्यरश्मिषु ॥ येषामप्सुसदस्कृतन्तेभ्यः सर्पेभ्योन
मः ॥ ८ ॥ कृणुष्वपाजः ॥ कृणुष्वपाजः प्रसितिन्नपृथ्वींयाहि
राजेवामवाँ २ ऽइभेन ॥ तृष्वीमनुप्रसितिन्द्रूणानोस्तासिविध्यरक्ष
सस्तपिष्ठैः ॥ ९ ॥ तवभ्रमासः ॥ तवभ्रमासऽआशुयापतन्त्यनुस्पृ
शधृषताशोशुचानः ॥ तपूंष्यग्नेजुह्वापतङ्गानसन्दितोविसृजवि
ष्वगुल्काः ॥ १० ॥ प्रतिस्पशः ॥ प्रतिस्पशोविसृजतूर्णितमोभ
वापायुर्विशोऽअस्याऽअदब्धः ॥ योनोदूरेऽअघशंसोयोऽअन्त्यग्ने

माकिंष्टेव्यथिरादंधर्षीत् ॥ ११ ॥ उदग्ग्ने । तिष्ठुप्प्रत्यातनुष्ष्वन्न्यमि
॥१०७॥ त्राँ २ ऽओषतात्तिग्ग्ममहेते ॥ योनोऽअरातिꣳसमिधानचुक्केनीचात ॥१३॥
न्धक्ष्यतुसन्नशुष्क्कम् ॥१२॥ ऊर्द्ध्वोभव ॥ ऊर्द्ध्वोभवप्प्रतिविद्ध्याद्ध्यस्म
दाविष्कृणुष्ष्वदैव्यान्न्यग्ग्ने ॥ अवस्थिरातनुहियातुजूनाञ्जामिमजा
मिम्प्रमृणीहिशत्रून् ॥ अग्ग्नेष्ट्वातेजसासादयामि ॥१३॥ अग्ग्निर्म्मूर्द्धा ।
दिवःकुकुत्त्पतिःपृथिव्याऽअयम् ॥ अपाꣳरेताꣳसिजिन्न्वति ॥ इ
न्द्रस्यत्त्वौजसासादयामि ॥१४॥ भुवोयज्ञस्य ॥ भुवोयज्ञस्यरजस ॥१०७॥

श्चनेतायत्त्रानियुद्भिःसचसेशिवाभिः ॥ दिविमूर्द्धानन्दधिषेस्वर्षा
ञ्जिह्वामग्नेचकृषेहव्यवाहम् ॥१५॥ [१५] ध्रुवासि । धरुणास्तृता
विश्वकर्म्मणा ॥ मात्वासमुद्रऽउद्वधीन्मासुपर्णोऽव्यथमानापृथिवी
न्दृꣳह ॥ १६ ॥ प्रजापतिष्ट्वासादयत्वपाम्पृष्ठेसमुद्रस्येमन् ॥ व्यच
स्वतीम्प्रथस्वतीम्प्रथस्वपृथिव्यसि ॥ १७ ॥ भूरसि ॥ भूरसिभूमिर्
स्यदितिरसिविश्वधायाविश्वस्यभुवनस्यधर्त्री ॥ पृथिवींयच्छपृथि
वीन्दृꣳहपृथिवीम्माहिꣳसीः ॥ १८ ॥ विश्वस्मैप्राणाय ॥ विश्व

स्मै प्राणायापानाय व्यानायोदानाय प्रतिष्ठायै चरित्राय ॥ अग्निष्ट्वा
भि पातु मह्या स्वस्त्या छर्दिषा शन्तमेन तया देवतयाङ्गिरस्वद्ध्रुवा सीद
॥१९॥ काण्डात्काण्डात्प्ररोहन्ती परुषः परुषस्परि ॥ एवा नो दूर्वे प्र
तनु सहस्रेण शतेन च ॥२०॥ या शतेन । प्रतनोषि सहस्रेण विरोहसि ।
तस्यास्ते देवीष्टके विधेम हविषा वयम् ॥२१॥ यास्ते । ऽअग्ने सूर्ये रु
चो दिवमातन्वन्ति रश्मिभिः ॥ ताभिर्नोऽअद्य सर्वाभी रुचे जनाय ॥१०८॥
नस्कृधि ॥२२॥ या वः ॥ या वो देवाः सूर्ये रुचो गोष्वश्वेषु या रुचः ॥

इन्द्राग्नीताभिꣳसर्व्वाभीरुचन्नोधत्तबृहस्पते ॥ २३ ॥ विराड्ज्योतिꣳ ॥
विराड्ज्योतिरधारयत्स्वराड्ज्योतिरधारयत् ॥ प्रजापतिष्ट्वासादयतुपृ
ष्ठेपृथिव्याज्ज्योतिष्मतीम् ॥ विश्वस्मैप्प्राणायापानायव्यानायव्वि
श्वञ्ज्योतिर्यच्छ ॥ अग्निष्टेधिपतिस्तयादेवतयाङ्गिरस्वद्ध्रुवासीद
॥ २४ ॥ मधुश्च ॥ मधुश्चमाधवश्चवासन्तिकावृतूऽअग्नेरन्तꣳश्लेषो
सिकल्पेतान्द्यावापृथिवीकल्पन्तामापऽओषधयꣳकल्पन्तामग्न
यꣳपृथङ्ममज्यैष्ठ्यायसव्व्रताꣳ ॥ येऽअग्नयꣳसमनसोन्तराद्यावापृ

थिवीऽइमे ॥ व्वासन्तिकावृतूऽअभिकल्पमानाऽइन्द्रमिवदेवाऽअभि
संव्विशन्तुतयादेवतयाङ्गिरस्वद्ध्रुवेसीदतम् ॥२५॥ अषाढासि ॥ अषा
ढासिसहमानासहस्वारातीःसहस्वपृतनायतः ॥ सहस्रवीर्य्यासिसा
स्याद्द्विपदश्चतुष्पदं कस्मै देवाय हविषा विधेम ॥ ३ ॥ उपयामगृ
हीतोसि। प्रजापतये त्वा जुष्टं गृह्णाम्येष ते योनिश्चन्द्रमास्ते महिमा ॥
यस्ते रात्रौ संवत्सरे महिमा सम्बभूव यस्ते पृथिव्यामग्नौ महिमा सम्बभू
व यस्ते नक्षत्रेषु चन्द्रमसि महिमा सम्बभूव तस्मै ते महिम्ने प्रजापत
ये देवेभ्यः स्वाहा ॥ ४ ॥ [२] युञ्जन्ति ब्रध्नमरुषं चरन्तं परित
स्थुषः ॥ रोचन्ते रोचना दिवि ॥ ५ ॥ युञ्जन्त्यस्य ॥ युञ्जन्त्य
स्य काम्या हरी विपक्षसा रथे ॥ शोणा धृष्णू नृवाहसा ॥ ६ ॥ यद्वा

॥२१॥

तः ॥ यद्वातोऽअपोऽअगनीगन्प्रियामिन्द्रस्यतन्वम् ॥ एतꣳ
स्तोतरनेनपथापुनरश्वमावर्त्तयासिनः ॥ ७ ॥ वसवस्त्वा । ञ्जन्तु
गायत्रेणच्छन्दसारुद्रास्त्वाञ्जन्तुत्रैष्टुभेनच्छन्दसादित्यास्त्वाञ्जन्तु
जागतेनच्छन्दसा ॥ भूर्भुवःस्वर्ल्लाजी३ञ्छाची३न्यव्येगव्यं ऽ
एतदन्नमत्तदेवाऽएतदन्नमद्धिप्रजापते ॥ ८ ॥ कःस्विंत् ॥ कः
स्विदेकाकीचरतिकऽउस्विज्जायतेपुनः ॥ किꣳस्विद्धिमस्यभेषज
ङ्किम्वावपनम्महत् ॥ ९ ॥ सूर्य्यऽएकाकी । चरतिचन्द्रमाजाय

वं.वि. तेपुनंः ॥ अग्निर्हिमस्यंभेषजम्भूमिरावपनम्महत् ॥ १० ॥ का उ. अ.

॥२२॥ स्विंत् ॥ कास्विंदासीत्पूर्वचित्तिःकिंस्विंदासीद्बृहद्वयः ॥ कास्विं ॥२३॥

दासीत्पिलिप्पिलाकास्विंदासीत्पिशङ्गिला ॥ ११ ॥ द्यौरांसीत् ॥

द्यौरांसीत्पूर्वचित्तिरश्वंऽआसीद्बृहद्वयः ॥ अविंरासीत्पिलिप्पिलारा

त्रिंरासीत्पिशङ्गिला ॥ १२ ॥ [८] वायुष्ट्वां । पचतैरंवत्वसिंतग्री

वश्छागैर्न्यग्रोधंश्चमसैःशंल्म्मलिर्वृद्ध्या ॥ एषस्यराथ्योवृषापड्भि

श्चतुर्भिरेदंगन्ब्रह्माकृष्णश्चनोवतुनमोग्नये ॥ १३ ॥ सꣳशितोर ॥२२॥

श्मिना। रथःसध्रिंशितोरश्मिनाहयः॥ सध्रिंशितोऽअप्स्वप्सुजा
ब्रह्मासोमंपुरोगवः॥१४॥ स्वयंवाजिन्॥ स्वयंवाजिँस्तन्वङ्कल्प
यस्वस्वयंयंजस्वस्वयञ्जुषस्व॥ महिमातेन्येननसन्नशे॥१५॥ नवै
॥ नवाऽउऽएतन्म्रियसेनरिष्यसिदेवाँ २ऽइदेषिपथिभिःसुगेभिः
यत्रासतेसुकृतोयत्रतेययुस्तत्रत्वादेवःसवितादधातु॥ १६॥ अग्निः
पशुः॥ अग्निःपशुरासीत्तेनायजन्तसऽएतंलोकमजयद्यस्मिन्न
ग्निःसतेलोकोभविष्यतितञ्जेष्यसिपिबैताऽअपः॥ वायुःपशु

रांसीत्तेनायजन्तस ऽ एतंल्लोकमंजयद्यस्मिंन्वायुः सतेलोकोभंवि
ष्यतितञ्जेष्यसिपिबैताऽअपः ॥ सूर्य्यः पशुरांसीत्तेनायजन्तसऽ
एतंल्लोकमंजयद्यस्मिन्त्सूर्य्यः सतेलोकोभंविष्यतितञ्जेष्यसिपि
बैताऽअपः ॥ १७ ॥ [५] प्राणायस्वाहा । पानायस्वाहांव्यानायस्वा
हां ॥ अम्बेऽअम्बिकेम्बांलिकेनमांनयतिकश्चन ॥ ससंस्त्यश्वकः सुभं
द्रिकाङ्काम्पीलवासिनींम् ॥ १८ ॥ गणानांन्त्वा । गणपंतिꣳ हवामहे ॥२३॥
प्रियाणांन्त्वाप्रियपंतिꣳ हवामहेनिधीनान्त्वांनिधिपतिꣳ हवामहे

वसोमम ॥ आहमंजानिगर्भंधमात्वमंजासिगर्भंधम् ॥ १९ ॥ ताऽ
उभौ । चतुरंःपदश्सुम्प्रसांरयावस्वर्गेलोकेप्रोर्ण्णुवाथांवृषांवाजी
रेतोधारेतोंदधातु ॥ २० ॥ [३] उत्संक्थ्याऽअवंगुदन्धेहिसमञ्जि
ञ्चांरयावृषन् ॥ यस्त्रीणाञ्जीवभोजंनः ॥ २१ ॥ यकासकौ । शंकुन्ति
काहलगितिवञ्चंति । आहंन्तिगभेपसोनिगंल्गलीतिधारंका ॥ २२ ॥
यकोसकौ । शंकुन्तकऽआहलगितिवञ्चंति ॥ विवंक्षतऽइवतेमुखम
ध्वंर्य्योमानस्त्वमभिभांषथाः ॥ २३ ॥ माताचं । तेपिताचतेग्ग्रंवृक्ष

स्यंरोहतꣳ ॥ प्रतिलामीतितेपिताग्भेमुष्टिमंतꣳसयत् ॥ २४ ॥ माता
चं । तेपिताचतेग्ग्रेवृक्षस्यंक्रीडतꣳ ॥ विवक्षतऽइवतेमुखम्ब्रह्मन्मा
त्वंवंदोबहु ॥ २५ ॥ ऊर्ध्वामेनाम् ॥ ऊर्ध्वामेनामुच्छ्रांपयागिरौभारꣳह
रंन्निव ॥ अथांस्यैमध्यंमेधताꣳशीतेवातेपुनन्निव ॥ २६ ॥ ऊर्ध्वमेन
म् ॥ ऊर्ध्वमेनमुच्छ्रंयताद्गिरौभारꣳहरंन्निव ॥ अथांस्यमध्यंमेजतुशी
तेवातेपुनन्निव ॥ २७ ॥ यदंस्याꣳ ॥ यदंस्याऽअꣳहुभेद्याꣳकृधुस्थूल
मुपातंसत् ॥ मुष्कावदंस्याऽएजतोगोशफेशंकुलाविव ॥ २८ ॥ यद्दे ॥२४॥

वासः ॥ यद्देवासौललामङ्गुम्प्रविष्टीमिनमाविषुः ॥ सक्थ्नादेदिश्य
तेनारीसत्यस्याक्षिभुवोयथा ॥ २९ ॥ यद्धरिणः ॥ यद्धरिणोयवमत्ति
नपुष्टम्पशुमन्यते ॥ शूद्रायदर्य्यजारानपोषायधनायति ॥ ३० ॥
यद्धरिणोयवमत्तिनपुष्टम्बहुमन्यते । शूद्रोयदर्य्यायैजारोनपोषम
नुमन्यते ॥ ३१ ॥ दधिक्राव्णोऽअकारिषञ्जिष्णोरश्वस्यवाजि
नः ॥ सुरभिनोमुखाकरत्प्रणऽआयूंषितारिषत् ॥ ३२ ॥ [१२]
गायत्रीत्रिष्टुप् ॥ गायत्रीत्रिष्टुब्जगत्यनुष्टुप्पङ्क्त्यासह ॥ बृहत्यु
४८९ = श्च

वा.सं. ष्णिहा॑कु॒कुप्प्सू॒चीभि॑ः शम्म्यन्तुत्वा ॥ ३३ ॥ द्विप॑दा॒याः ॥ द्विप॑दा॒या उ. अ.
॥२५॥ श्चतु॑ष्पदा॒स्त्रिप॑दा॒याश्च॒षट्प॑दाः ॥ विच्छ॑न्दा॒याश्च॒सच्छ॑न्दाः सू॒ची ॥२३॥
भि॑ः शम्म्यन्तुत्वा ॥ ३४ ॥ म॒हाना॑म्न्यो रे॒वत्य॑ः ॥ म॒हाना॑म्न्यो रे॒व
त्यो॒विश्वा॒ऽआशा॑ः प्र॒भूव॑रीः ॥ मैघी॑र्विद्यु॒तो॒वाच॑ः सू॒चीभि॑ः शम्म्य
न्तुत्वा ॥ ३५ ॥ ना॒र्य॑स्ते॒पत्न्यो॒लोम॒विचि॑न्वन्तुमनी॒षया॑ ॥ दे॒वा
ना॒म्पत्न्यो॒दिश॑ः सू॒चीभि॑ः शम्म्यन्तुत्वा ॥ ३६ ॥ र॒ज॒ताहरि॑णीः ।
सीसा॒युजो॑युज्यन्ते॒कर्म्म॑भिः ॥ अश्व॑स्यवा॒जिन॑स्त्व॒चिसि॒माः शम्म्य ॥२५॥

न्तुशम्म्यंन्तीहं ॥ ३७ ॥ कुविदङ्ग । यवंमन्तोयवंञ्चिद्यथादान्त्यंनुपूर्व्वं
व्वियूयं ॥ इहेहैषाङ्कणुहिभोजंनानियेबर्हिषोनमंऽउक्किंयजंन्ति
॥ ३८ ॥ [६] कस्त्वां ॥ कस्त्वाछ्यंतिकस्त्वाव्विशांस्तिकस्तेगात्रा
णिशम्म्यति ॥ कऽउंतेशमिताकविः ॥ ३९ ॥ ऋतवंस्ते ॥ ऋतवंस्तऽ
ऋतुथापर्व्वशमितारोव्विशांसतु ॥ संव्वत्सरस्यतेजंसाशमीभिः शम्म्य
न्तुत्वा ॥ ४० ॥ अर्द्धमासाःपरूंᳪषितेमासाऽआच्छ्यंन्तुशम्म्यं
न्तंहं ॥ अहोरात्राणिमरुतोव्विलिंष्टᳪसूदयन्तुते ॥ ४१ ॥ दैव्याऽअद्ध्व

।२६।। ऽर्य्यंव । स्त्वाछ्यन्तुविचंशासतु ॥ गात्राणिपर्वंशस्तेसिमाःकृण्णवन्तु ।।२३।।
शम्म्यंन्तीः ॥ ४२ ॥ द्यौस्ते ॥ पृथिव्व्यन्तरिक्षंव्वायुश्छिद्रंपृणातुते ॥
सूर्य्यस्तेनक्षत्रैःसहलोकङ्कृणोतुसाधुया ॥ ४३ ॥ शन्ते ॥ शन्तेपरे
भ्योगात्रेभ्यःशमस्त्ववरेभ्यः ॥ शमस्थभ्योमज्जभ्यःशम्म्वं
स्तुतन्न्वैतवं ॥ ४४ ॥ [६] कःस्विंत् ॥ कःस्विदेकाकीचंरतिकऽ
उंस्विज्जायतेपुनंः ॥ किंस्विद्धिमस्यंभेषजङ्किम्म्वावपंनम्महत्
॥४५॥ सूर्य्यऽएकाकी । चंरतिचन्द्रमाजायतेपुनंः ॥ अग्निर्हिमस्यं ।।२६।।

भेषजम्भूमिरावपनम्महत् ॥ ४६ ॥ किᳪस्वित् ॥ किᳪस्वित्सूर्य्यं
समञ्ज्योतिःकिᳪसमुद्रसमᳪसरः ॥ किᳪस्वित्पृथिव्यैवर्षीयः
कस्यमात्रानविद्यते ॥ ४७ ॥ ब्रह्मसूर्य्यसमम् ॥ ब्रह्मसूर्य्यसम
ञ्ज्योतिर्द्यौःसमुद्रसमᳪसरः ॥ इन्द्रःपृथिव्यैवर्षीयान्गोस्तुमा
त्रानविद्यते ॥ ४८ ॥ पृच्छामित्वा ॥ चितयेदेवसखयदित्वमत्रमनं
साजगन्थ ॥ येषुविष्णुस्त्रिषुपदेष्वेष्टस्तेषुविश्वम्भुवनमाविवेशा३
॥ ४९ ॥ अपितेषु ॥ त्रिषुपदेष्वस्मियेषुविश्वम्भुवनमाविवेश ॥

संहि. सद्यःपर्य्यैमिपृथिवीमुतद्यामेकेनाङ्गेनदिवोऽअस्यपृष्ठम् ॥ ५० ॥ उ. अ.
॥२७॥ केष्वन्तः ॥ पुरुषऽआविवेशकान्यन्तःपुरुषेऽअर्प्पितानि ॥ एतद्ब्र ॥२३॥
ह्मन्नुपवल्हामसित्वाकिꣳस्विन्नःप्रतिवोचास्यत्रं ॥ ५१ ॥ पञ्चस्व
न्तः । पुरुषऽआविवेशतान्यन्तःपुरुषेऽअर्प्पितानि ॥ एतत्त्वात्रंप्र
तिमन्वानोऽअस्म्मिनमायायांभवस्युत्तरोमत् ॥ ५२ ॥ [८] का
स्विंत् ॥ कास्विंदासीत्पूर्वचित्तिःकिꣳस्विंदासीद्बृहद्वयः ॥ कास्विं
दासीत्पिलिप्पिलाकास्विंदासीत्पिशङ्गिला ॥ ५३ ॥ द्यौरासीत् ॥ ॥२७।

द्यौरांसीत्पूर्वचित्तिरश्वंऽआसीद्बृहद्वयः॑ ॥ अविरांसीत्पिलिप्पिलारा
त्रिरासीत्पिशङ्गिला ॥ ५४ ॥ काऽईम् ॥ काऽईमरेपिशङ्गिलाकाऽई
कुरुपिशङ्गिला ॥ कऽईमास्कन्दमर्षतिकऽईम्पन्थांविसर्प्पति ॥५५॥
अजारे । पिशङ्गिलाश्वावित्कुरुपिशङ्गिला ॥ शशऽआस्कन्दमर्षत्य
हिःपन्थांविसर्प्पति ॥ ५६ ॥ कत्यस्य । विष्ठाःकत्यक्षराणिकति
होमासःकतिधासमिद्धः ॥ यज्ञस्यत्वाविदथापृच्छमत्रकतिहोतार
ऽऋतुशोयजन्ति ॥५७॥ षडस्य ॥ विष्ठाःशतमक्षराण्यशीतिर्हो

सं॰हि॰ मांऽसमिधोंहतिस्रः ॥ यज्ञस्यंतेव्विदथाप्प्रब्ब्रवीमिसप्तहोतारऽऋतु उ॰ अ॰

॥२८॥ शोयंजन्ति ॥५८॥ कोऽअस्य । व्वेदभुवनस्यनाभिङ्कोद्यावापृथिवी ॥२३॥

ऽअन्तरिक्षम् ॥ कःसूर्य्यस्यव्वेदबृहतोजनित्रङ्कोव्वेदचन्द्रमसंय्यतो

जाः ॥५९॥ व्वेदाहम् ॥ व्वेदाहमस्यभुवनस्यनाभिंव्वेदद्यावापृथिवी

ऽअन्तरिक्षम् ॥ व्वेदसूर्य्यस्यबृहतोजनित्रमथोव्वेदचन्द्रमसंय्यतो

जाः ॥६०॥ पृच्छामित्वा ॥ पृच्छामित्वापरमन्तम्पृथिव्याःपृच्छा

मियत्रभुवनस्यनाभिः ॥ पृच्छामित्वावृष्णोऽअश्वस्यरेतःपृच्छा ॥२८॥

मिव्वाचःपरमंव्व्योम ॥ ६१ ॥ इयंव्वेदिः ॥ इयंव्वेदिःपरोअन्तः

पृथिव्याऽअयंय्यज्ञोभुवनस्यनाभिः ॥ अयꣳसोमोव्वृष्णोऽअश्व

स्यरेतोब्रह्मायंव्वाचःपरमंव्व्योम ॥ ६२ ॥ [१०] सुभूःस्वयम्भूः ।

प्रथमोन्तर्म्महत्यर्णवे ॥ दधेहगर्भमृत्वियंय्यतोजातःप्रजापतिः

॥ ६३ ॥ होतायक्षत् ॥ होतायक्षत्प्रजापतिꣳसोमस्यमहिम्नः ॥

जुषताम्पिबतुसोमꣳहोतर्य्यज ॥ ६४ ॥ प्रजापतेन । त्वदेतान्यन्यो

विश्वारूपाणिपरिताबभूव ॥ यत्कामास्तेजुहुमस्तन्नोऽअस्तुव्वयꣳ

स्यामुपतेयोरयीणाम् ॥ ६५ ॥ [३] इति श्रीवाजसनेयसंहितायां
त्रयोविंशोऽध्यायः ॥ २३ ॥

अथानुवाकसूत्रम् । अश्वस्तूपरोधूम्रान्वसन्तायसमुद्रायशिशुमा
रान्मयुः प्राजापत्योदशकाश्चत्वारश्चत्वारिꣳशत् ॥ हरिः ॐ अश्व
स्तूपरꣳ ॥ अश्वंस्तूपरोगोमृगस्तेप्प्राजापत्याः कृष्णग्रीवऽआग्नेयो
रराटेपुरस्तात्सारस्वतीमेष्ष्युधस्ताद्धन्व्वौराश्विनावधोरामौबाह्वोः सौ
मापौष्णः श्यामोनाभ्यांꣳ सौर्य्ययामौश्वेतश्चकृष्णश्चपार्श्वयो ॥२९॥

स्त्वाष्ट्रौलोमशसक्थौसक्थ्योर्व्वैष्णवः श्वेतः पुच्छऽइन्द्रायस्वपस्या
यव्वेहद्वैष्णवोव्वामनः ॥ १ ॥ रोहितोधूम्म्ररोहितः ॥ कर्कन्धुरोहित
स्तेसौम्म्याबभ्रुररुणबभ्रुः शुकबभ्रुस्तेव्वारुणाः शितिरन्ध्रोन्यतः
शितिरन्ध्रः समन्तशितिरन्ध्रस्तेसावित्राः शितिबाहुरन्यतः शितिबा
हुः समन्तशितिबाहुस्तेबार्हस्पत्याः पृषतीक्षुद्रपृषतीस्थूलपृषतीता
मैत्रावरुण्ण्यः ॥ २ ॥ शुद्धवालः सर्व्वशुद्धवालोमणिवालस्तऽआश्वि
नाः श्येतः श्येताक्षोरुणस्तेरुद्रायपशुपतयेकर्ण्णायामाऽअवलिप्ता

रौद्रानभोरूपाःपार्ज्जन्याः ॥ ३ ॥ पृश्निस्तिरश्चीनंपृश्निः ॥ पृश्नि
स्तिरश्चीनंपृश्निरूर्द्धपृश्निस्तेमारुताः फल्गूर्ल्लोहितोर्णीपलक्षीताः
सारस्वत्यःप्लीहाकर्णःशुण्ठाकर्णोऽद्ध्यालोहकर्णस्तेत्वाष्ट्राः कृ
ष्णग्रीवःशितिकक्षोञ्जिसक्थस्तऽऐन्द्राग्नाः कृष्णाञ्जिरल्पाञ्जि
र्म्महाञ्जिस्तऽउषस्याः ॥ ४ ॥ शिल्पावैश्वदेव्यः ॥ शिल्पावैश्वदे
व्योरोहिण्यस्त्र्यवयोवाचेविज्ञाताऽअदित्यैसरूपाधात्रेवत्सतर्य्योदे
वानाम्पत्नीभ्यः ॥ ५ ॥ कृष्णग्रीवाऽआग्नेयाः । शितिभ्रवोवसू ॥३०॥

ना॒ꣳ रोहि॑ता रु॒द्राणा॒ꣳ श्वेता॑ऽअवरो॒किण॑ऽआदि॒त्याना॒न्नभो॑रूपाः
पार्ज्ज॒न्याः॥ ६ ॥ उ॒न्न॒तऽऋ॑ष॒भः॥ उ॒न्न॒तऽऋ॑ष॒भोव्वा॑म॒नस्तऽऐ
न्द्रावैष्ण॒वाऽउ॑न्न॒तः शि॑तिबा॒हुः शि॑तिपृ॒ष्ठस्तऽऐ॑न्द्राबार्ह॒स्पत्याः
शुक॑रूपाव्वाजि॒नाः क॒ल्माषा॑ऽआग्निमारु॒ताः श्या॒माः पौ॒ष्णाः
॥ ७ ॥ ए॒तां॑ऽऐन्द्रा॒ग्नाः॥ ए॒तां॑ऽऐन्द्रा॒ग्नाद्वि॑रूपा॒ऽअ॑ग्नीषो॒मी
यां॑व्वाम॒नाऽअ॑न॒ड्वाह॑ऽआग्नावैष्ण॒वाव्व॒शामै॑त्रावरु॒ण्यो॒ऽन्यत॑ऽएन्यो
मै॒त्र्यः ॥ ८ ॥ कृ॒ष्णग्ग्री॑वाऽआग्ने॒याः ॥ कृ॒ष्णग्ग्री॑वाऽआ

५०१

संहि. ग्नेयाबभ्रवः सौम्याः श्वेतावायव्या ऽअविज्ञाता ऽअदित्यैसरूपा उ. अ.
॥३१॥ धात्रेवत्सतर्यो देवानाम्पत्नीभ्यः ॥ ९ ॥ कृष्णाभौमाः ॥ कृ ॥२४॥
ष्णाभौमाधूम्रा ऽआन्तरिक्षाबृहन्तोदिव्याः शबलावैद्युताः सि
ध्मास्तारकाः ॥ १० ॥ [१०] धूम्रान्वसन्ताय ॥ धूम्रान्वस
न्तायालभते श्वेतान्ग्रीष्मायकृष्णान्वर्षाभ्योऽरुणाञ्छरदेपृषतोहे
मन्तायपिशङ्गाञ्छिशिराय ॥ ११ ॥ त्र्यवयोगायत्र्यै । पञ्चावयस्त्रि
ष्टुभेदित्यवाहोजगत्यैत्रिवत्साऽअनुष्टुभेतुर्यवाहऽउष्णिहे ॥ १२ ॥ ॥३१॥

पृष्ठवाहौविराजे ॥ पृष्ठवाहौविराजऽउक्षाणौबृहत्याऽऋषभाःककुभे
नड्वाहःपङ्क्त्यैधेनवोतिच्छन्दसे ॥ १३ ॥ कृष्ष्णग्ग्रीवाऽआग्ग्नेयाः ॥
कृष्ष्णग्ग्रीवा ऽआग्ग्नेयाबब्भ्रवःसौम्म्या ऽउपध्वस्ताःसावित्त्रावत्स
तर्य्यःसारस्वत्यःश्यामाःपौष्ष्णाःपृश्नंयोमारुताबहुरूपावैश्वदे
वावशाद्यावापृथिवीयाः ॥ १४ ॥ उक्ताःसञ्चराः ॥ उक्ताःसञ्चराऽएता
ऽऐन्द्राग्नाःकृष्ष्णावारुणाःपृश्नंयोमारुताःकायास्तूपराः ॥ १५ ॥
अग्नयेनीकवते । प्प्रथमजानालभतेमरुद्भ्यःसान्तपनेभ्यःसवात्या

न्मुरुद्भ्यो गृहमेधिभ्यो बष्किहान्मुरुद्भ्यः क्रीडिभ्यः सᳪसृष्टान्मु
रुद्भ्यः स्वतवद्भ्योनुसृष्टान् ॥ १६ ॥ उक्त्साः सञ्चराः ॥ उक्त्साः सञ्चराऽए
ताऽऐन्द्राग्नाः प्राशृङ्गा माहेन्द्रा बहुरूपा वैश्वकर्म्मणाः ॥ १७ ॥ धू
म्म्रा बभ्रुनीकाशाः ॥ पितृणाᳪ सोमवताम्बभ्रवो धूम्म्रनीकाशाः
पितृणां बर्हिषदाङ्कृष्णा बभ्रुनीकाशाः पितृणामग्निष्वात्तानाङ्कृ
ष्णाः पृषन्तस्त्रैयम्बकाः ॥ १८ ॥ उक्त्साः सञ्चराः ॥ उक्त्साः सञ्चराऽ
एताः शुनासीरीयाः श्वेता वायव्याः श्वेताः सौर्याः ॥ १९ ॥ वसन्ता

यंकपिञ्जलान् ॥ वसन्तायंकपिञ्जलानालंभतेग्रीष्मायकलविंका
न्वर्षाभ्यंस्तित्तिरीञ्छरदेवर्तिकाहेमन्तायककराञ्छिशिरायविक
करान् ॥ २० ॥ [१०] समुद्रायंशिशुमारान् ॥ समुद्रायंशिशुमा
रानालंभतेपर्जन्यायमण्डूकानद्भ्योमत्स्यान्मित्रायंकुलीपयान्वरु
णायनाक्रान् ॥ २१ ॥ सोमायहꣳसान् ॥ सोमायहꣳसानालंभतेवा
यवेबलाकाऽइन्द्राग्निभ्यांक्रुञ्चान्मित्रायमद्गून्वरुणायचक्रवाकान्
॥ २२ ॥ अग्नयेकुटरून् ॥ अग्नयेकुटरूनालंभतेवनस्पतिभ्यऽ

उलूकानग्नीषोमाभ्याञ्चाषानश्विभ्याम्मयूरान्मित्रावरुणाभ्या
॥३३॥ ङ्कपोतान् ॥ २३ ॥ सोमायलबान् ॥ सोमायलबानालभतेत्वष्ट्रेकौली ॥२४॥
कान्गोषादीर्देवानाम्पत्नीभ्यः कुलीकादेवजामिभ्योग्नयेगृहपत
येपारुष्णान् ॥ २४ ॥ अह्नेपारावतान् ॥ अह्नेपारावतानालभते
रात्र्यैसीचापूरहोरात्रयोःसन्धिभ्योजतूर्म्मासेभ्योदात्यौहान्त्संव
त्सरायमहतःसुपर्ण्णान् ॥ २५ ॥ भूम्म्याऽआखून् ॥ भूम्म्याऽआखू ॥३३॥
नालभतेन्तरिक्षायपाङ्क्त्रान्दिवेकशान्दिग्भ्योनकुलान्बभ्रुकानवा

न्तरादिशाभ्यः ॥ २६ ॥ वसुभ्यऽऋश्यान् ॥ वसुभ्यऽऋश्या
नालभतेरुद्रेभ्योरुरूनादित्येभ्योन्यङ्कून्विश्वेभ्योदेवेभ्यःपृष
तान्त्साध्येभ्यःकुलुङ्गान् ॥ २७ ॥ ईशानायपरस्वतः ॥ ईशाना
यपरस्वतऽआलभतेमित्रायगौरान्वरुणायमहिषान्बृहस्पतयेगवयाँ
स्त्वष्ट्रऽउष्ट्रान् ॥ २८ ॥ प्रजापतयेपुरुषान् ॥ प्रजापतयेपुरुषान्हस्ति
नऽआलभतेवाचेप्लुषीँश्चक्षुषेमशकाञ्छ्रोत्रायभृङ्गाः ॥ २९ ॥ शत
म् ॥ १४०० ॥ प्रजापतयेच । वायवेचगोमृगोवरुणायारण्योमेषो

सुमायकृष्णोमनुष्ष्यराजायंमुर्कटं ÷ शार्दूलायंरोहिद्दृषुभायंगवुयी
क्षिप्प्रश्येनायुवर्तिकानीलंङ्गोःक्रिमिं ÷ समुद्रायंशिशुमारोहिमवंते
हुस्ती ॥ ३० ॥ [१०] मयुःप्प्राजापत्यः ॥ मयुःप्प्राजापत्यऽउुलो
हुलिक्ष्णोवृषुदु ६ः शस्तेधात्रेदिशाङ्कुङ्कोधुङ्क्षाग्ग्नेयीकंलविङ्कोलोहि
ताहिःपुष्ष्करसादस्तेत्वाष्ट्राब्वाचेक्रुञ्चः ÷ ॥ ३१ ॥ सोमायकुलुङ्गः ॥
सोमायकुलुङ्गऽआरुण्ण्योजोनंकुलःशकातेपौष्ष्णाःक्रोष्टामायोरि
न्द्रस्यगौरमृगःपिद्वोन्न्यङ्कुः ÷ कक्कुटस्तेनुमत्यैप्प्रतिश्श्रुत्कायैचक्रवा ॥३४॥

कः ॥ ३२ ॥ सौरीबलाका ॥ शार्गःसृजयःशयाण्डकस्तेमैत्राःसरस्व
त्यैशारिः पुरुषवाक्श्वाविद्भौमीशार्दूलोवृकः पृदाकुस्तेमन्यवेसरस्व
तेशुकः पुरुषवाक् ॥ ३३ ॥ सुपर्णःपार्जन्यः ॥ सुपर्णःपार्जन्यऽ
आतिर्वाहसोदर्विदातेवायवेबृहस्पतयेवाचस्पतयेपैङ्गराजोलज ऽ
आन्तरिक्षः प्लवोमद्गुर्मत्स्यस्तेनदीपतयेद्यावापृथिवीयः कूर्मः
॥ ३४ ॥ पुरुषमृगश्चन्द्रमसः ॥ पुरुषमृगश्चन्द्रमसोगोधाकालकादा
र्वाघाटस्तेवनस्पतीनाङ्कृकवाकुः सावित्रोहꣳसोवातस्यनाक्रोमक

॥३५॥ रंकुलीपयस्तेकूपारस्याह्रियैशल्यकः ॥ ३५ ॥ एण्यन्हं ॥ एण्य
न्हौमुण्डूकोमूषिकातित्तिरिस्तेसर्पाणांह्लोपाश ऽ आंश्विनः कृष्णो ॥२४॥
रात्र्याऽऋक्षोंजतूःसुंषिलीकातऽइंतरजनानाञ्जहंकावैष्णवी ॥ ३६ ॥
अन्यवापोर्द्धमासानाम् ॥ अन्यवापोर्द्धमासानामृश्यौमयूरःसुप
र्णस्तेगन्धर्वाणांमपामुद्रोमासाङ्कश्यपोरोहित्कुण्डृणाचीगोलत्ति
कातेप्सरसांम्मृत्यवैसितः ॥ ३७ ॥ वर्षाहूर्ऋतुनाम् ॥ वर्षाहूर्ऋतुना
माखुःकशोंमान्थालस्तेपितॄणाम्बलायाजगरोव्वसूनाङ्कपिञ्जलःकपो ॥२५॥

तऽउलूकं॑शशस्तेनिर्ऋ॑त्यैव्वरु॑णायारण्योमे॒षः ॥ ३८ ॥ श्वि॒त्रऽआ॑दि॒त्याना॑म् ॥ श्वि॒त्रऽआ॑दि॒त्याना॒मुष्ट्रो॒घृणी॑वान्वार्ध्रीन॒सस्तेम॒त्याऽअर॑ण्यायसृम॒रोरुरू॑रौद्रः क्व॒यि॑÷ कु॒टरु॑र्दा॒त्यौ॒हस्तेव्वा॒जिना॒ङ्कामा॑यपिकः ॥ ३९ ॥ ख॒ड्गो॑वै॑श्वदे॒वः । श्वा॒कृष्णः क॒र्णो॑ग॑र्द्द॒भस्त॒रक्षु॒स्तेरक्ष॑सा॒मिन्द्रा॑यसूक॒रः सि॒ह्होमा॑रु॒तः कृ॑कला॒सः पिप्प॑का॒शकु॒नि॒स्तेश॑र॒व्या॒यै॒व्वि॒श्वे॑षान्दे॒वाना॑म्पृष॒तः ॥ ४० ॥ [१०] इति श्रीवाजसनेयसंहितायां चतुर्विंशोऽध्यायः ॥ २४ ॥

अथानुवाकसूत्रम् ॥ शादन्दद्भिर्नवैकैका हिरण्यगर्भश्चतस्र आनो दश मानोमित्रोसदश्वस्याष्टकौ यत्तेषडिमानुकन्द्वे पञ्चदश सप्तच त्वारिंशत् ॥ हरिः ॐ शादंन्दुद्भिश्श ॥ शादंन्दुद्भिरवंकान्दन्तमूलैर्म्मृदुम्बस्वैंस्तेगान्दꣳष्ट्राभ्याꣳसरंस्वत्याऽअग्रजिह्वंजिह्वायांऽउत्सादमंवक्रन्देनतालुवाजꣳहनुभ्यामप ऽ आस्येनवृषणमाण्डाभ्यांमादित्याँश्म्मश्रुभि ꣳ पन्थानम्भ्रूभ्यान्द्यावापृथिवीवर्तोभ्यांविद्युतंकूनीनंकाभ्या ꣳ शुक्लायस्वाहांकृष्णायस्वाहापार्य्याँणिपक्ष्मा

॥२६॥

ण्यव्वाउर्स्यांऽङ्क्षवौवाउर्स्याणिपक्ष्माणिपाउर्स्याऽङ्क्षवं॥ १॥ [१] व्वा
तंम्प्राणेनं॥ व्वातंम्प्राणेनांपानेननासिकेऽउपयाममधरेणौष्ठेनसदुत्त
रेणप्प्रकाशेनान्तरमनूकाशेनबाह्यन्निवेष्ष्यम्मूर्द्धास्तनयित्नुन्निर्बाधे
नाशनिम्मस्तिष्क्केणविद्युतङ्कनीनकाब्भ्याङ्कर्णाब्भ्या ॐ श्रोत्रे ॐ श्रो
त्राब्भ्याङ्कर्णौतेदुनीमधरकण्ठेनाप ः शुष्क्ककण्ठेनं चित्तम्मन्याभिर
दितिः शीर्ष्णानिर्ऋतिन्निर्जर्जल्ल्येनशीर्ष्णासंक्रोशैः प्प्राणान्रेष्म्मा
णंॐस्तुपेनं॥२॥ [१] मशकान्केशैः॥ मशकान्केशैरिन्द्रॐस्वपसा

यं॰ हि. वहैनुबृहस्पतिꣳ शकुनिसादेनंकूर्म्मांञ्छफैराक्रमंणꣳ स्त्थूराभ्यां उ. भ

॥३७॥ मृक्षलाभिः कपिञ्जलाञ्जवञ्जङ्घाभ्यामध्वांनम्बाहुभ्याञ्जाम्बीलेनारं ॥२५॥

ण्यमग्निमंतिरुग्भ्याम्पूषणंन्दोर्भ्यामश्विनावꣳसांभ्याꣳ रुद्रꣳ

रोराभ्याम् ॥ ३ ॥ [१] अग्नेःपंक्षतिः ॥ अग्नेःपंक्षातिर्व्वायोर्न्निपंक्षति

रिन्द्रंस्यतृतीयासोमंस्यचतुर्त्थ्यदिंत्यैपञ्चमीन्द्राण्यैषष्ठीमरुतांꣳ स

प्तमीबृहस्पतेरष्टम्म्यर्य्यम्णोनंवमीधातुर्द्दशमीन्द्रंस्यैकादशीव्वरुंण

स्यद्वादशीयमस्यंत्रयोदशी ॥ ४ ॥ [१] इन्द्राग्न्योःपंक्षतिःसरंस्व ॥३७॥

५१४

त्यैनिपंक्षातिर्म्मित्रस्यंतृतीयापाञ्चतुर्थीनिर्ऋत्यैपञ्चम्यग्नीषोमंयोः
षष्ठीसुर्प्पाणांꣳ सप्तमीव्विष्णोरष्टमीपूष्णोनंवमीत्वष्टुर्द्दशमीन्द्र
स्यैकादशीव्वरुंणस्यद्द्वादशीयम्म्यैत्त्रंयोदशीद्यावांपृथिव्योर्द्दक्षिण
म्पार्श्वंव्विश्वेषान्देवानामुत्तरम् ॥ ५ ॥ [१] मरुतांꣳस्कन्धाः ॥
मरुतांꣳ स्कन्धाव्विश्वेषान्देवानांम्प्रथमाकीकंसारुद्राणांन्द्विती
यांदित्यानांन्तृतीयांव्वायोः पुच्छमग्नीषोमंयोर्भासदौक्रुञ्चौश्रोणिं
भ्यामिन्द्राबृहस्पतीं ऽ ऊरुभ्यांम्मित्रावरुंणावल्गाभ्यांमाक्रमं

णꣳस्त्थूराभ्याम्बलङ्कुष्ठाभ्याम् ॥ ६ ॥ [१] पूषणंव्वनिष्ठुनान्धाही
न्स्थूलगुदयासर्प्पान्गुदाभिर्व्विह्रुतऽ आन्त्रैरपोव्वस्तिनाव्वृषणमा
ण्डाभ्यांव्वाजिनꣳ शेपेनप्प्रजाꣳ रेतसाचाषान्पित्तेनप्प्रदरान्पा
युनाकूश्म्माञ्छकपिण्डैः ॥ ७ ॥ [१] इन्द्रस्यक्क्रोडः ॥ इन्द्रस्य
क्क्रोडोदित्यैपाजस्यन्दिशाञ्जत्रवोदित्यैभसज्जीमूतान्हृदयौपशेना
न्तरिक्षम्पुरीततानभऽ उदर्य्येणचक्क्रवाकौमतस्नाभ्यान्दिवंव्वृक्का
भ्याङ्गिरीन्प्लाशिभिरुपलान्प्लीह्नाव्वल्म्मीकान्क्लोमभिर्ग्ग्लौभिर्ग्गु

ल्म्मांत्विहुराभि॑ः स्त्रवंन्ती᳘र्हृदान्कुक्षिभ्भ्यां ॐ समुद्रमुदरेणवैश्श्वानर
म्भस्म्मंना ॥ ८ ॥ [१] विधृंतिन्नाभ्भ्यां । घृतᳩरसेनापोयूष्णा
मरींचीर्व्विप्प्रुड्भिर्न्नीहारमूष्म्मणांशीनंव्वसंयाप्प्रुष्वा ऽ अश्श्रुंभिर्न्ह्रां
दुर्नीर्दूषीकांभिरुस्न्नारक्षां ॐ सिचित्राण्यङ्गैर्न्नक्षंत्राणिरूपेणंपृथिवी
न्त्वचाजुंम्म्बकायुस्वाहां ॥ ९ ॥ [१] हिरण्ण्यगब्भर्ःसम् ॥ हिरण्ण्य
गब्भर्ःसमंवर्त्ततात्ग्रेभूतस्य्यंजातःपतिरेकंऽआसीत् ॥ सदांधारपृथिवी
न्द्यामुतेमाङ्क्स्म्मैदेवायंहविषांव्विधेम ॥ १० ॥ सःप्प्राणतः ॥ सः

४० ५५७

संहि. प्प्राणतोनिमिषतोमहित्वैकऽइद्राजाजगतोबभूव ॥ यऽईशेऽअस्य उ. अ.
॥३१॥ द्विपदश्चतुष्पदःकस्मैदेवायहविषाविधेम ॥ ११ ॥ यस्येमे । हिमव ॥२५॥
न्तोमहित्वायस्यसमुद्रꣳरसयासहाहुः ॥ यस्येमाःप्प्रदिशोयस्यबा
हूकस्मैदेवायहविषाविधेम ॥ १२ ॥ यऽआत्मदा ॥ यऽआत्मदाब
लदायस्यविश्वऽउपासतेप्प्रशिषंयस्यदेवाः ॥ यस्यछायामृतंयस्य
मृत्युःकस्मैदेवायहविषाविधेम ॥ १३ ॥ [४] आनः ॥ आनोभ
द्राःक्रतवोयन्तुविश्वतोदब्धासोऽअपरीतासऽउद्भिदः ॥ देवानोय ॥३१॥

थासदमिद्वृधेऽअसन्नप्प्रायुवोरक्षितारोदिवेदिवे ॥ १४ ॥ देवानाम्भ
द्रा । सुमतिर्ऋजूयतान्देवानांꣳरातिरभिनोनिवर्त्तताम् ॥ देवानांꣳ
सक्ख्यमुपसेदिमाव्वयन्देवानऽआयुःप्प्रतिरन्तुजीवसे ॥ १५ ॥ तान्पू
र्व्वयानिविदाहूमहेव्वयम्भगम्मित्रमदितिन्दक्षमस्रिधम् ॥ अर्य्यम
णंव्वरुणꣳसोममश्विनासरस्वतीनःसुभगामयस्करत् ॥ १६ ॥ त
न्नः ॥ तन्नोव्वातोमयोभुव्वातुभेषजन्तन्मातापृथिवीतत्पिताद्यौः ॥ त
द्ग्रावाणःसोमसुतोमयोभुवस्तदश्विनाशृणुतन्धिष्ण्यायुवम् ॥ १७ ॥

वहि. तमीशानम् ॥ तमीशानञ्जगतस्तस्थुषस्पतिन्धियञ्जिन्वमवसे उ. भ.

॥४०॥ हूमहेव्वयम् ॥ पूषानोयथाव्वेदसामसंद्वृधेरंक्षितापायुरदंब्धःस्वस्तये ॥२५॥

॥ १८ ॥ स्वस्तिनः ॥ स्वस्तिनऽइन्द्रोवृद्धश्रवाःस्वस्तिनःपूषाव्विश्व

वेदाः ॥ स्वस्तिनस्तार्क्ष्योऽअरिष्टनेमिःस्वस्तिनोबृहस्पतिर्दधातु

॥ १९ ॥ पृषदश्वामरुतः ॥ पृषदश्वामरुतःपृश्निंमातरःशुभंय्यावा

नोव्विदथेषुजग्ग्मयः ॥ अग्निजिह्वामनवःसूरचक्षसोव्विश्वेनोदेवाऽअ

वसागमन्निह ॥ २० ॥ भद्रङ्कर्णेभिः । शृणुयामदेवाभद्रम्पश्येमाक्ष ॥४०॥

भिर्य्यजत्राः ॥ स्थिरैरङ्गैस्तुष्टुवाᳪंसस्तनूभिर्व्यशेमहिदेवहितंय्यदा
युः ॥ २१ ॥ शतमित् ॥ शतमिन्नुशरदोऽअन्तिदेवायत्त्रानश्चक्राज
रसन्तनूनाम् ॥ पुत्त्रासोयत्त्रपितरोभवन्तिमानोमद्ध्यारीरिषतायुर्ग्ग
न्तोः ॥ २२ ॥ अदितिर्द्यौरदितिरन्तरिक्षमदितिर्म्मातासपितासपु
त्त्रः ॥ विश्वेदेवाऽअदितिः पञ्चजनाऽअदितिर्ज्जातमदितिर्ज्जनित्वम्
॥ २३ ॥ [१०] मानः ॥ मानोमित्त्रोवरुणोऽअर्य्यमायुरिन्द्रऽऋभु
क्षामरुतः परिख्यन् ॥ यद्वाजिनोदेवजातस्यसप्तेः प्रवक्ष्यामोविद

थैद्धीरुर्व्वाणि ॥ २४ ॥ यन्निर्णिजा ॥ यन्निर्णिजारेक्णसाप्प्रावृतस्यरा
तिङ्गृभीताम्मुखतोनयन्ति ॥ सुप्प्राङजोमेम्म्यद्विश्वरूपऽइन्द्रापू
ष्णोःप्प्रियमप्प्येतिपाथः ॥ २५ ॥ एषच्छागः । पुरोऽअश्वेनव्वाजि
नापूष्णोभागोनीयतेव्विश्वदेव्व्यः ॥ अभिप्प्रियंय्यत्पुरोडाशमर्व्व
तात्त्वष्टेदेनꣳसौश्रवसायंजिन्न्वति ॥ २६ ॥ यद्धविष्ष्यम् ॥ यद्धवि
ष्ष्यमृतुशोदेवयानन्त्रिर्म्मानुषाःपर्य्यश्वन्नयन्ति ॥ अत्त्रापूष्णःप्प्र
थमोभागऽएतियज्ञन्देवेब्भ्यःप्प्रतिवेदयन्नजः ॥ २७ ॥ होताद्ध्व ॥४१॥

र्य्युः ॥ होताद्ध्वर्य्युरावयाऽअग्निमिन्धोग्ग्रावग्ग्राभऽउतशꣳस्तासुवि
प्प्रः ॥ तेनयज्ञेनस्वरङ्कृतेनस्विष्टेनवक्षणाऽआपृणद्ध्वम् ॥ २८ ॥ यूपव्व्र
स्काऽउत । येयूपवाहाश्चषालँय्येऽअश्वयूपायतक्षति ॥ येचार्व्वतेपच
नꣳसम्भरन्त्युतोतेषामभिगूर्त्तिर्न्नऽइन्न्वतु ॥ २९ ॥ उपप्प्र ॥ उपप्प्रागा
त्सुमन्न्मेधायिमन्न्मदेवानामाशाऽउपवीतपृष्ठः ॥ अन्वेनंविप्प्राऽऋष
योमदन्तिदेवानाम्पुष्टेचकृमासुबन्धुम् ॥ ३० ॥ यद्वाजिनः ॥ यद्वा
जिनोदामसन्दानमर्व्वतोयाशीर्षण्यारशनारज्जुरस्य ॥ यद्वाघास्यप्प्र

भृतमास्येतृणꣳसर्वातातेऽअपिदेवेष्वस्तु ॥ ३१ ॥ [८] यदश्वस्य
क्रविषोमक्षिकाशयद्वास्वरौस्वधितौरिप्तमस्ति ॥ यद्धस्तयोःशमितु
र्यन्नखेषुसर्वातातेऽअपिदेवेष्वस्तु ॥ ३२ ॥ यदूवध्यम् ॥ यदूवध्यमु
दरस्यापवातियऽआमस्यक्रविषोगन्धोऽअस्ति ॥ सुकृतातच्छमिता
रः कृण्वन्तुतमेधꣳशृतपाकम्पचन्तु ॥ ३३ ॥ यत्ते ॥ यत्तेगात्रादग्नि
नापच्यमानादभिशूलन्निहतस्यावधावति ॥ मातद्भूम्यामाश्रिष
न्मातृणेषुदेवेभ्यस्तदुशद्भ्योरातमस्तु ॥ ३४ ॥ येवाजिनम् ॥ येवा

जिनम्परिपश्यन्तिपुक्वंय्यऽईमाहुःसुरभिर्न्निर्हरेति ॥ येचार्वतोमाꣳ
सभिक्षामुपासंतऽउतोतेषामभिगूर्तिर्न्नऽइन्वतु ॥३५॥ यन्नीक्षणम् ॥
यन्नीक्षणम्माꣳस्पचन्न्याऽउखायायापात्राणियूष्णऽआसेचनानि ॥
ऊष्मण्यापिधानाचरूणामङ्काःसूनाःपरिभूषन्त्यश्वम् ॥ ३६ ॥
मात्वा ॥ मात्वाग्निर्ध्वनयीद्धूमगन्धिर्म्मोखाभ्राजन्त्यभिविक्तज
घ्रिः ॥ इष्टंवीतमभिगूर्तंवषट्कृतन्तन्देवासःप्प्रतिगृब्भ्णन्त्यश्वम्
॥३७॥ निक्क्रमणन्निषदनम् ॥ निक्क्रमणन्निषदनंव्विवर्तनंयच्चपड्वीश

वा.सं. सर्व्वंतं ॥ यच्चंपपौयच्चंघासिञ्जघाससर्व्वातातेऽअपिदेवेष्ष्वस्तु ॥३८॥ उ. ब.

॥४३॥ यदश्श्वांय ॥ यदश्श्वांयुव्वासंऽउपस्तृणन्त्यंधीवासंय्याहिरंण्यान्न्य ॥२५॥

स्म्मै ॥ सन्दानमर्व्वन्तम्पड्वींशम्प्रियादेवेष्ष्वायांमयन्ति ॥ ३९ ॥ [८]

यत्ते । सादेमहंसाशूकंतस्यपार्ष्ण्यांवाकशंयावातुतोदं ॥ स्रुचेवताह

विषोंऽअद्ध्वरेषुसर्व्वातातेब्रह्मंणासूदयामि ॥ ४० ॥ चतुंस्त्रिꣳशद्वाजि

नंः ॥ चतुंस्त्रिꣳशद्वाजिनोंदेवबंन्धोर्व्वङ्क्रीरश्श्वंस्यस्वधिंतिꣳसमेंति ॥

अच्छिंद्द्रागात्त्रांव्वयुनांकृणोतपरुंष्ष्परुंरनुघुष्ष्याव्विशंस्त ॥ ४१ ॥ ॥४३॥

एकस्त्वष्टुः ॥ एकस्त्वष्टुरश्वस्याविशस्ताद्वायन्तारा भवतस्तथ

ऽऋतुः ॥ याते गात्राणामृतुथा कृणोमि ताता पिण्डानाम्प्रजुहोम्यग्नौ

॥ ४२ ॥ मात्वातपत्प्रियऽआत्मापियन्तम्मास्वधितिस्तन्वऽआति

ष्ठिपत्ते ॥ मातेगृध्नुरविशस्तातिहायच्छिद्रागात्राण्यसिनामिथूकः

॥४३॥ नवै ॥ नवाऽउऽएतन्म्रियसेनरिष्यसिदेवाँ२ इदेषिपथिभिः

सुगेभिः ॥ हरीतेयुञ्जापृषतीऽअभूतामुपास्थाद्वाजीधुरिरासभस्य

॥ ४४ ॥ सुगव्यन्नः ॥ सुगव्यन्नोवाजीस्वश्व्यम्पुꣳसःपुत्राँ२ उतविश्वा

संहि. ॥४४॥

श्वापुषꣳरयिम् ॥ अनागास्त्वन्नोऽअदितिःकृणोतुक्षत्रन्नोऽअश्वोवन उ. अ. ॥२५॥
ताꣳहविष्म्मान् ॥ ४५ ॥ [६] इमानु । कम्भुवनासीषधामेन्द्रश्च
विश्वेचदेवाः ॥ आदित्यैरिन्द्रःसगणोमरुद्भिरस्म्मभ्यम्भेषजाक
रत् ॥ यज्ञञ्चनस्तन्वञ्चप्प्रजाञ्चादित्यैरिन्द्रः सहसीषधाति ॥ ४६ ॥
अग्नेत्वन्नोऽअन्तं । मऽउतत्त्राताशिवोभवावरूथ्यः ॥ वसुरग्नि
र्व्वसुश्रवाऽअच्छानक्षिद्युमत्तमꣳरयिन्दाः ॥ तन्त्वाशोचिष्ठदीदि
वꣳसुम्म्नायनूनमीमहेसखिभ्यः ॥४७॥ [२] इति श्रीवाजसनेय ॥४४॥

संहितायां पञ्चविंशोऽध्यायः ॥ २५ ॥

अथानुवाकसूत्रम् । अग्निश्चपञ्चदशोच्चातएकादश द्वौ षड्विꣳश
तिः ॥ हरिः ॐ अग्निश्च । पृथिवीचसन्नंतेतेमेसन्नंमतामदोवायुश्चा
न्तरिक्षञ्चसन्नंतेतेमेसन्नंमतामद ऽआदित्यश्चद्यौश्चसन्नंतेतेमेसन्नंमता
मदऽआपश्चवरुणश्चसन्नंतेतेमेसन्नंमतामदः ॥ सप्तसꣳसदोऽअष्ट
मीभूंतसाधनी ॥ सकामाँ२ऽअध्वनस्कुरुसंज्ञानेमस्तुमेमुना ॥ १ ॥
यथेमाम् ॥ यथेमांवाचङ्कल्याणीमावदानिजनेभ्यः ॥ ब्रह्मराज

संहि. न्याभ्याᳪशूद्रायचार्य्यायचस्वायचारणायच ॥ प्रियोदेवानान्द उ. अ.
॥४५॥ क्षिणायैदातुरिहभूयासमयम्मेकामःसमृध्यतामुपमादोनमतु ॥ २ ॥ ॥२६॥
बृहस्पतेऽअति ॥ बृहस्पतेऽअतियदर्य्योऽअर्हाद्द्युमद्विभातिक्रतुमज्
ज्जनेषु ॥ यद्दीदयच्छवसऽऋतप्रजाततदस्मासुद्रविणन्धेहिचित्र
म् ॥ उपयामगृहीतोसिबृहस्पतयेत्वैषतेयोनिर्बृहस्पतयेत्वा ॥ ३ ॥
इन्द्रगोमन् ॥ इन्द्रगोमन्निहायाहिपिबासोमᳪशतक्रतो ॥ विद्यद्भि
र्ग्रावभिःसुतम् ॥ उपयामगृहीतोसीन्द्रायत्वागोमतऽएषतेयोनिरि ॥४५॥

न्द्रायत्त्वागोमंते ॥ ४ ॥ इन्द्रायाहि ॥ इन्द्रायाहिवृत्रहन्पिबासोमꣳ
शतक्रतो ॥ गोमद्भिर्ग्रावभिꣳसुतम् ॥ उपयामगृहीतोसीन्द्रायत्वा
गोमंतऽएषतेयोनिरिन्द्रायत्वागोमंते ॥ ५ ॥ ऋतावानंवैश्वानरम् ॥
ऋतावानंवैश्वानरमृतस्यज्योतिषस्पतिम् ॥ अजंस्रङ्घर्म्ममीमहे ॥
उपयामगृहीतोसिवैश्वानरायत्वैषतेयोनिर्वैश्वानरायत्वा ॥ ६ ॥ वै
श्वानरस्यसुमतौ । स्यामराजाहिकम्भुवनानामभिश्रीः ॥ इतोजा
तोविश्वमिदंविचष्टेवैश्वानरोयततेसूर्य्येण ॥ उपयामगृहीतोसिवै

॥४६॥ श्वानरायंत्वैषतेयोनिर्व्वैश्वानरायंत्वा ॥ ७ ॥ व्वैश्वानरोनः ॥ व्वैश्वान
रोनऽऊतयऽआप्प्रयांतुपरावतः ॥ अग्निरुक्थेनवाहंसा ॥ उपयामगृ ॥२६॥
हीतोसिव्वैश्वानरायंत्वैषतेयोनिर्व्वैश्वानरायंत्वा ॥ ८ ॥ अग्निर्ऋषिः ॥
अग्निर्ऋषिःपवमानःपाञ्चजन्यःपुरोहितः ॥ तमीमहेमहागयम् ॥
उपयामगृहीतोस्यग्नयेत्वाव्वर्चसऽएषतेयोनिरग्नयेत्वाव्वर्चसे ॥ ९ ॥
महाँ२ऽइन्द्रः ॥ महाँ२ऽइन्द्रोव्वज्रहस्तःषोडशीशर्म्मयच्छतु ॥ ह
न्तुपाप्मानंय्योस्मान्द्वेष्टि ॥ उपयामगृहीतोसिमहेन्द्रायंत्वैषते ॥४६॥

योनिर्म्महेन्द्रायंत्वा ॥ १० ॥ तंवं÷ ॥ तंव्वोदुस्म्ममृतीषहंव्वसोर्म्मन्दा
नमन्धंसः ॥ अभिवुत्सन्नस्वसंरेषुधेनवऽइन्द्रंङ्गीर्ब्भिर्न्नवामहे ॥ ११ ॥
यद्वाहिंष्ठम् ॥ यद्वाहिंष्ठन्तदुग्नयेबृहदंर्च्चविभावसो ॥ महिंषीवुत्व
द्रयिस्त्वद्वाजाऽउदींरते ॥ १२ ॥ एहिं ॥ एह्यूषुब्रवांणितेग्नंऽइत्थे
तरागिरं÷ ॥ एभिर्व्वर्द्धासऽइन्दुंभिः ॥ १३ ॥ ऋतवंस्ते ॥ ऋतवंस्तेयुज्ञं
व्वितंन्वन्तुमासारक्षन्तुतेहविं÷ ॥ संव्वत्सरस्तेंयुज्ञन्दधातुनःप्प्रजाञ्च
परिंपातुनः ॥ १४ ॥ उपह्वरेगिरीणाम् ॥ उपह्वरेगिरीणाꣳसंङ्गमेचंन

संहि. दीनाम् ॥ धियाव्विप्प्रोऽअजायत ॥ १५ ॥ [१५] उच्चाते ॥ उच्चाते उ. अ.
॥४७। जातमन्धसोदिविसद्भूम्म्याददे ॥ उग्ग्रꣳशर्म्ममहिश्श्रवः ॥ १६ ॥ ॥२६॥
सनः ॥ सनऽइन्द्राययज्ज्यवेव्वरुणायमरुद्भ्यः ॥ व्वरिवोवित्परिस्स्रव
॥ १७ ॥ एनाव्विश्श्वानि ॥ एनाव्विश्श्वान्न्यर्य्यऽआद्युम्म्नानिमानुषाणा
म् ॥ सिषासन्तोव्वनामहे ॥ १८ ॥ अनुवीरैः ॥ अनुवीरैरनुपुष्ष्यास्म्मगो
भिरन्न्वश्श्वैरनुसर्व्वैणपुष्टैः ॥ अनुद्विपदानुचतुष्ष्पदाव्वयन्देवानोयज्ञ
मृतुथानयन्तु ॥ १९ ॥ अग्नेपत्नीः ॥ अग्नेपत्नीरिहावहदेवानामु ॥४७॥

शतीरूपं ॥ त्वष्टारꣳसोमंपीतये ॥ २० ॥ अभियज्ञम् ॥ अभियज्ञंगृ
णीहिनोग्नावोनेष्टःपिबऽऋतुना ॥ त्वꣳहिरत्नधाऽअसि ॥ २१ ॥
द्रविणोदाःपिपीषति । जुहोतप्रचतिष्ठत ॥ नेष्ट्रादृतुभिरिष्यत
॥ २२ ॥ तवायम् ॥ तवायꣳसोमस्त्वमेह्यर्वाङ्शश्वत्तमꣳसुमनाऽअ
स्यपाहि ॥ अस्मिन्यज्ञेबर्हिष्यानिषद्यादधिष्वेमंजठरऽइन्दुमि
न्द्र ॥ २३ ॥ अमेवनः ॥ अमेवनःसुहवाऽआहिगन्तननिबर्हिषिसद
तनारनिष्टन ॥ अथामन्दस्वजुजुषाणोऽअन्धसस्त्वष्टर्देवेभिर्जनि

भिःसुमद्गणः ॥ २४ ॥ स्वादिष्ठयामदिष्ठया ॥ स्वादिष्ठयामदिष्ठया
पवस्वसोमधारया ॥ इन्द्रायपातवेसुतः ॥ २५ ॥ रक्षोहाविश्वचर्षणि
रभियोनिमयोहते ॥ द्रोणेसधस्थमासदत् ॥ २६ ॥ [११] इति श्री
वाजसनेयसंहितायां षड्विंशतितमोऽध्यायः ॥ २६ ॥

अथानुवाकसूत्रम् । समास्त्वादशोर्द्धाअस्यपीवोअन्नाद्द्वादशका
वभित्वैकादश चत्वारः पञ्चचत्वारिꣳशत् ॥ हरिः ॐ समास्त्वा ॥
समास्त्वाग्नऽऋतवोवर्द्धयन्तुसंवत्सराऽऋषयोयानिसत्या ॥ सन्दि ॥४८॥

व्येनदीदिहिरोचनेनविश्श्वाऽआभाहिप्प्रदिशश्चतस्रः ॥ १ ॥ सञ्चेद्ध
स्वाग्नेप्प्रचबोधयैनमुच्चतिष्ठमहतेसौभगाय ॥ माचरिषदुपसत्तातेऽ
अग्नेब्रह्माणस्तेयशसःसन्तुमान्ये ॥ २ ॥ त्वामग्ग्ने ॥ त्वामग्ग्ने
वृणतेब्राह्मणाऽइमेशिवोऽअग्ग्नेसंव्वरणेभवानः ॥ सपत्नहानोऽअ
भिमातिजिच्चस्वेगयेजागृह्यप्प्रयुच्छन् ॥ ३ ॥ इहैव ॥ इहैवाग्नेऽअ
धिधारयारयिम्मात्वानिक्रन्पूर्व्वचितोनिकारिणः ॥ क्षत्रमग्नेसुयम
मस्तुतुभ्यमुपसत्तावर्द्धतान्तेऽअनिष्टृतः ॥ ४ ॥ क्षत्रेणाग्ने ॥ क्षत्रे

णाग्नेस्वायुꣳसꣳरभस्वमित्त्रेणाग्नेमित्त्रधेयेयतस्व ॥ सजातानाम्मद्ध्य
मस्थाऽएधिराज्ञामग्नेविहव्योदीदिहीह ॥ ५ ॥ अतिनिहः ॥ अति
निहोऽअतिस्त्रिधोत्त्यचित्तिमत्त्यरातिमग्ने ॥ विश्वाह्यग्नेदुरितासह
स्वाथास्म्मभ्भ्यꣳसहवीराꣳरयिन्दाः ॥ ६ ॥ अनाधृष्योजातवे
दाः ॥ अनाधृष्योजातवेदाऽअनिष्टृतोविराडग्नेक्षत्त्रभृद्दीदिहीह ॥
विश्वाऽआशाः प्प्रमुञ्चन्मानुषीर्भियः शिवेभिरद्यपरिपाहिनोवृधे
॥ ७ ॥ बृहस्प्पतेसवितः ॥ बृहस्प्पतेसवितर्बोधयैनꣳसꣳशितञ्चित्स ॥४९॥

न्तरा॑ᳫंसह॑शिशाधि ॥ वृर्द्धयै॑नम्मह॒ते सौभ॑गायुविश्श्वे॑ऽएनुमनु॑मद
न्तुदे॒वाः ॥ ८ ॥ अमुत्रभूयादधं ॥ अमु॒त्रभू॒याद॒धय॒द्यमस्य॒बृह॑स्पते
ऽअभिश॑स्तेरमु॑ञ्चः ॥ प्रत्यौ॑हतामुश्श्विनामृत्युम॑स्म्माद्दे॒वाना॑मग्ने॒भिष
जाशची॑भिः ॥ ९ ॥ उद्वयम् ॥ उद्व॒यन्तम॑स॒स्पपरि॒स्व॒ः पश्श्य॑न्तु॒ऽउ
त्त॑रम् ॥ दे॒वन्दे॑व॒त्त्रासूर्य॑मग॑न्म॒ज्ज्योति॑रुत्तमम् ॥ १० ॥ [१०]
ऊर्द्ध्वाऽअंस्यस॒मिधो॑भवन्त्यू॒र्द्ध्वाशुक्राशो॒ची॑ᳫंष्य॒ग्नेः ॥ द्युमत्त॑मासु
प्प्रतीक॑स्य॒सूनोः ॥ ११ ॥ तनूनपादसुरः ॥ तनू॒नपा॑दसु॒रो वि॒श्श्ववे॑दादे॒वो

देवेषुदेवः ॥ पथोऽअनक्तुमद्ध्वाघृतेनं ॥ १२ ॥ मद्ध्वांयज्ञम् ॥ मद्ध्वां
यज्ञन्नंक्षसेप्प्रीणानोनराशꣳसोऽअग्ने ॥ सुकृद्देवःसंविताविश्ववारः
॥ १३ ॥ अच्छायम् । अच्छायमेतिशवंसाघृतेनेडानोवह्निर्नमंसा ॥
अग्निꣳस्रुचोऽअद्ध्वरेषुप्प्रयत्सु ॥ १४ ॥ सयंक्षत् ॥ सयंक्षदस्यमहि
मानंमग्नेःसऽईम्मन्द्रासुप्प्रयसंः ॥ वसुश्चेतिंष्ठोवसुधातंमश्च ॥ १५ ॥
द्वारोदेवीः ॥ द्वारोदेवीरन्वंस्यविश्वेव्व्रतादंदन्तेऽअग्नेः ॥ उरुव्यचंसो
धाम्नापत्यंमानाः ॥ १६ ॥ तेऽअंस्य ॥ तेऽअंस्ययोषंणेदिव्येनयोऽ

नाऽउषासानक्ता ॥ इमंय्यज्ञमवतामद्धरन्नः ॥ १७ ॥ दैव्याहोतारा । ऽऊर्द्ध्वमद्धरन्नोग्नेर्जिह्वामभिगृणीतम् ॥ कृणुतन्नः स्विष्टिम् ॥ १८ ॥ तिस्रोदेवीः ॥ तिस्रोदेवीर्ब्बर्हिरेदꣳसदन्त्विडासरस्वतीभारती ॥ महीगृणाना ॥ १९ ॥ तन्नः ॥ तन्नस्तुरीपमद्भुतम्पुरुक्षुत्त्वष्टासुवीर्य्यम् ॥ रायस्पोषंव्विष्ष्यतुनाभिमस्म्मे ॥ २० ॥ व्वनस्प्पतेवसृजाररराणस्त्मनादेवेषु ॥ अग्निर्हव्व्यꣳशमितासूदयाति ॥ २१ ॥ अग्नेस्वाहा । कृणुहिजातवेदऽइन्द्रायहव्व्यम् ॥ व्विश्वेदेवाहविरिदञ्जु

५४१

यं.हि. षन्ताम् ॥ २२ ॥ [१२] पीवोऽअन्नारयिवृधः । सुमेधाःश्वेतःसि उ. अ
॥५१॥ षक्तिनियुतामभिश्रीः ॥ तेवायवेसमनसोवितस्थुर्विश्वेन्नरःस्वप ॥२७॥
त्यानिचक्रुः ॥ २३ ॥ रायेनु । यञ्जज्ञतूरोदसीमेरायेदेवीधिषणाधाति
देवम् ॥ अधवायुन्नियुतःसश्चतस्वाऽउतश्वेतंवसुधितिन्निरेके ॥ २४ ॥
आपोह ॥ आपोहयद्बृहतीर्विश्वमायन्गर्भन्दधानाजनयन्तीर
ग्निम् ॥ ततोदेवानाᳫसमवर्त्ततासुरेकःकस्मैदेवायहविषाविधेम
॥ २५ ॥ यश्चित् ॥ यश्चिदापोमहिनापर्यपश्यद्दक्षन्दधानाजनयन्ती ॥५१॥

र्यज्ञम् ॥ सोदेवेष्वधिदेवऽएकऽआसीत्कस्मैदेवायहविषाविधेम
॥ २६ ॥ प्रयाभिः ॥ प्रयाभिर्यासिदाश्वाᳪ᳭समच्छानियुद्भिर्वायवि
ष्टयेदुरोणे ॥ निनोरयिᳪ᳭सुभोजसंयुवस्वनिवीरङ्गव्यमश्व्यञ्चरा
धः ॥ २७ ॥ आनः ॥ आनोनियुद्भिः शतिनीभिरध्वरᳪ᳭सहस्रिणी
भिरुपयाहियज्ञम् ॥ वायोऽअस्मिन्त्सवनेमादयस्वयूयम्पातस्वस्ति
भिःसदानः ॥ २८ ॥ नियुत्वान्वायो ॥ नियुत्वान्वायवागह्ययᳪ᳭शु
क्रोऽअयामिते ॥ गन्तासिसुन्वतोगृहम् ॥ २९ ॥ वायोशुक्रः ॥ वायो

संहि. ॥५२॥ शुक्रोऽअयामितेमद्ध्वोऽअग्रन्दिविष्टिषु ॥ आयाहिसोमंपीतयेस्पा उ. अ.
र्होदेवनियुत्वंता ॥ ३० ॥ वायुरंग्रेगाः ॥ वायुरंग्रेगायंज्ञप्रीःसाक ॥२७॥
ङ्कन्मनसायज्ञम् ॥ शिवोनियुद्भिः शिवाभिः ॥ ३१ ॥ वायोये । तेस
हस्रिणोरथांसस्तेभिरागंहि ॥ नियुत्वान्त्सोमंपीतये ॥ ३२ ॥ एकंया
च । दशभिश्श्वस्वभूतेद्वाभ्यामिष्टयेविंशतीचं ॥ तिसृभिश्श्ववहंसे
त्रिंशताचनियुद्भिर्वायविहताविमुञ्च ॥ ३३ ॥ तवंवायो ॥ तवंवाय
वृतस्पतेत्वष्टुर्जामातरद्भुत ॥ अवाठंस्यावृणीमहे ॥ ३४ ॥ [१२] ॥५२॥

अभित्वा । शूरनोनुमोदुग्धाऽइवधेनवः ॥ ईशानमस्यजगतःस्वर्दृ
शमीशानमिन्द्रतस्थुषः ॥ ३५ ॥ नत्वावान् ॥ नत्वावाँ२ऽअन्यो
दिव्योनपार्थिवोनजातोनजनिष्यते ॥ अश्वायन्तोमघवन्निन्द्रवा
जिनोगव्यन्तस्त्वाहवामहे ॥ ३६ ॥ त्वामित् ॥ त्वामिद्धिहवामहेसा
तौवाजस्यकारवः ॥ त्वांवृत्रेष्विन्द्रसत्पतिन्नरस्त्वाङ्काष्ठास्वर्वतः
॥ ३७ ॥ सत्वम् ॥ सत्वन्नश्चित्रवज्रहस्तधृष्णुयामहस्तवानोऽअ
द्रिवः ॥ गामश्वंरथ्यमिन्द्रसङ्किरसत्रावाजन्नजिग्युषे ॥ ३८ ॥

कयानः ॥ कयानश्चित्रऽआभुवदूतीसदावृधःसखा ॥ कयाशचिष्ठ
यावृता ॥ ३९ ॥ कस्त्वा । सत्योमदानाम्मꣳहिष्ठोमत्सदन्धसः ॥ दृढा
चिदारुजेवसु ॥ ४० ॥ अभीषुणः ॥ अभीषुणःसखीनामविताजरि
तॄणाम् ॥ शतम्भवास्यूतये ॥ ४१ ॥ यज्ञायज्ञावः ॥ यज्ञायज्ञावोऽअ
ग्नयेगिरागिराचदक्षसे ॥ प्रप्रवयममृतञ्जातवेदसम्प्रियम्मित्रन्नशꣳ
सिषम् ॥ ४२ ॥ पाहिनः ॥ पाहिनोऽअग्नऽएकयापाह्युतद्वितीयया ॥
पाहिगीर्भिस्तिसृभिरूर्जाम्पतेपाहिचतसृभिर्वसो ॥ ४३ ॥ ऊर्जोन

पातम् ॥ ऊर्ज्जोनपातꣳसहिनायमस्म्मयुर्द्दाशेमहव्व्यदातये ॥ भुव
द्वाजेष्ष्ववितांभुवद्वृधऽउतत्त्रातातनूनाम् ॥ ४४ ॥ संव्वत्सरोसि । परि
वत्सरोसीदावत्सरोसीद्वत्सरोसिव्वत्सरोसि ॥ उषसस्तेकल्पन्ताम
होरात्रास्तेकल्पन्तामर्द्धमासास्तेकल्पन्ताम्मासास्तेकल्पन्तामृत
वस्तेकल्पन्ताꣳसंव्वत्सरस्तेकल्पताम् ॥ प्रेत्याऽएत्यैसञ्चाञ्चप्प्रच
सारय ॥ सुपर्ण्णचिदसितयादेवतयाङ्गिरस्वद्ध्रुवःसीद ॥ ४५ ॥ [११]
इति श्रीवाजसनेयसंहितायां सप्तविंशोऽध्यायः ॥ २७ ॥

अथानुवाकसूत्रम् ॥ होतायक्षदेकादश देवम्बर्हिर्द्वादश पुनरप्येवं
चत्वारः षट्चत्वारिꣳशत् ॥ हरिः ॐ होतायक्षत् ॥ होतायक्षत्समि
धेन्द्रमिडस्पदेनाभापृथिव्याऽअधि ॥ दिवोवर्ष्मन्त्समिध्यतऽ
ओजिष्ठश्चर्षणीसहांवेत्वाज्यस्यहोतर्यज ॥ १ ॥ होतायक्षत्तनूनपा
तमूतिभिर्जेतारमपराजितम् ॥ इन्द्रन्देवꣳस्वर्विदम्पथिभिर्मधुमत्त
मैर्नराशꣳसेनतेजसावेत्वाज्यस्यहोतर्यज ॥ २ ॥ होतायक्षदिडा
भिरिन्द्रम् ॥ होतायक्षदिडाभिरिन्द्रमीडितमाजुह्वानममर्त्यम् ॥ ॥५४॥

देवोदेवैःसर्वैरुर्य्यौव्वज्रंहस्तःपुरन्दरोव्वेत्वाज्ज्यस्यहोतर्य्यज ॥३॥ हो
तायक्षद्वर्हिषीन्द्रम् ॥ होतायक्षद्वर्हिषीन्द्रंन्निषद्दुरंव्वृषभन्नर्य्यापसम् ॥
व्वसुभीरुद्रैरादित्यैःसयुग्भिर्व्वर्हिरासदद्वेत्वाज्ज्यस्यहोतर्य्यज ॥ ४ ॥
होतायक्षदोजोनव्वीर्य्यंसहोद्वारऽइन्द्रमवर्द्धयन् ॥ सुप्प्रायणाऽअ
स्मिन्न्यज्ञेव्विश्रयन्तामृतावृधोद्वार ऽ इन्द्रायमीढुषेव्यन्त्वाज्ज्यस्य
होतर्य्यज ॥ ५ ॥ होतायक्षदुषेऽइन्द्रस्य । धेनूसुदुघेमातरामही ॥
सवातरौनतेजसाव्वत्समिन्द्रमवर्द्धतांव्वीतामाज्ज्यस्यहोतर्य्यज ॥६॥

वा.सं. होतायक्षद्दैव्याहोतारा । भिषजासखायाहविषेन्द्रम्भिषज्यतः ॥ उ.अ.
॥५५॥ कवीदेवौप्प्रचेतसाविन्द्रायधत्त ऽ इन्द्रियंवीतामाज्यस्यहोतर्य्यज ॥२८॥
॥ ७ ॥ होतायक्षत्तिस्रोदेवीः ॥ होतायक्षत्तिस्रोदेवीर्न्नभेषजन्त्रयस्त्रि
धातवोपसऽइडासरस्वतीभारतीमहीः ॥ इन्द्रपत्नीर्हविष्मतीर्व्य
न्त्वाज्यस्यहोतर्य्यज ॥ ८ ॥ होतायक्षत्त्वष्टारमिन्द्रम् ॥ होतायक्ष
त्त्वष्टारमिन्द्रन्देवम्भिषजꣳसुयजङ्घृतश्रियम् ॥ पुरुरूपꣳसुरेतस
म्मघोनमिन्द्रायत्वष्टादधदिन्द्रियाणिवेत्वाज्यस्यहोतर्य्यज ॥ ९ ॥ ॥५५॥

होतायक्षद्वनस्पतिꣳशमितारम् ॥ होतायक्षद्वनस्पतिꣳशमितारꣳ
शतक्रतुन्धियोजोष्टारमिन्द्रियम् ॥ मध्वासमञ्जन्पथिभिःसुगेभिꣳ
स्वदातियज्ञम्मधुनाघृतेनव्वेत्वाज्यस्यहोतर्य्यज ॥ १० ॥ होतायक्ष
दिन्द्रꣳस्वाहा ॥ होतायक्षदिन्द्रꣳस्वाहाज्यस्यस्वाहामेदसꣳस्वा
हास्तोकानाꣳस्वाहास्वाहाकृतीनाꣳस्वाहाहव्यसूक्तीनाम् ॥ स्वा
हादेवाऽआज्यपाजुषाणाऽइन्द्रऽआज्यस्यव्यन्तुहोतर्य्यज ॥ ११ ॥
[११] देवम्बर्हिरिन्द्रꣳसुदेवन्देवैर्व्वीरवत्स्तीर्णंवेद्यामवर्द्धयत् ॥

वस्तोर्वृतम्प्राक्तोर्भृतꣳ रायाबर्हिष्मतोत्यगाद्वसुवनेवसुधेयस्यवेतु
यज ॥ १२ ॥ देवीर्द्वारः ॥ देवीर्द्वारऽइन्द्रꣳसङ्घातेवीड्वीर्यामन्नवर्द्ध
यन् ॥ आवत्सेनतरुणेनकुमारेणचमीवतापार्वाणꣳरेणुककाटन्नुद
न्तांवसुवनेवसुधेयस्यव्यन्तुयज ॥ १३ ॥ देवीऽउषासानक्ता ॥ देवी
ऽउषासानक्तेन्द्रंऽयज्ञेप्प्रयत्यह्वेताम् ॥ दैवीर्विशःप्प्रायासिष्टाꣳसु
प्प्रीतेसुधितेवसुवनेवसुधेयस्यवीतांऽयज ॥ १४ ॥ देवीजोष्ट्री ॥ देवी
जोष्ट्रीवसुधितीदेवमिन्द्रमवर्द्धताम् ॥ अयाव्यन्न्याघाद्द्वेषाꣳस्यान्या

वंक्षद्वसुव्वाऽस्याँणियजंमानायशिक्षितेव्वंसुवनेव्वसुधेयंस्यव्वीतांऽयज
॥ १५ ॥ देवीऽऊर्ज्जाहुती ॥ देवीऽऊर्ज्जाहुतीदुघेसुदुघेपयसेन्द्रंमवर्द्ध
ताम् ॥ इषमूर्ज्जमन्न्याव्वंक्षत्साग्ग्धिꣳसपीतिमन्न्यानवेनपूर्व्वन्दयंमा
नेपुराणेननवमधांतामूर्ज्जमूर्ज्जाहुती ऽ ऊर्ज्जयंमानेव्वसुव्वाऽस्याँणियज
मानायशिक्षितेव्वंसुवनेव्वसुधेयंस्यव्वीतांऽयज ॥ १६ ॥ देवादैव्व्या ॥
देवादैव्व्याहोतारादेवमिन्द्रंमवर्द्धताम् ॥ हताघशꣳसावाभाष्टांव्वसुव्वा
ऽस्याँणियजंमानायशिक्षितौव्वंसुवनेव्वसुधेयंस्यव्वीतांऽयज ॥ १७ ॥

॥५७॥ देवीस्तिस्रः ॥ देवीस्तिस्रस्तिस्रोदेवीःपतिमिन्द्रमवर्द्धयन् ॥ अस्पृ ॥२८॥
क्षद्भारतीदिवꣳरुद्रैर्यज्ञꣳसरस्वतीडावसुमतीगृहान्व्वसुवनेव्वसुधेयं
स्यव्व्यन्तुयज ॥ १८ ॥ देवऽइन्द्रः ॥ देवऽइन्द्रोनराशꣳसस्त्रिवरूथ
स्त्रिबन्धुरोदेवमिन्द्रमवर्द्धयत् ॥ शतेनशितिपृष्ठानामाहितꣳसहस्रेण
प्प्रवर्त्ततेमित्रावरुणेदस्यहोत्रमर्हतोबृहस्पतिस्तोत्रमश्विनाद्ध्वर्य्यवंव्व
सुवनेव्वसुधेयस्यव्वेतुयज ॥ १९ ॥ देवोदेवैः ॥ देवोदेवैर्व्वनस्पतिर्हि
रण्यपर्णोमधुशाखꣳसुपिप्पलोदेवमिन्द्रमवर्द्धयत् ॥ दिवमग्रेणा ॥५७॥

स्पृक्षुदान्तरिक्षम्पृथिवीमदृꣳहीद्वसुवनेव्वसुधेयस्यव्वेतुयज ॥ २० ॥
देवम्बर्हिः ॥ देवम्बर्हिर्व्वारितीनान्देवमिन्द्रमवर्द्धयत् ॥ स्वास
स्त्थमिन्द्रेणासन्नमन्न्याबर्हीꣳष्यभ्यभूद्वसुवनेव्वसुधेयस्यव्वेतुयज
॥ २१ ॥ देवोऽअग्निः ॥ देवोऽअग्निश्स्विष्टकृद्देवमिन्द्रमवर्द्धयत्
॥ स्विष्टङ्कुर्व्वन्त्स्विष्टकृत्स्विष्टमद्यकरोतुनोव्वसुवनेव्वसुधेयस्यव्वेतुयज
॥ २२ ॥ अग्निमद्यहोतारमवृणीतायंꣳयजमानःपचन्पक्तीःपच
न्पुरोडाशम्बध्नन्निन्द्रायच्छागम् ॥ सूपस्त्थाऽअद्यदेवोव्वनस्पति

 रभवृदिन्द्रायुच्छागेन ॥ अघुत्तम्मेदुस्तःप्प्रातिपच्चुताग्ग्रंभीदवीवृ
 धत्पुरोडाशेन ॥ त्वामुद्यऽऋषे ॥ २३ ॥ [१२] होतायक्षत् ॥ हो
तायक्षत्समिधानम्मुहद्यशुःसुसमिद्धं वरेण्यमुग्निमिन्द्रंव्वयोधसम् ॥
गायुत्रीञ्छन्दऽ इन्द्रियन्त्र्यविङ्गांव्वयोदधुद्धेत्वाज्ज्यंस्युहोतुर्य्यज
॥ २४ ॥ होतायक्षुत्तनूनपातमुद्भिदम् ॥ होतायक्षुत्तनूनपातमुद्भिदुं
ऽयङ्गर्भमदितिर्दुधेशुचिमिन्द्रंव्वयोधसम् ॥ उष्णिहुञ्छन्दऽइन्द्रि
यन्दित्युवाहुङ्गाव्वयोदधुद्धेत्वाज्ज्यंस्युहोतुर्य्यज ॥ २५ ॥ होताय

क्षदीडेन्यमीडितम् ॥ होतायक्षदीडेन्यमीडितंवृत्रहन्तमिडाभि
रीडयह्ंसहःसोममिन्द्रंवयोधसम् ॥ अनुष्टुभञ्छन्दऽइन्द्रियम्प
ञ्चाविङ्गाम्वयोदधद्वेत्वाज्यस्यहोतर्यज ॥ २६ ॥ होतायक्षत्सुबर्हि
षम्पूषण्वन्तम् ॥ होतायक्षत्सुबर्हिषम्पूषण्वन्तममर्त्यह्ंसीदन्तम्बर्हि
षिप्प्रियेमृतेन्द्रंवयोधसम् ॥ बृहतीञ्छन्दऽइन्द्रियन्त्रिवत्सङ्गाम्व
योदधद्वेत्वाज्यस्यहोतर्यज ॥ २७ ॥ होतायक्षद्व्यचस्वतीः
सुप्प्रायणाः ॥ होतायक्षद्व्यचस्वतीःसुप्प्रायणाऽऋतावृधोद्वारो

देवीहिरण्ययीर्ब्रह्माणमिन्द्रँवयोधसम् ॥ पङ्क्तिश्छन्दऽइहेन्द्रिय
न्तुर्य्यवाहङ्गाँवयोदधद्व्यन्त्वाज्ज्यस्यहोतर्य्यज ॥ २८ ॥ होता
यक्षत्सुपेशसासुशिल्पेबृहती ऽ उभेनक्तोषासानदर्शतेविश्श्वमिन्द्रँव
योधसम् ॥ त्रिष्टुभ्छन्दऽइहेन्द्रियम्पष्ठवाहङ्गाँवयोदधद्वीतामा
ज्ज्यस्यहोतर्य्यज ॥ २९ ॥ होतायक्षत्प्रचेतसादेवानामुत्तमंयशो
होतारादैव्याकवीसयुजेन्द्रँवयोधसम् ॥ जगतीश्छन्दऽइन्द्रियमन
ड्वाहङ्गाँवयोदधद्वीतामाज्ज्यस्यहोतर्य्यज ॥ ३० ॥ होतायक्ष ॥५९॥

त्पेशंस्वतीस्तिस्रः ॥ होतायक्षत्पेशस्वतीस्तिस्रोदेवीर्हिरण्ययीर्भा
रतीर्बृहतीर्म्महीः पतिमिन्द्रंव्वयोधसम् ॥ व्विराजञ्छन्दऽइहेन्द्रिय
न्धेनुङ्गान्नव्वयोदधद्व्यन्त्वाज्ज्यस्यहोतर्य्यज ॥ ३१ ॥ होतायक्षत्सु
रेतसन्त्वष्टारम् ॥ होतायक्षत्सुरेतसन्त्वष्टारम्पुष्टिवर्द्धनꣳरूपाणि
बिभ्रतम्पृथक्पुष्टिमिन्द्रंव्वयोधसम् ॥ द्विपदञ्छन्दऽइन्द्रियमुक्षा
णङ्गान्नव्वयोदधद्वेत्वाज्ज्यस्यहोतर्य्यज ॥ ३२ ॥ होतायक्षद्वनस्पतिꣳ
शमितारम् ॥ होतायक्षद्वनस्पतिꣳशमितारꣳशतक्रतुꣳहिरण्य

पर्ण्णमुक्त्थनंढ्रशुनाम्बिभ्रंतंवुशिम्भगुमिन्द्रंवयोधसंम् ॥ कुकु
भुञ्छन्दं ऽ इहेन्द्रियंवुशांवेहतुङ्गांवयोदधुद्धेत्वाज्ज्यंस्युहोतुर्य्यज
॥३३॥ होतांयक्षुत्स्वाहाकृतीरग्निम् ॥ होतांयक्षुत्स्वाहाकृतीरुग्निङ्गृ
हपंतिम्पृथुग्वरुणम्भेषुजङ्कविङ्क्षुत्रमिन्द्रंवयोधसंम् ॥ अतिंच्छन्द
सुञ्छन्दं ऽ इन्द्रियम्बृहदृषभङ्गांवयोदधुद्वचन्त्वाज्ज्यंस्युहोतुर्य्यज
॥ ३४ ॥ [११] देवम्बुर्हिः ॥ देवम्बुर्हिर्व्वयोधसंन्देवमिन्द्रमवर्द्धय
तु ॥ गायुत्र्याच्छन्दंसेन्द्रियञ्चक्षुरिन्द्रेवयोदधद्वसुवनेंवसुधेयंस्यवे ॥६०॥

तुयज ॥ ३५ ॥ देवीर्द्वारः ॥ देवीर्द्वारौवयोधसᳪ शुचिमिन्द्रमवर्द्धय
न् । उष्णिहाच्छन्दसेन्द्रियम्प्राणमिन्द्रेवयोदधद्वसुवनेवसुधेयस्य
व्यन्तुयज ॥ ३६ ॥ देवीऽउषासानक्ता । देवमिन्द्रंवयोधसंदेवीदेव
मवर्द्धताम् ॥ अनुष्टुभाच्छन्दसेन्द्रियम्बलमिन्द्रेवयोदधद्वसुवनेवसु
धेयस्यवीतांयज ॥ ३७॥ देवीजोष्ट्री ॥ देवीजोष्ट्रीवसुधितीदेवमि
न्द्रंवयोधसंदेवीदेवमवर्द्धताम् ॥ बृहत्याच्छन्दसेन्द्रियᳪश्रोत्रमि
न्द्रेवयोदधद्वसुवनेवसुधेयस्यवीतांयज ॥ ३८ ॥ देवीऊर्जाहु

ती ॥ देवीऽऊर्ज्जाहुतीदुघेसुदुघेपयसेन्द्रंव्वयोधसंन्देवीदेवमंवर्द्धताम्
॥ पुङ्क्याच्छन्दसेन्द्रियꣳशुक्रमिन्द्रेव्वयोदधंद्वसुवनेव्वसुधेयस्यव्वी
तांऽयजं ॥ ३९ ॥ देवादैव्यां ॥ देवादैव्याहोतारादेवमिन्द्रंव्वयोधसं
न्देवौदेवमंवर्द्धताम् ॥ त्रिष्टुभाच्छन्दसेन्द्रियंत्त्विषिमिन्द्रेव्वयोदधंद्व
सुवनेव्वसुधेयस्यव्वीतांऽयजं ॥ ४० ॥ देवीस्तिस्रः ॥ देवीस्तिस्रस्ति
स्रोदेवीर्व्वयोधसम्पतिमिन्द्रंमवर्द्धयन् ॥ जगत्याच्छन्दसेन्द्रियꣳशू
षमिन्द्रेव्वयोदधंद्वसुवनेव्वसुधेयस्यव्व्यन्तुयजं ॥ ४१ ॥ देवोनराशꣳ ॥६१॥

सं॑ ॥ दे॒वोन॑रा॒शꣳसो॑दे॒वमिन्द्रं॑व्वयो॒धस॑न्दे॒वोदे॒वमं॑वर्द्धयत् ॥
व्वि॒राज॒च्छन्द॑सेन्द्रि॒यꣳ रू॒पमिन्द्रे॒व्वयो॒दध॑द्वसु॒वने॑व्वसु॒धेय॑स्यव्वेतु॒य
ज॑ ॥ ४२ ॥ दे॒वोव्वन॒स्पति॑ ॥ दे॒वोव्वन॒स्पति॑र्दे॒वमिन्द्रं॑व्वयो॒धस॑
न्दे॒वोदे॒वमं॑वर्द्धयत् ॥ द्वि॒पदा॒च्छन्द॑सेन्द्रि॒यम्भग॒मिन्द्रे॒व्वयो॒दध॑द्वसु
वने॑व्वसु॒धेय॑स्यव्वेतु॒यज॑ ॥ ४३ ॥ दे॒वम्ब॒र्हिः ॥ दे॒वम्ब॒र्हिर्व्वारि॑तीना
न्दे॒वमिन्द्रं॑व्वयो॒धस॑न्दे॒वंदे॒वमं॑वर्द्धयत् ॥ क॒कुभा॒च्छन्द॑सेन्द्रि॒यंय्य
शऽइन्द्रे॒व्वयो॒दध॑द्वसु॒वने॑व्वसु॒धेय॑स्यव्वेतु॒यज॑ ॥ ४४ ॥ दे॒वोऽअ॒ग्निः ।

स्विष्टकृद्देवमिन्द्रंवयोधसन्देवोदेवमंवर्द्धयत् ॥ अतिच्छन्दसाच्छन्द-
सेन्द्रियङ्क्षत्रमिन्द्रेवयोदधद्वसुवनेवसुधेयस्यव्वेतुयज ॥ ४५ ॥ अग्नि
मद्यहोतारमवृणीतायंयजमानः पचन्पक्तीः पचन्पुरोडाशम्बध्न
न्निन्द्रायव्वयोधसेच्छागम् ॥ सूपस्थाऽअद्यदेवोव्वनस्पतिरभवदि
न्द्रायव्वयोधसेच्छागेन ॥ अघत्तम्मेदस्तःप्रतिपचताग्रभीदवीवृध
त्पुरोडाशेन ॥ त्वामद्यऽऋषे ॥ ४६ ॥ [१२] इति श्रीवाजसनेय
संहितायां अष्टाविंशोऽध्यायः ॥ २८ ॥

अथानुवाकसूत्रम् । समिद्धोअञ्जन्नेकादश यदक्रन्दस्त्रयोदश समिद्धोअद्यद्वादश केतुङ्कृण्वँश्चतुर्विंꣳशतिश्चत्वारः षष्टिः ॥ हरिः ॐ समिद्धोऽअञ्जन् ॥ समिद्धोऽअञ्जन्कृदरम्मतीनाङ्घृतमग्ने मधुमत्पिन्वमानः ॥ वाजीवहन्वाजिनञ्जातवेदो देवानांवक्षिप्प्रियमासधस्थम् ॥१॥ घृतेनाञ्जन् ॥ घृतेनाञ्जन्त्सम्पथो देवयानान्प्रजानन्वाज्ज्यप्प्येतु देवान् ॥ अनुत्वासप्तेप्प्रदिशः सचन्ताꣳस्वधामस्मै यजमानाय धेहि ॥ २ ॥ ईड्यश्च ॥ ईड्यश्चासिवन्द्यश्च वाजिन्नाशुश्चासिमेध्यश्च

सप्ते ॥ अग्निश्चांदेवैर्व्वसुभिः सजोषाः प्रीतव्वह्निं व्वहतु जातवेदाः ॥३॥
स्तीर्ण्णम्बर्हिः सुष्टरीमा जुषाणोरु पृथुप्प्रथमानम्पृथिव्व्याम् ॥ देवेभि
र्युक्तमदितिः सजोषाः स्योनङ्कृण्वाना सुविते दधातु ॥ ४ ॥ एताऽ
उवः । सुभगाव्विश्श्वरूपा व्विपक्षोभिः श्रयमाणाऽउदातैः ॥ ऋष्वाः
सतीः कवषः शुम्भमाना द्वारो देवीः सुप्प्रायणा भवन्तु ॥ ५ ॥ अन्तरा
मित्त्रावरुणा ॥ अन्तरा मित्त्रावरुणा चरन्ती मुखंय्यज्ञानामभिसंव्वि
दाने ॥ उषासावा ँ सुहिरण्ण्ये सुशिल्प्पेऽऋतस्य योनाविह सादयामि

॥ ६ ॥ प्रथमावाम् ॥ प्रथमावाꣳसरथिनासुवर्ण्णादेवौपश्यन्तौभुवं
नानिविश्श्वा ॥ अपिप्प्रयज्ञ्ञोदनावाम्मिमानाहोतारांज्योतिः प्रदि
शादिशन्ता ॥ ७॥ आदित्यैर्न्नः ॥ आदित्यैर्न्नोभारतीवष्टुयज्ञꣳसर
स्वतीसहरुद्द्रैर्न्नऽआवीत् ॥ इडोपहूताव्वसुभिःसजोषायज्ञन्नोदेवीरमृ
तेषुधत्त ॥ ८॥ त्वष्टारंव्वीरम् ॥ त्वष्टारंव्वीरन्देवकामञ्जजानत्वष्टुरर्वाजा
यतऽआशुरश्श्वः ॥ त्वष्टेदंव्विश्श्वम्भुवनञ्जजानबहोःकर्त्तारमिहयक्षि
होतः ॥ ९ ॥ अश्श्वोघृतेनत्मन्न्यासमक्तऽउपदेवाँ२ऽऋतुशःपाथऽए

तु ॥ वनस्पतिर्देवलोकम्प्रजानन्नग्निनाहव्यास्वदितानिवक्षत् ॥१०॥
प्रजापतेस्तपसा । वावृधानःसद्योजातोदधिषेयज्ञमग्ने ॥ स्वाहाकृते
नहविषापुरोगायाहिसाध्याहविरदन्तुदेवाः ॥ ११ ॥ [११] यदक्र
न्दः । प्रथमञ्जायमानऽउद्यन्त्समुद्रादुतवापुरीषात् ॥ श्येनस्यप
क्षाहरिणस्यबाहूऽउपस्तुत्यम्महिजातन्तेऽअर्वन् ॥ १२ ॥ यमेनद
त्तम् ॥ यमेनदत्तन्त्रितऽएनमायुनगिन्द्रऽएणम्प्रथमोऽअध्यतिष्ठत्
॥ गन्धर्वोऽअस्यरशनामगृभ्णात्सूरादश्वंवसवोनिरतष्ट ॥१३॥ असि ॥६४॥

यमः ॥ असिंयमोऽअस्यादित्योऽअर्वन्नसित्रितोगुह्येनव्रतेन ॥ आसि
सोमेनसमयाविपृक्तऽआहुस्तेत्रीणिदिविबन्धनानि ॥ १४ ॥ त्रीणि
ते ॥ त्रीणितऽआहुर्दिविबन्धनानित्रीण्यप्सुत्रीण्यन्तःसमुद्रे ॥ उतेव
मेवरुणश्छन्त्स्यर्वन्यत्रातऽआहुःपरमञ्जनित्रम् ॥ १५ ॥ इमाते
वाजिन्नवमार्जनानीमाशफानांᳪंसनितुर्निधाना ॥ अत्रातेभद्रारंश
नाऽअपश्यमृतस्ययाऽअभिरक्षन्तिगोपाः ॥ १६ ॥ आत्मानन्ते ॥
आत्मानन्तेमनसारादजानामवोदिवापतयन्तम्पतङ्गम् ॥ शिरोऽअ

संहि. पश्यम्पथिभिः सुगेभिररेणुभिर्जेहमानम्पतत्रि ॥ १७ ॥ अत्राते । रू उ. अ.
॥६५॥ पमुत्तममपश्यञ्जिगीषमाणमिषऽआपदेगोः ॥ यदातेमर्तोऽअनुभो ॥२९॥
गमानडादिद्ग्रसिष्ठऽओषधीरजीगः ॥ १८ ॥ अनुत्वा ॥ अनुत्वारथो
ऽअनुमर्य्योऽअर्वन्ननुगावोनुभगः कनीनाम् ॥ अनुव्रातासस्तवस
ख्यमीयुरनुदेवाममिरेवीर्य्यन्ते ॥ १९ ॥ हिरण्यशृङ्गोयः ॥ हिरण्य
शृङ्गोयोऽअस्यपादामनोजवाऽअवरऽइन्द्रऽआसीत् ॥ देवाऽइदस्यह
विरद्यमायन्योऽअर्वन्तम्प्रथमोऽअध्यतिष्ठत् ॥ २० ॥ ईर्म्मान्तासः ॥६५॥

सिलिकमध्यमासः ॥ ईर्मान्तासुःसिलिकमध्यमासुःसंशूरणासो

दिव्यासोऽअत्याः ॥ हुंसाऽइवश्रेणिशोयंतन्तेयदाक्षिषुर्दिव्य

मज्ममश्वाः ॥ २१ ॥ तवशरीरम् ॥ तवशरीरम्पतयिष्ण्वर्वन्तवंचि

त्तंवातऽइवध्रजीमान् ॥ तवशृङ्गाणिविष्ठितापुरुत्रारण्येषुजर्भुराणा

चरन्ति ॥ २२ ॥ उपप्र ॥ उपप्रागाच्छसनंवाज्यर्वादेवद्रीचामनं

सादीध्यानः ॥ अजःपुरोनीयतेनाभिरस्यानुपश्चात्कवयोयन्तिरेभाः

॥ २३ ॥ उपप्र ॥ उपप्रागात्परमंयत्सधस्त्थमर्वा२अच्छापि

संहि.
॥६६॥

तरंम्मातरंञ्च ॥ अद्यादेवाञ्जुष्टंतमोहिगम्म्याऽअथाशास्तेदाशुषेवा ऽउ. अ.
ऽर्य्याणि ॥ २४ ॥ [१३] समिंद्धोऽअद्य । मनुषोदुरोणेदेवोदेवान्य्यं ॥२९॥
जसिजातवेदः ॥ आचुवहंमित्रमहाश्चिकित्वान्त्वन्दूतश्कविरंसिप्प्र
चैताः ॥ २५ ॥ तनूंनपात्पथः ॥ तनूंनपात्पथऽऋतस्ययानान्म
द्ध्वांसमञ्जन्त्स्वंदयासुजिह्व ॥ मन्न्मांनिधीभिरुतयज्ञमृन्धन्देवत्राचं
कृणुह्यद्ध्वरन्नंः ॥ २६ ॥ नराशःसंस्यमहिमानंम् ॥ नराशःसंस्यम
हिमानंमेषामुपंस्तोषामयजतस्यंयज्ञैः ॥ येसुक्रतंवःशुचंयोधिय ॥६६॥

न्धाःस्वदन्तिदेवाऽउभयान्निहव्व्या ॥ २७ ॥ आजुह्वानऽईड्यः ॥
आजुह्वानऽईड्योव्वन्द्यश्चायाह्यग्नेव्वसुभिःसजोषाः ॥ त्वन्देवाना
मसियह्वहोतासऽएनान्यक्षीषितोयजीयान् ॥२८॥ प्राचीनम्बर्हिः ।
प्प्रदिशापृथिव्याव्वस्तोरस्याव्वृज्यतेऽअग्ग्रेऽअह्नाम् ॥ व्युप्प्रथतेव्वि
तरंव्वरीयोदेवेभ्योऽअदितयेस्योनम् ॥ २९ ॥ व्यचस्वतीरुर्व्विया ।
व्विश्रयन्ताम्पतिभ्योनजनयःशुम्भमानाः ॥ देवीर्द्वारोबृहतीर्व्विश्व
मिन्वादेवेभ्योभवतसुप्प्रायणाः ॥ ३० ॥ आसुष्ष्वयन्ती ॥ यजतेऽ

वं.हि. उपाकेऽउषासानक्क्तांसदतान्नियोनौ ॥ दिव्व्येयोषंणेबृहतीसुरुक्मेऽ उ. अ.
॥६७॥ अधिश्श्रियंꣳशुक्क्रपिशन्दधांने ॥ ३१ ॥ दैव्व्याहोतांरा । प्प्रथमासु ॥२९॥
व्वाचामिमांनायज्ञम्मनुंषोयजंद्ध्यै ॥ प्रचोदयंन्ताव्विदथेंषुकारूप्प्रा
चीनञ्ज्योतिंः प्प्रदिशांदिशन्तां ॥ ३२ ॥ आनंः ॥ आनोंयज्ञम्भा
रंतीतूयंमेत्विडांमनुष्ष्वदिहचेतयंन्ती ॥ तिस्त्रोदेवीर्ब्बर्हिरेदꣳस्योन
ꣳसरंस्वतीस्स्वपंसःसदन्तु ॥ ३३ ॥ यऽइमे । द्यावांपृथिवीजनिंत्रीरूपै
रपिंꣳशद्भुवंनानिव्विश्श्वां ॥ तमद्यहोंतरिषितोयजीयान्देवन्त्वष्टांर ॥६७॥

मिहर्य्यक्षिव्विद्वान् ॥ ३४ ॥ उपावसृजत्मन्न्या । समञ्जन्देवानाम्पा
थऽऋतुथाहवीꣳषि ॥ व्वनस्प्पतिः शमितादेवोऽअग्निःस्वदन्तुहव्य
म्मधुनाघृतेन ॥ ३५ ॥ सद्योजातः ॥ सद्योजातोव्व्यमिमीतयज्ञम
ग्निर्देवानामभवत्पुरोगाः ॥ अस्यहोतुः प्प्रदिश्यृतस्यव्वाचिस्वाहाकृ
तꣳहविरदन्तुदेवाः ॥ ३६ ॥ [१२] केतुङ्कृण्वन् ॥ केतुङ्कृण्वन्नके
तवेपेशोमर्य्याऽअपेशसे ॥ समुषद्भिरजायथाः ॥ ३७ ॥ जीमूतस्येव
भवति ॥ जीमूतस्येवभवतिप्प्रतीकंय्यद्वर्म्मीयातिसमदामुपस्थे ॥

अनाविद्धयातन्वाजयत्वꣳसत्वाव्वर्म्मणोमहिमापिपर्त्तु ॥ ३८ ॥
धन्वनागाः ॥ धन्वनागाधन्वनाजिञ्जयेमधन्वनातीव्राःसमदोज
येम॥धनुःशत्रोरपकामङ्कृणोतिधन्वनासर्व्वाःप्प्रदिशोजयेम॥३९॥
व्वक्ष्यन्तीवेत् ॥ व्वक्ष्यन्तीवेदागनीगन्तिकर्ण्णम्प्रियꣳसखायम्परिष
स्वजाना ॥ योषेवशिङ्क्तेव्वितताधिधन्वञ्ज्याऽइयꣳसमनेपारयन्ती
॥४०॥ तेऽआचरन्ती ॥ तेऽआचरन्तीसमनेवयोषामातेवपुत्रम्बिभृ
तामुपस्थे ॥ अपशत्रून्विध्यताꣳसंव्विदानेऽआर्त्नीऽइमेव्विष्फुरन्ती ॥६८॥

ऽअमित्रांन् ॥ ४१ ॥ बह्वीनाम्पिता । बहुरंस्यपुत्राश्चिश्चाकृणोतिसमं
नावगत्यं ॥ इषुधिःसङ्काःपृतनाश्चसर्वाःपृष्ठेनिनंद्धोजयतिप्रसूतः
॥ ४२ ॥ रथेतिष्ठंन् ॥ रथेतिष्ठन्नयतिवाजिनंःपुरोयत्रंयत्रकामयंतेसु
षारथिः ॥ अभीशूंनाम्महिमानंम्पनायतमनंःपश्चादनुंयच्छन्तिर
श्म्मयंः ॥ ४३ ॥ तीव्रान्घोषांन् ॥ तीव्रान्घोषांन्कृण्वतेवृषंपाणयो
श्वारथेभिःसहवाजयंन्तः ॥ अवक्रामंन्तःप्प्रपंदैरमित्रांन्क्षिणन्ति
शत्रूँ१रनंपव्ययन्तः ॥ ४४ ॥ रथवाहंणःहविः ॥ रथवाहंणःहवि

सं॰हि॰ ॥६१॥ रस्यनामुसत्राायुधन्निहितमस्यवर्म्म ॥ तत्रारथमुपशग्मꣳसदेमाव्वि उ. अ. ॥२९॥

श्वाहाव्वयꣳसुमनस्यमानाः ॥ ४५ ॥ स्वादुषꣳसदः पितरः ॥ स्वादु

षꣳसदः पितरोव्वयोधाः कृच्छ्रेश्रितꣳशक्तीवन्तोगभीराः ॥ चित्रसे

नाऽइषुबलाऽअमृद्ध्राःसतोवीराऽउरवोव्व्रातसाहाः ॥ ४६ ॥ ब्राह्मणा

सःपितरः ॥ ब्राह्मणासःपितरःसोम्यासःशिवेनोद्यावापृथिवीऽअ

नेहसा ॥ पूषानः पातुदुरितादृतावृधोरक्षामाकिर्न्नोऽअघशꣳसऽईश

त ॥ ४७ ॥ सुपर्ण्णंव्वस्ते । मृगोऽअस्यादन्तोगोभिःसन्नद्धापतति प्र ॥६१॥

सूता ॥ यत्रानरुᳬसञ्ञविचद्दवन्तितत्रास्मभ्यमिषवुᳬशर्म्मयस्सन्
॥ ४८ ॥ ऋजीतेपरि । वृङ्क्षिनोश्म्माभवतुनस्तनूः ॥ सोमोऽअधिब्र
वीतुनोदितिᳬशर्म्मयच्छतु ॥ ४९ ॥ आजङ्घन्ति ॥ आजङ्घन्तिसान्वे
षाञ्जघनाँ२ऽउपजिग्घ्नते ॥ अश्वाजनिप्प्रचेतसोश्वान्त्समत्सुचोदय
॥ ५० ॥ अहिरिवभोगैः । पर्य्येतिबाहुञ्ज्यायाहेतिम्परिबाधमानः ॥
हस्तग्घ्नोव्विश्वाव्वयुनानिविद्वान्पुमान्पुमाᳬसम्परिपातुव्विश्वतः
॥ ५१ ॥ व्वनस्पतेव्वीड्वङ्गः । व्वनस्पतेव्वीड्वङ्गोहिभूयाऽअस्मत्सखा
५७९

वं.दि. प्प्रतरणꣳसुवीरः॥ गोभिꣳसन्नद्धोऽअसिवीडयस्वास्थाताँजयतु उ. अ.
॥७०॥ जेत्वानि॥५२॥ दिवःपृथिव्याः॥ दिवःपृथिव्याःपर्य्योजऽउद्धृतं ॥२९॥
वनस्प्पतिब्भ्यःपर्य्याभृतꣳसहः॥ अपामोज्म्मानम्परिगोभिरावृत
मिन्द्रस्यवज्ज्रꣳहविषारथंय्यज॥५३॥ इन्द्रस्यवज्ज्रः॥ इन्द्रस्य
वज्ज्रोमरुतामनीकम्मित्रस्यगर्ब्भोवरुणस्यनाभिः॥ सेमान्नोहव्य
दातिञ्जुषाणोदेवरथप्प्रतिहव्यागृभाय॥५४॥ उपश्श्वासय। पृथिवी
मुतद्याम्पुरुत्त्रातेमनुताँविष्ठितञ्जगत्॥ सदुन्दुभेसजूरिन्द्रेणदेवैर्दूरा ॥७०॥

दवीयोऽअपसेधशत्रून् ॥ ५५ ॥ आक्रन्दय ॥ आक्रन्दयबलमोजोनऽ
आधानिष्टनिहिदुरिताबाधमानः ॥ अपप्प्रोथदुन्दुभेदुच्छुनांऽइतऽइ
न्द्रस्यमुष्टिरसिवीडयस्व ॥ ५६ ॥ आमूः ॥ आमूरजप्प्रत्यावर्त्तयेमाः
केतुमद्दुन्दुभिर्वावदीति ॥ समश्वपर्ण्णाश्चरन्तिनोनरोस्म्माकमिन्द्र र
थिनोजयन्तु ॥ ५७ ॥ आग्नेयःकृष्ष्णग्ग्रीवः । सारस्वतीमेषीबभ्रुः
सौम्म्यः पौष्ष्णः श्यामः शितिपृष्ठोबार्हस्प्पत्यः शिल्प्पोवैश्वदेवऽऐ
न्द्रोरुणोमारुतःकल्म्माषऽऐन्द्राग्नःसंहितोधोरामः सावित्रोवारु

संहि. णःकृष्णऽएकशितिपात्पेत्वः ॥५८॥ अग्नयेनीकवते ॥ अग्नयेनीक उ. अ.
॥७१॥ वतेरोहिताञ्जिरनड्वानधोरामौसावित्रौपौष्णौरजतनाभीवैश्वदेवौपि ॥२९॥
शङ्गौतूपरौमारुतःकल्माषऽआग्नेयःकृष्णोजःसारस्वतीमेषीवारु
णःपेत्वः ॥५९॥ अग्नयेगायत्राय । त्रिवृतेराथन्तरायाष्टाकपालऽइ
न्द्रायत्रैष्टुभायपञ्चदशायबार्हतायैकादशकपालोविश्वेभ्योदेवेभ्यो
जागतेभ्यः सप्तदशेभ्योवैरूपेभ्योद्वादशकपालोमित्रावरुणा ॥७१॥
भ्यामानुष्टुभाभ्यामेकविंशाभ्यांवैराजाभ्यांपयस्याबृहस्प

तयेपाङ्क्तायत्रिणवायशाक्वरायचरुꣳसवित्रऽऔष्ष्णिहायत्त्रयस्त्रिꣳ
शायरैवतायद्वादशकपालꣳप्प्राजापत्यश्चरुरदित्यैव्विष्ष्णुपत्न्यैचरु
रग्नयेव्वैश्वानरायद्वादशकपालोनुमत्याऽअष्टाकपालꣳ ॥ ६० ॥ [२४]

इति श्रीवाजसनेयसंहितायां एकोनत्रिंशोऽध्यायः ॥ २९ ॥

अथानुवाकसूत्रम् । देवसवितःषट् तपसेकौलालꣳषोडश द्वौ
द्वाविꣳशतिः ॥ हरिः ॐ देवसवितꣳ ॥ देवसवितꣳप्प्रसुवयज्ञंप्प्रसुव
यज्ञपतिम्भगाय ॥ दिव्योगन्धर्व्वꣳकेतपूꣳकेतन्नꣳपुनातुव्वाचस्प्पति

वं.हि. वाचन्नःस्वदतु ॥ १ ॥ तत्सवितुः ॥ तत्सवितुर्वरेण्यम्भर्गोदेवस्यधी उ. अ.
॥७२॥ महि ॥ धियोयोनः प्रचोदयात् ॥ २ ॥ विश्वानिदेव । सवितर्दुरिता ॥३०॥
निपरासुव ॥ यद्भद्रन्तन्नऽआसुव ॥ ३ ॥ विभक्तारꣳहवामहे ॥ विभ
क्तारꣳहवामहेवसोश्चित्रस्यराधसꣳ ॥ सवितारन्नृचक्षसम् ॥ ४ ॥
ब्रह्मणेब्राह्मणम् ॥ ब्रह्मणेब्राह्मणङ्क्षत्रायराजन्यम्मरुद्भ्योवैश्य
न्तपसेशूद्रन्तमसेतस्करन्नारकायवीरहणम्पाप्मनेक्लीबमाक्रयायां ऽ ॥७२॥
अयोगूङ्कामायपुँश्चलूमतिक्रुष्टायमागधम् ॥ ५ ॥ नृत्तायसूतम् ॥

नृ॒त्ताय॑सू॒तङ्गी॒ताय॑शैलू॒षन्धर्म्मा॑यसभाच॒रन्न॒रिष्ठा॑यैभी॒मलन्न॒र्म्माय॑रे॒

भꣳहसा॑यका॒रिमा॒नन्दाय॑स्त्रीष॒खम्प्र॒मदे॑कुमारीपु॒त्रम्मे॒धायै॑रथका॒र

न्धैर्य्या॑य॒तक्षाण॑म् ॥ ६ ॥ [६] तप॑सेकौला॒लम् ॥ तप॑सेकौला॒ल

म्मा॒याये॑कर्म्मा॒रꣳरू॒पाय॑मणिका॒रꣳशु॒भेव॒पꣳश॑र॒व्या॒याऽइषुका॒रꣳ

हे॒त्यैध॑नुष्का॒रङ्कर्म्म॑णेज्याका॒रन्दि॒ष्टाय॑रज्जुस॒र्जम्मृ॒त्यवे॑मृग॒युम॑न्त॑

काय॑श्व॒निन॑म् ॥ ७ ॥ न॒दीभ्य॑ःपौञ्जि॒ष्ठम् ॥ न॒दीभ्य॑ःपौञ्जि॒ष्ठमृ॒

क्षीका॑भ्यो॒नैषा॑दम्पुरुषव्या॒घ्राय॑दु॒र्म्मद॑ङ्गन्धर्व्वा॒प्सरोभ्यो॒व्रात्य॑म्प्र॒

युग्भ्यऽ उन्मत्त६ᳫं सर्प्पदेवजनेभ्योऽप्रतिपदमयेभ्य६ कितवमीर्य्य
तांयाऽ अकितवम्पिशाचेभ्यो बिदलकारींय्यातुधानेभ्य६ कण्टकी
कारीम् ॥ ८ ॥ सन्धयेजारम् ॥ सन्धयेजारङ्गेहायोपपतिमार्त्यैपरि
वित्तन्निर्ऋत्यैपरिविविदानमराध्याऽएदिधिषु६ पतिन्निष्कृत्यैपेशस्का
री ᳫं सञ्ज्ञानायस्मरकारीम्प्रकामोद्यायोपसदंवर्णायानुरुधम्बला
योपदाम् ॥ ९ ॥ उत्सादेभ्य६ कुब्जम् ॥ उत्सादेभ्य६ कुब्जम्प्रमु
देवामनन्द्वाभ्य६ स्स्राम ᳫं स्वप्नायान्धमधर्म्मायबधिरम्पवित्रायभि ॥७३॥

पजंम्प्रज्ञानांयनक्षत्रदर्शमांशिक्षायैप्प्रश्निनंमुपशिक्षायांऽअभिप्प्र
श्निनंम्मर्य्यादांयैप्प्रश्नविवाकम् ॥ १० ॥ अर्म्मैंभ्योहस्तिपम् ॥
अर्म्मैंभ्योहस्तिपञ्जवायांश्वम्पुष्टचैंगोपालंव्वीर्य्यायाविपालन्तेज
सेजपालमिरायैकीनाशंङ्कीलालांयसुराकारम्भद्रायंगृहपꣳश्रेयंसेवि
त्तधमाद्ध्यंक्ष्यायायानुक्षत्तारम् ॥ ११ ॥ भायैंदार्व्वाहारम् ॥ भायैंदार्व्वाहार
म्प्रभायांऽअग्न्येधम्ब्रध्नस्यंविष्टपांयाभिषेक्तारंव्वर्षिष्ठायनाकांयपरि
वेष्टारन्देवलोकायंपेशितारम्मनुष्यलोकायंप्रकरितारꣳ सर्व्वैंभ्यो

लोकेभ्यऽउपसेक्तारमवऽऋत्यैवधायोपमन्थितारम्मेधायवासः प
ल्पूलीम्प्रकामायरजयित्रीम् ॥ १२ ॥ ऋतयैस्तेनहृदयम् ॥ ऋतयै
स्तेनहृदयंवैरहत्यायपिशुनंविविक्त्यैक्षत्तारमौपद्रष्ट्र्यायानुक्षत्तार
म्बलायानुचरम्भूम्नेपरिष्कन्दम्प्रियायप्रियवादिनमरिष्ट्याऽअश्व
सादꣳस्वर्गायलोकायभागदुघंवर्षिष्ठायनाकायपरिवेष्टारम् ॥ १३ ॥ म
न्यवेयस्तापम् ॥ मन्यवेयस्तापङ्क्रोधायनिसरंय्योगाययोक्तारꣳशो
कायाभिसर्त्तारङ्क्षेमायविमोक्तारमुत्कूलनिकूलेभ्यस्त्रिष्ठिनंवपुषेमा ॥७४॥

नस्कृतढःशीलांयाज्ञनीकारीन्निर्ऋत्यैकोशकारींऽसमायासूम् ॥ १४ ॥
समायंयमसूम् ॥ समायंयमसूमथर्वुभ्योवंतोका ँ संवत्सरायंपर्या
यिणीम्परिवत्सराया विंजाताभिदावत्सरायातीत्वंरीमिद्वत्सरायांति
ष्कद्वंरींवत्सरायुविजंर्जरा ँ संवत्सरायपलिक्कीमृभुभ्योंजिनसन्धढः
साध्येभ्यंश्चर्म्मम्ननम् ॥ १५ ॥ सरोंभ्योधैवरम् ॥ सरोंभ्योधैवरमुंप
स्त्थावंराभ्योदाशैंवैशन्ताभ्योंवैन्दन्नंडलाभ्य ढं शौष्कंलम्पारायं
४६ माग्गांरमंवारायंकेवर्त्तैन्तीर्थेभ्यंऽआन्दंविषंमेभ्योमैनाल ँ स्वनें
५८९

भ्यः पर्ण्णकङ्गुहाभ्यः किरातं सानुभ्यो जम्भकम्पर्व्वतेभ्यः कि
म्पूरुषम् ॥ १६ ॥ बीभत्सायै पौल्कसम् ॥ बीभत्सायै पौल्कसंव्वर्ण्णा
यहिरण्यकारन्तुलायैव्वाणिजम्पश्चादोषायग्ग्लाविनंव्विश्वेभ्यो भूते
भ्यः सिध्मलम्भूत्यै जागरणमभूत्यै स्वपनमार्त्यै जनवादिनंव्यृद्ध्या
ऽअपगल्भं संशरायप्प्रच्छिदम् ॥ १७ ॥ अक्षराजाय कितवम्
॥ अक्षराजाय कितवङ्कृताया दिनवदर्शन्त्रेतायै कल्पिनन्द्वापरायाधि
कल्पिनमास्कन्दाय सभास्थाणुम्मृत्यवे गोव्यच्छमन्तकाय गोघात

क्षुधेयोगांविकृन्तन्तम्भिक्षमाण ऽ उपतिष्ठतिदुष्कृतायचरकाचार्य्यं
म्पाप्मनेसैलगम् ॥ १८ ॥ प्रतिश्रुत्कायाऽअर्त्तनम् ॥ प्रतिश्रुत्का
याऽअर्त्तनङ्घोषायभषमन्तायबहुवादिनमनन्तायमूकꣳ शब्दायाड
म्बराघातम्महसेवीणावादङ्क्रोशायतूणवध्ममवरस्परायशङ्खध्मं
वनायवनपमन्यतोरण्यायदावपम् ॥ १९ ॥ नर्म्मायपुँश्चलूम् ॥
नर्म्मायपुँश्चलूꣳ हसायकारिंयादसेशाबल्यांग्रामण्यङ्गणकमभि
क्रोशकन्तान्महसेवीणावादम्पाणिघ्नन्तूणवध्मन्तान्नृत्तायान

न्दायंतलवम् ॥ २० ॥ अग्नयेपीवानम् ॥ अग्नयेपीवानम्पृथिव्यै
पीठसर्प्पिणंवायवेचाण्डालमन्तरिक्षायवꣳशनर्त्तिनंदिवेखलतिꣳ
सूर्य्यायहर्य्यक्षन्नक्षत्रेभ्यः किर्म्मिरञ्चन्द्रमसेकिलासमह्नेशुक्लम्पिं
ङ्गाक्षꣳरात्र्यैकृष्णम्पिङ्गाक्षम् ॥ २१ ॥ अथैतान् ॥ अथैतानष्टौवि
रूपानालभतेतिदीर्ग्घञ्चातिह्रस्वञ्चातिस्थूलञ्चातिकृशञ्चातिशुक्ल
ञ्चातिकृष्णञ्चातिकुल्वञ्चातिलोमशञ्च ॥ अशूद्राऽअब्राह्मणास्ते
प्राजापत्याः ॥ मागधःपुंश्चलीकितवःक्लीबोशूद्राऽअब्राह्मणास्ते

प्प्राजापत्याः ॥ २२ ॥ [१६] इति श्रीवाजसनेयसंहितायां त्रिंश
त्तमोऽध्यायः ॥ ३० ॥

अथानुवाकसूत्रम् । सहस्रशीर्षाषोडशाद्भ्यःसम्भृतःषट् द्वौ द्वा
विꣳशतिः ॥ हरिः ॐ सुहस्रंशीर्षापुरुंषः । सहस्राक्षःसुहस्रंपात् ॥
सभूमिꣳसुर्व्वतंस्पृत्वात्यंतिष्ठद्दशाङ्गुलम् ॥ १ ॥ पुरुंषऽएव ॥ पुरुंष
एवेदꣳसर्व्वुंय्यद्भूतंय्यच्चंभाव्यम् ॥ उतामृंतत्वस्येशांनोयदन्नेनाति
रोहंति ॥ २ ॥ एतावांनस्य । महिमातोज्ज्यायाँश्चपूरुंषः ॥ पादोंस्य

॥७७॥ व्विश्श्वाभूतानित्त्रिपादस्यामृतन्दिवि ॥ ३ ॥ त्त्रिपादूर्द्ध्वः ॥ त्त्रिपादूर्द्ध्वऽ ॥३१॥
उदैत्पुरुषः पादोस्येहाभवत्पुनः ॥ ततोव्विष्ष्वङ्व्व्यक्क्रामत्साशनान
शनेऽअभि ॥ ४ ॥ ततोव्विराट् ॥ ततोव्विराडजायतव्विराजोऽअधिपूरु
षः ॥ सजातोऽअत्त्यरिच्च्यतपश्चाद्भूमिमथोपुरः ॥ ५ ॥ तस्माद्यज्ञात् ॥
तस्माद्यज्ञात्सर्व्वहुतः सम्भृतम्पृषदाज्ज्यम् ॥ पशूँस्ताँश्चक्क्रेव्वायव्व्याना
रण्ण्याग्ग्राम्म्याश्च्ये ॥ ६ ॥ तस्म्माद्यज्ञात् ॥ तस्म्माद्यज्ञात्सर्व्वहुत ॥७७॥
ऽऋचः सामानिजज्ञिरे ॥ छन्दाꣳसिजज्ञिरेतस्म्माद्यजुस्तस्म्माद

जागत ॥ ७ ॥ तस्म्मादश्श्वा÷ ॥ तस्म्मादश्श्वाऽअजायन्तयेकेचोभया
दतः ॥ गावोहजज्ञिरेतस्म्मात्तस्म्माज्जाताऽअजावय÷ ॥ ८ ॥ तंय्य
ज्ञम् ॥ तंय्यज्ञम्बर्हिषिप्प्रौक्षन्त्पुरुषञ्जातमग्ग्रतः ॥ तेनदेवाऽअयज
न्तसाद्ध्याऽऋषयश्श्चये ॥ ९ ॥ यत्पुरुषम् ॥ यत्पुरुषंव्व्यदधुःकतिधाव्व्य
कल्प्पयन् ॥ मुखङ्किमस्स्यासीत्किम्बाहूकिमूरूपादाऽउच्च्येते ॥ १० ॥
ब्राह्मणोस्य ॥ ब्राह्मणोस्यमुखमासीद्बाहूराजन्न्य÷कृतः ॥ ऊरूत
दस्स्ययद्वैश्श्य÷पद्भ्याᳪशूद्रोऽअजायत ॥ ११ ॥ चन्द्रमामनसः ॥

संहि. चन्द्रमामनसोजातश्चक्षोःसूर्योऽअजायत ॥ श्रोत्राद्वायुश्चप्राण उ. अ.
॥७८॥ श्चमुखांदग्निरंजायत ॥ १२ ॥ नाभ्यांऽआसीत् ॥ नाभ्यांऽआसीद ॥३१॥
न्तरिक्षᳪंशीर्ष्णोंद्यौःसमंवर्त्तत ॥ पद्भ्याम्भूमिर्दिशःश्रोत्रात्तथालो
काँ२अंकल्पयन् ॥ १३ ॥ यत्पुरुंषेण । हविषांदेवायज्ञमतंन्वत ॥
वसन्तोस्यासीदाज्यंग्रीष्मऽइध्मःशरद्धविः ॥ १४ ॥ सप्तास्यां
सन् ॥ सप्तास्यांसन्परिधयस्त्रिःसप्तसमिधंःकृताः ॥ देवायद्यज्ञन्तं
न्वानाऽअबध्नन्पुरुंषम्पशुम् ॥ १५ ॥ यज्ञेनंयज्ञम् ॥ यज्ञेनंयज्ञमंयज ॥७८॥

संहि. ॥७८॥ चन्द्रमामनसोजातश्चक्षोःसूर्य्यौऽअजायत ॥ श्रोत्राद्वायुश्चप्राण उ. अ.
श्चमुखादग्निरजायत ॥ १२ ॥ नाभ्याऽआसीत् ॥ नाभ्याऽआसीद ॥३१॥
न्तरिक्षꣳशीर्ष्णोद्यौःसमवर्त्तत ॥ पद्भ्याम्भूमिर्दिशःश्रोत्रात्तथालो
काँ२अकल्पयन् ॥ १३ ॥ यत्पुरुषेण । हविषादेवायज्ञमतन्वत ॥
वसन्तोस्यासीदाज्ज्यङ्ग्रीष्मऽइध्मःशरद्धविः ॥ १४ ॥ सप्तास्या
सन् ॥ सप्तास्यासन्परिधयस्त्रिःसप्तसमिधःकृताः ॥ देवायद्यज्ञन्त
न्वानाऽअबध्नन्पुरुषम्पशुम् ॥ १५ ॥ यज्ञेनयज्ञम् ॥ यज्ञेनयज्ञमयज ॥७८॥

न्तदेवास्तानिधर्म्माणिप्प्रथमान्यासन् ॥ तेहनाकम्महिमानःसच
न्तयत्रपूर्वेसाध्याःसन्तिदेवाः ॥ १६ ॥ [१६] अद्भ्यःसम्भृतः । पृथि
व्यैरसाच्चविश्वकर्म्मणःसमवर्त्तताग्ग्रे ॥ तस्यत्त्वष्टाविदधद्रूपमेतित
न्मर्त्यस्यदेवत्वमाजानमग्ग्रे ॥ १७ ॥ व्वेदाहम् ॥ व्वेदाहमेतम्पुरुष
म्महान्तमादित्यवर्ण्णन्तमसःपरस्तात् ॥ तमेवव्विदित्वातिमृत्युमे
तिनान्यःपन्थाव्विद्यतेयनाय ॥ १८ ॥ प्रजापतिश्चरति ॥ प्रजापतिश्च
रतिगर्ब्भेऽअन्तरजायमानोबहुधाव्विजायते ॥ तस्ययोनिम्परिपश्य

संहि. न्तिधीरास्तस्मिन्हतस्थुर्भुवनानिविश्वा ॥ १९ ॥ योदेवेभ्यः ॥ उ. अ.
॥७९॥ योदेवेभ्यऽआतपतियोदेवानाम्पुरोहितः ॥ पूर्वोयोदेवेभ्योजातोन ॥३१॥
मोरुचायब्राह्मये ॥२०॥ रुचम्ब्राह्मम् ॥ रुचम्ब्राह्मञ्जनयन्तोदेवाऽ
अग्ग्रेतदब्रुवन् ॥ यस्त्वैवम्ब्राह्मणोविद्यात्तस्यदेवाऽअसन्वशे ॥ २१ ॥
श्रीश्च ॥ श्रीश्चतेलक्ष्मीश्चपत्न्यावहोरात्रेपार्श्वेनक्षत्राणिरूपमश्विनौ
व्यात्तम् ॥ इष्णन्निषाणामुम्मऽइषाणसर्वल्लोकम्मऽइषाण ॥ २२ ॥
[६] इति श्रीवाजसनेयसंहितायां एकत्रिंशोऽध्यायः ॥ ३१ ॥ ॥७९॥

अथानुवाकसूत्रम् ॥ तदेवसप्त वेनस्तन्नव द्वौ षोडश ॥ हरिः ॐ
तदेव ॥ तदेवाग्निस्तदादित्यस्तद्वायुस्तदुचन्द्रमाः ॥ तदेवशुक्रन्तद्ब्र
ह्मताऽआपःसप्रजापतिः ॥ १ ॥ सर्व्वेनिमेषाः । सर्व्वेनिमेषाजज्ञिरे
विद्युतःपुरुषादधि ॥ नैनमूर्द्ध्वन्नतिर्य्यञ्चन्नमध्येपरिजग्रभत् ॥ २ ॥
नतस्य । प्प्रतिमाऽअस्तियस्यनाममहद्यशः ॥ हिरण्यगर्भऽइत्ये
षमामाहिꣳसीदित्येषायस्मान्नजातऽइत्येषः ॥ ३ ॥ एषोह । देवः
प्रदिशोनुसर्व्वाःपूर्व्वोहजातःसऽउगर्भेऽअन्तः ॥ सऽएवजातःसज

संहि. निषच्यमांणः प्प्रत्यङ्जनांस्तिष्ठतिसर्व्वतोंमुखः ॥ ४ ॥ यस्म्मांज्जातम् ॥ उ. अ.

॥८०॥ यस्म्मांज्जातन्नपुराकिञ्चनैवयऽआंबभूवभुवंनानिव्विश्वां ॥ प्प्रजापंतिः ॥३२॥

प्प्रजयांसᳬरराणस्त्रीणिज्ज्योतीᳬंषिसचतेसषोडशी ॥ ५ ॥ येनद्यौः ॥

येनद्यौरुग्ग्रापृंथिवीचंदृढायेनस्वस्तभितंय्येननाकंः ॥ योऽअन्तरि

क्षेरजंसोव्विमानंःकस्म्मैदेवायंहविषांव्विधेम ॥ ६ ॥ यङ्क्रन्दंसी ॥

यङ्क्रन्दंसीऽअवंसातस्तभानेऽअभ्यैक्षेंताम्मनंसारेजंमाने ॥ यत्राधि

सूरऽउदितोव्विभातिकस्म्मैदेवायंहविषांव्विधेम ॥ आपोंहयद्बृंहती ॥८०॥

र्य्याश्श्चिदाप॑ः ॥ ७ ॥ [७] व्वेनस्तत् ॥ व्वेनस्तत्पश्श्यन्निहि॑तङ्गुहा स
द्यत्रव्विश्श्वम्भवत्येकनीडम् ॥ तस्मिन्निदꣳसञ्चव्विचैतिसर्व्वꣳसऽओ
तःप्प्रोतश्श्चव्विभूःप्प्रजासु ॥ ८ ॥ प्रतत् ॥ प्रतद्वोचेदमृतन्नुव्विद्वान्गं
न्धर्व्वोधामव्विभृतङ्गुहासत् ॥ त्रीणिपदानिनिहितागुहास्ययस्तानि
वेदसपितुःपितासत् ॥ ९ ॥ सनः ॥ सनोबन्धुर्ज्जनितासव्विधाताधा
मानिवेदभुवनानिव्विश्श्वा ॥ यत्रदेवाऽअमृतमानशानास्तृतीयेधाम
५७ न्नध्यैरयन्त ॥ १० ॥ परीत्यभूतानि । परीत्यलोकान्परीत्यसर्व्वाःप्प्र

६०१ ~

॥८१॥ दिशोदिशश्च ॥ उपस्त्थायप्प्रथमजामृतस्यात्मनात्मानमभिसंवि ॥३२॥
वेश ॥११॥ परिद्यावापृथिवी । सद्यऽइत्वापरिँल्लोकान्परिदिशःपरि
स्वः ॥ ऋतस्यतन्तुंव्विततंव्विचृत्यतदपश्यत्तदभवत्तदासीत् ॥१२॥ स
दसस्पतिम् ॥ सदसस्पतिमद्भुतम्प्प्रियमिन्द्रस्यकाम्म्यम् ॥ सनिम्मे
धामयासिषꣳस्वाहा ॥१३॥ याम्मेधाम् ॥ याम्मेधान्देवगणाःपित
रश्चोपासते ॥ तयामामद्यमेधयाग्नेमेधाविनङ्कुरुस्वाहा ॥१४॥ मेधा
म्मे ॥ मेधाम्मेव्वरुणोददातुमेधामग्निःप्प्रजापतिः ॥ मेधामिन्द्रश्चव्वा ॥८१॥

युश्श्रीमेधान्धातादंदातुमेस्वाहा ॥ १५ ॥ इदम्मे ॥ इदम्मेब्रह्मंचक्षत्र
ञ्चोभेश्रियमश्नुताम् ॥ मयिदेवादधतुश्रियमुत्तमान्तस्यैतेस्वाहा
॥ १६ ॥ [९] इति श्रीवाजसनेयसंहितायां द्वात्रिंशोऽध्यायः ॥ ३२ ॥

अथानुवाकसूत्रम्। अस्याजरासः सप्तदशापश्चिद्वादश विभ्राद् च
तुर्दश प्रवावृजएकादश प्रवायुम्प्रवीरयापञ्चदशकावानस्त्रयोदश सप्त
सप्तनवतिः ॥ हरिः ॐ अस्याजरासः ॥ अस्याजरासोदमामरित्राः
अर्चद्धूमासोऽअग्नयः पावकाः ॥ श्वितीचयः श्वात्रासोभुरण्यवोव

संहि. नृषदोश्वायवोनसोमाः ॥१॥ हरयोधूमकेतवः ॥ हरयोधूमकेतवोवात उ. अ.
॥८२॥ जूताऽउपद्यवि ॥ यतन्तेवृथगग्नयः ॥ २ ॥ सजानः ॥ सजानोमित्रा ॥२३॥
वरुणासजादेवाँ२ऋतम्बृहत् ॥ अग्नेसक्षिस्वन्दमम् ॥ ३ ॥ सुकक्ष्वा
हि । देवहूतमाँ२अश्वाँ२अग्नेरथीरिव ॥ निहोतापूर्व्यःसदः ॥ ४ ॥
द्वेविरूपे । चरतःस्वर्थेऽअन्यान्यावत्समुपधापयेते ॥ हरिरन्यस्या
म्भवतिस्वधावाञ्छुक्रोऽअन्यस्यान्ददृशेसुवर्चाः ॥५॥ शतम् १७००
अयमिह । प्रथमोधायिधातृभिर्होतायजिष्ठोऽअध्वरेष्वीड्यः ॥ ॥८२॥

समग्नेवानोभृगंवोविरुरुचुर्व्वनेषुचित्रंविभ्वंविशेविशे ॥ ६ ॥ त्रीणि
शता । त्रीसहस्राण्यग्निन्त्रिंश्शच्चदेवानवंचासपर्य्यन् ॥ औक्षन्घृतै
रस्तृणन्बर्हिरस्म्मा आदिद्धोतारन्न्यसादयन्त ॥७॥ मूर्द्धानन्दिवः ॥
मूर्द्धानन्दिवोऽअरतिम्पृथिव्याव्वैश्वानरमृतऽआजातमग्निम् ॥ कविंᳫं
सम्राजमतिथिञ्जनानामासन्नापात्रञ्जनयन्तदेवाः ॥ ८ ॥ अग्निर्वृ
त्राणि । जङ्घनद्द्रविणस्युर्व्विपन्न्यया ॥ समिद्धᳫंशुक्रऽआहुतᳫं ॥ ९ ॥
विश्वेभिᳫंसोम्म्यम् ॥ विश्वेभिᳫंसोम्म्यम्मध्वग्नऽइन्द्रेणवायुना ॥ पि

बांमित्रस्यधामंभिः ॥ १० ॥ आयत् ॥ आयदिषेनृपतिन्तेजऽआ
नट्शुचिरेतोनिषिक्तन्द्यौरभीकें ॥ अग्निश्शर्द्धमनवद्यंय्युवानꣳस्वा
द्ध्यञ्जनयत्सूदयंञ्च ॥११॥ अग्नेशर्द्ध । महतेसौभंगायतवंद्युम्नान्युं
त्तमानिसन्तु ॥ सञ्जांस्पत्यꣳसुयममाकृंणुष्वशत्रूयतामभितिंष्ठा
महांꣳसि ॥१२॥ त्वाꣳहि । मन्द्रतममर्कशोकैर्ववृमहेमहिंनःश्रो
ष्यंग्ने ॥ इन्द्रन्नत्वाशवंसादेवतांव्वायुम्पृंणन्तिराधंसानृतंमाः ॥१३॥
त्वेऽअंग्ने । स्वाहुतप्प्रियासंःसन्तुसूरयंः ॥ यन्तारोयेमघवांनोजनां

नामूर्द्धान्दयन्तुगोनाम् ॥ १४ ॥ श्रुधिश्श्रुत्कर्ण्ण ॥ श्रुधिश्श्रुत्कर्ण्णव्व
न्हिंभिर्द्देवैरग्ग्नेसयावभिः ॥ आसीदन्तुबर्हिषिमित्रोऽअर्य्यमाप्रातु
र्य्यावाणोऽअद्ध्वरम् ॥ १५ ॥ व्विश्श्वेषामदितिः ॥ व्विश्श्वेषामदितिर्य्य
ज्ञियानांव्विश्श्वेषामतिथिर्म्मानुषाणाम् ॥ अग्निर्द्देवानामवऽआवृणा
नःसुमृडीकोभवतुजातवेदाः ॥ १६ ॥ महोऽअग्ग्नेः । संमिधानस्यश
र्म्मण्यनागामित्रेव्वरुणेस्वस्तये ॥ श्रेष्ठेस्यामसवितुःसवीमनितद्देवा
नामवोऽअद्याव्वृणीमहे ॥ १७ ॥ [१७] आपंश्चित् ॥ आपंश्चित्त्पि

ष्युस्तुर्य्यौंनगावोनक्षन्नृतञ्जरितारंस्तऽइन्द्र ॥ याहिवायुर्न्ननियुतो
नोऽअच्छात्वꣳहिधीभिर्द्दयसेविवाजान् ॥ १८ ॥ गावऽउप ॥ गावऽ
उपावतावतम्महीयज्ञस्यरप्सुदा ॥ उभाकर्ण्णाहिरण्ययां ॥ १९ ॥
यदद्य । सूरऽउदितेनागामित्रोऽअर्य्यमा ॥ सुवातिसवितामगः
॥ २० ॥ आसुतेसिञ्चतश्रियꣳरोदस्योरभिश्रियम् ॥ रसादधीतवृष
भम् ॥ तम्प्रत्नथायंवेनः ॥ २१ ॥ आतिष्ठन्तम्परि ॥ आतिष्ठन्तम्परि
विश्वेऽअभूषञ्छ्रियोवसानश्चरतिस्वरोचिः ॥ महत्तद्वृष्ण्णोऽअसुर ॥८४॥

स्युनामाविश्वरूपोऽअमृतानितस्थौ ॥ २२ ॥ एवं॑ ॥ एवोमुहेमन्द
मानायान्धुसोच्चाविश्वानंरायविश्वाभुवे ॥ इन्द्रंस्युयस्युसुमंखुहुस
होमहिश्रवोनृम्मणन्नरोदसीसपुर्य्यतं ॥ २३ ॥ बृहन्नित ॥ बृहन्नि
दिध्मऽएंषाम्भूरिंशुस्तम्पृथुःस्वरुं ॥ येषामिन्द्रोयुवासखा ॥२४॥
इन्द्रेहिं ॥ इन्द्रेहिमत्स्यन्धंसोविश्वेभिःसोमुपर्व्वभिः ॥ महाँ२ऽअं
भिष्टिरोजंसा ॥२५॥ इन्द्रोवृत्रम् ॥ इन्द्रोवृत्रमंवृणोच्छर्द्धंनीतिःप्प्र
मायिनांममिनाद्वर्प्पणीतिः ॥ अहुन्व्यृंसमुशधुग्गवनेष्वाविर्द्धेनाऽ

संहि. अकृणोद्ब्राम्म्याणाम् ॥ २६ ॥ कुतस्त्वम् ॥ कुतस्त्वमिन्द्रमाहिनंःस उ. अ.
॥८५॥ न्नेकोयासिसत्पतेकिन्तंऽइत्था ॥ सम्पृच्छसेसमराणःशुभानैर्वोचेस्त ॥३३॥
न्नोहारिवोयत्तेंऽअस्मे ॥ महाँ२ऽइन्द्रोयऽओजंसाकदाचनस्तरीरं
सिकदाचनप्प्रयुच्छसि ॥ २७ ॥ आतत्तंऽइन्द्रायवंः । पनन्ताभियऽ
ऊर्व्वङ्गोमंन्तन्तितृंत्सान् ॥ सकृत्स्वंऽयेपुंरुपुत्राम्महीं सहस्त्रंधाराम्बृ
हतीन्दुदुंक्षन् ॥ २८ ॥ इमान्तें ॥ इमान्तेधियम्प्रभंरेमहोमहीमस्य
स्तोत्रेधिषणायत्तंऽआनजे ॥ तमुंत्सवेचंप्प्रसवेचंसासहिमिन्द्रंन्देवा ॥८५॥

सुहस्रंशवंसामदुन्ननुं ॥ २९ ॥ [१२] विभ्राड्बृहत् ॥ विभ्राड्बृहत्पिंबतु

सोम्यम्मध्वायुर्दधंद्यज्ञपंतावविंह्रुतम् ॥ वातंजूतोयोऽअभिरक्षंति

त्मनांप्रजाःपुंपोषपुरुधाविराजति ॥ ३० ॥ उदुत्यम् ॥ उदुत्यञ्जातवें

दसन्देवंवंहन्तिकेतवंः ॥ दृशेविश्वांयसूर्यंम् ॥ ३१ ॥ येनांपावक ॥

येनांपावकचक्षंसाभुरण्यन्तञ्जनाँ२ऽअनुं ॥ त्वंवंरुणपश्यंसि ॥ ३२ ॥

दैव्यावध्वर्य्यू ॥ दैव्यांवध्वर्य्यूऽआगतᳬरथेनसूर्य्यंत्वचा ॥ मध्वांय

ज्ञᳬसमंञ्जाथे ॥ तम्प्रत्नथायंवेनश्चित्रन्देवानाम् ॥ ३३ ॥ आनंः ॥

आनुऽइडाभिर्व्विदथेसुशुस्तिव्विश्श्वानरंःसविृतादेवऽएतु ॥ अपियथा
सुवानोमत्संथानोव्विश्श्वञ्जगंदाभिपित्वेमंनीषा ॥ ३४ ॥ यदुद्य । कच्च
व्वृत्रहन्नुदगांऽअभिसूंर्य्य ॥ सर्व्वन्तदिन्द्रतेव्वशें ॥ ३५ ॥ तुरणिर्व्विश्श्व
दंर्शतः ॥ तुरणिर्व्विश्श्वदंर्शतोज्ज्योतिष्कृदंसिसूंर्य्य ॥ व्विश्श्वमाभांसि
रोचनम् ॥ ३६ ॥ तत्सूंर्य्यस्य । देवत्वन्तन्महित्वम्मुध्याकर्त्तोर्व्वितं
तꣳ सञ्जंभार ॥ यदेदयुंक्तहरितंःसुधस्त्थादाद्रात्रीव्वासंस्तनुतेसि
मस्म्मै ॥ ३७ ॥ तन्मित्रस्यं ॥ तन्मित्रस्यव्वरुंणस्याभिचक्षेसूंर्य्योरू

पङ्कृणुतेद्योरुपस्थे ॥ अनन्तमन्यद्रुशंदस्यपाजंः कृष्णमन्यद्धरि
तंः सम्भंरन्ति ॥ ३८ ॥ बण्णमहान् ॥ बण्णमहाँ२ऽअंसिसूर्र्यबडादि
त्यमहाँ२ऽअंसि ॥ महस्तैंसतोमंहिमापंनस्यतेद्धादेवमहाँ२ऽअसि
॥ ३९ ॥ बट्सूर्र्य श्रवंसामहाँ२ऽअंसिसत्रादेवमहाँ२ऽअंसि ॥ मन्हादे
वानांमसुर्र्यः पुरोहिंतोविभुज्योतिरदांभ्यम् ॥ ४० ॥ श्रायंन्तऽइवसू
र्र्यंम् ॥ श्रायंन्तऽइवसूर्र्यंविश्वेदिन्द्रंस्यभक्षत ॥ वसूंनिजातेजनंमा
४८ नऽओजंसाप्प्रतिभागन्नदींधिम ॥ ४१ ॥ अद्यादेवाः ॥ अद्यादेवाऽउ

दितासूर्य्यस्यनिरꣳहंसꣳपिपृतानिरवद्यात् ॥ तन्नोमित्रोवरुणोमाम
हन्तामदितिꣳसिन्धुः पृथिवीऽउतद्यौः ॥ ४२ ॥ आकृष्णेन ॥ आकृ
ष्णेनरजसावर्त्तमानोनिवेशयन्नमृतम्मर्त्यञ्च ॥ हिरण्ययेनसविता
रथेनादेवोयातिभुवनानिपश्यन् ॥ ४३ ॥ [१४] प्रवावृजे । सुप्र
याबर्हिरेषामाविश्पतीवबीरिटऽइयाते ॥ विशामक्तोरुषसः पूर्वहू
तौवायुःपूषास्वस्तयेनियुत्वान् ॥ ४४ ॥ इन्द्रवायूबृहस्पतिम् ॥
इन्द्रवायूबृहस्पतिम्मित्राग्निम्पूषणम्भगम् ॥ आदित्यान्मारुतङ्ग

णम् ॥ ४५ ॥ व्वरुणः प्प्राविता । भुवन्मित्रो व्विश्वाभिरूतिभिः ॥
करतान्नः सुराधसः ॥ ४६ ॥ अधिनः ॥ अधिनऽइन्द्रैषां व्विष्णोस
जात्यानाम् ॥ इतामरुतोऽअश्विना ॥ तम्प्रत्नथायंव्वेनोयेदेवासऽ
आनऽइडाभिर्व्विश्वेभिः सोम्म्यम्मद्ध्वोमासश्चर्षणीधृतः ॥ ४७ ॥
अग्नऽइन्द्र । व्वरुणमित्रदेवाः शर्द्धः प्प्रयन्तमारुतोतव्विष्णो ॥ उभा
नासत्यारुद्रोऽअधग्नाः पूषाभगः सरस्वतीजुषन्त ॥ ४८ ॥ इन्द्राग्नी
मित्रावरुणा ॥ इन्द्राग्नीमित्रावरुणादितिꣳस्वः पृथिवीन्द्यामरु

तुꣳपर्व्वताँ२ऽअपः ॥ हुवेविष्णुम्पूषणम्ब्रह्मणस्पतिम्भगन्नुशꣳसꣳ
सवितारमूतये ॥ ४९ ॥ अस्म्मेरुद्द्राः ॥ अस्म्मेरुद्द्रामेहनापर्व्वतासो
वृत्रहत्येभरहूतौसजोषाः ॥ यःशꣳसतेस्तुवतेधायिपज्ज्रऽइन्द्र
ज्ज्येष्ठाऽअस्म्माँ२ऽअवन्तुदेवाः ॥ ५० ॥ अर्व्वाञ्चोऽअद्य ॥ अर्व्वाञ्चोऽ
अद्याभवतायजत्राऽआवोहार्दिभयमानोव्व्ययेयम् ॥ त्राद्ध्वन्नोदेवा
निजुरोवृकस्ययत्राद्ध्वङ्कर्त्तादवपदोयजत्राः ॥ ५१ ॥ विश्श्वेऽअद्य ।
मरुतोविश्श्वऽऊतीविश्श्वेभवन्त्वग्नयःसमिद्धाः ॥ विश्श्वेनोदेवाऽअव

सागमन्तुविश्वंमस्तुद्रविणंवाजोऽअस्मे ॥५२॥ विश्वेदेवाः । शृणु
तेमꣳहवम्मेयेऽअन्तरिक्षेयऽउपद्यविष्ठ ॥ येऽअग्निजिह्वाऽउतवाय
जत्राऽआसद्यास्मिन्बर्हिषिमादयद्ध्वम् ॥५३॥ देवेभ्योहि । प्रथ
मꣳयज्ञियेभ्योमृतत्वꣳसुवसिभागमुत्तमम् ॥ आदिद्दामानꣳसवि
तर्व्यूर्णुषेनूचीनाजीविताम्मानुषेभ्यः ॥५४॥ [११] प्रवायुम् ॥ प्रवा
युमच्छाबृहतीम्मनीषाबृहद्रयिंविश्ववारꣳरथप्राम् ॥ द्युतद्यामानियु
तःपत्यमानःकविःकविमियक्षसिप्रयज्यो ॥५५॥ इन्द्रवायूऽइमे ।

सुताऽउपप्प्रयोभिरागतम् ॥ इन्दवोवामुशन्तिहि ॥ ५६ ॥ मित्रꣳ
हुवे । पूतदक्षंव्वरुणञ्चरिशादसम् ॥ धियङ्घृताचीꣳसाधन्ता ॥ ५७ ॥
दस्रायुवाकवः । सुतानासत्याव्वृक्तबर्हिषः ॥ आयातꣳरुद्रवर्त्तनी ॥
तम्प्प्रत्नथायंव्वेनः ॥ ५८ ॥ व्विदद्यदी ॥ व्विदद्यदीसरमारुग्णमद्रेर्म्महि
पाथः पूर्व्यꣳसध्र्यक्कः ॥ अग्ग्रन्नयत्सुपद्यक्षराणामच्छारवम्प्प्रथमा
जानतीगात् ॥ ५९ ॥ नहिस्प्पशम् ॥ नहिस्प्पशमविदन्नन्यमस्म्मा
द्वैश्वानरात्पुरऽएतारमग्नेः ॥ एमेनमवृधन्नमृताऽअमर्त्त्यंव्वैश्वानरङ्क्षै ॥८९॥

त्रंजित्यायदेवाः ॥ ६० ॥ उग्राह्विंघनिनं ॥ उग्राह्विंघनिनामृधंऽइ
न्द्राग्नीहवामहे ॥ तानोंमृडातऽईदृशें ॥ ६१ ॥ उपांस्म्मै ॥ गायतान
रःपवंमानायेन्दंवे ॥ अभिदेवाँ२इयंक्षते ॥ ६२ ॥ येत्वां ॥ हिहत्येंम
घवन्नवंर्द्धन्न्येशाम्बुरेहंरिवोयेगविंष्ठौ ॥ येत्वांनूनमंनुमदंन्तिविप्राःपि
बेन्द्रसोमहसगंणोमरुद्भिंः ॥ ६३ ॥ जनिंष्ठाऽउग्रःसहंसेतुरायंम
न्द्रऽओजिंष्ठोबहुलाभिंमानः ॥ अवंर्द्धन्निन्द्रंम्मरुतंश्चिदत्रंमातायद्वी
रन्दधनद्धनिंष्ठा ॥ ६४ ॥ आतु ॥ आतूनंऽइन्द्रवृत्रहन्नस्म्माकंमर्द्धमा

 गोंहि ॥ मुहान्मुहीभिरूतिभिः ॥ ६५ ॥ त्वामिन्द्र ॥ त्वामिन्द्रप्रतू
॥९०॥ र्तिष्वभिविश्वांऽअसिस्पृधः ॥ अशस्तिहाजनितावि॑श्वतूरसित्वन्तू ॥२३॥
र्य्यतरुष्यतः ॥ ६६ ॥ अनुते ॥ अनुतेशुष्मन्तुरयन्तमीयतुःक्षोणी
शिशुन्नमातरा । विश्वास्तेस्पृधःश्नथयन्तमन्यवेवृत्रंय्यदिन्द्रतूर्वसि
॥ ६७ ॥ यज्ञोदेवानाम् ॥ यज्ञोदेवानाम्प्रत्येतिसुम्नमादित्यासोभव
तामृडयन्तः ॥ आवोर्वाचीसुमतिर्ववृत्यादꣳहोश्चिद्यावरिवोवित्त ॥९०॥
रासत् ॥ ६८ ॥ अदब्धेभिःसवितः । पायुभिष्ट्वꣳशिवेभिरद्यपरिपा

हिनोगयंम् ॥ हिरण्ण्यजिह्वःसुवितायनव्व्यंसेरक्षामाकिर्न्नोऽअघशंꣳ
सऽईशत ॥ ६९ ॥ [१५] प्रवीरया । शुचंयोदद्रिरेवामध्वर्युभिर्म्म
धुमन्तःसुतासः ॥ वहंवायोनियुतोयाह्यच्छापिबासुतस्यान्धसोम
दाय ॥ ७० ॥ गावउपं ॥ गावऽउपावतावतम्महीयज्ञस्यरप्सुदा ॥
उभाकर्णाहिरण्ययां ॥ ७१ ॥ काव्ययंयोराजानेषु ॥ काव्ययंयोराजा
नेषुक्रत्वादक्षंस्यदुरोणे ॥ रिशादसासधस्थऽआ ॥ ७२ ॥ दैव्यांव
ध्वर्यू ॥ दैव्यांवध्वर्यूऽआगंतꣳरथेनसूर्य्यत्वचा ॥ मध्वायज्ञꣳसमं

॥९१॥ ञ्जाथे ॥ तम्प्रत्क्रथायंव्वेनः ॥ ७३ ॥ तिरश्चीनोव्विततः ॥ तिरश्चीनो ॥३३॥
व्विततोरश्मिरेषामधःस्विदासी३दुपरिस्विदासी३त् ॥ रेतोधाऽआं
सन्महिमानऽआसन्त्स्वधाऽअवस्तात्प्रयतिःपरस्तात् ॥ ७४ ॥ आरो
दसी । अपृणदास्वम्महज्जातंयदेनमपसोऽअधारयन् ॥ सोऽअध्व
रायपरिणीयतेकविरत्योनव्वाजंसातयेचनोहितः ॥ ७५ ॥ उक्थेभिर्वृ
त्रहन्तमा ॥ उक्थेभिर्वृत्रहन्तमायामन्दानाचिदागिरा ॥ आङ्गूषैरावि
वासतः ॥ ७६ ॥ उपनः । सुनवोगिरःशृण्वन्त्वमृतस्यये ॥ सुमृडी ॥९१॥

काभंवन्तुनꣳ ॥ ७७॥ ब्रह्मांणिमे । मतयꣳशꣳसुतासꣳशुष्म्मंऽइय
र्त्तिप्प्रभृंतोमेऽअद्रिं÷ ॥ आशांसतेप्प्रतिहर्य्यन्त्युक्थेमाहरींव्वहतस्ता
नोऽअच्छं॥ ७८ ॥ अनुंत्तमाते। मघवन्नकिर्न्नुनत्वावाँ२ऽअस्तिदेव
ताव्विदांनꣳ ॥ नजायंमानोनशंतेनजातोयानिंकरिष्प्याकृणुहिप्प्रं
वृद्ध ॥ ७९ ॥ तदित् ॥ तदिदांसभुवंनेषुज्ज्येष्ठंय्यतोंजज्ञऽउग्ग्रस्त्वेषनृं
म्म्णꣳ ॥ सद्योजंज्ञानोनिरिंणातिशत्रूननुयंव्विश्श्वेमदन्त्यूमाꣳ ॥८०॥
इमाऽउंत्वा । पुरूवसोगिरोंव्वर्द्धन्तुयाममं ॥ पावकवंर्ण्णाꣳशुचंयोव्वि

संहि. पृश्न्ति॒तो॒भिस्तो॑मै॒रनू॑षत ॥ ८१ ॥ यस्या॒यम् ॥ यस्या॒यं॒ विश्व॒ऽआर्यो॒ उ. अ
॥९.२॥ दा॒सः॒ शे॑व॒धि॒पाऽअ॒रिः ॥ ति॒रश्चि॑द॒र्य्ये रु॒शमे॒ पवी॑रवि॒तुभ्ये॒त्सोऽअ॒ ॥३३॥
ज्यते र॒यिः ॥ ८२ ॥ अ॒यꣳ स॒हस्र॑म् ॥ अ॒यꣳ स॒हस्र॒मृषि॑भिः॒ सह॑स्कृ
तः स॒मु॒द्रऽइ॑व पप्रथे ॥ स॒त्यः सोऽअ॑स्य महि॒मा गृ॑णे॒ शवो॑ य॒ज्ञेषु॑ विप्र
राज्ये॑ ॥ ८३ ॥ अद॑ब्धेभिः सवितः ॥ पा॒यु॒भि॒ष्ट्वꣳ शि॒वेभि॑र॒द्य परि॑पा
हि॒ नो॒ गय॑म् ॥ हिर॑ण्यजिह्वः सुवि॒ताय॒ नव्य॑से॒ रक्षा॒ माकि॑र्नो॒ऽअ॒घश॑ꣳ
सऽईशत ॥ ८४ ॥ [१५] आनः ॥ आनो॑ य॒ज्ञं दि॑वि॒स्पृश॒ं वायो॒ ॥९२॥

साहिसुमन्क्ष्मंभिः ॥ अन्तःपवित्रंऽउपरिश्रीणानोयःशुक्रोऽअंया
मिते ॥ ८५ ॥ इन्द्रवायूसुसन्दृशा । सुहवेहहंवामहे ॥ यथांनःसर्व्वऽ
इज्जनोनमीविःसङ्गमेसुमनाऽअसंत् ॥ ८६ ॥ ऋधगित्था । समर्त्यः
शशमेदेवतांतये ॥ योनूनम्मित्रावरुणावभिष्टंयऽआचक्रेहव्यदांतये
॥ ८७ ॥ आयांतम् ॥ आयांतमुपभूषतम्मध्वः पिबतमश्विना ॥ दुग्ध
म्पयोवृषणाजेन्यावसूमानोमर्द्धिष्टमागंतम् ॥ ८८ ॥ प्रैतु ॥ प्रैतुब्रह्म
४९ णस्पतिःप्रदेव्येतुसूनृता ॥ अच्छांवीरन्नर्य्यम्पंक्तिराधसन्देवायज्ञ

न्नंयन्तुनः ॥ ८९ ॥ चन्द्रमाऽअप्प्सु ॥ चन्द्रमाऽअप्प्स्वन्तरासुप
र्णोधावतेदिवि ॥ रयिम्पिशङ्गम्बहुलम्पुरुस्पृहꣳहरिरेतिकनिक्रदत्
॥ ९० ॥ देवन्देवंव्वः ॥ देवन्देवंव्वोवसेदेवन्देवमभिष्टये ॥ देवन्देवꣳ
हुवेमव्वाजंसातयेगृणन्तोदेव्व्याधिया ॥ ९१ ॥ दिविपृष्टः ॥ दिविपृष्टो
ऽअरोचताग्निर्व्वैश्वानरोबृहन् ॥ क्ष्मयांव्वृधानऽओजंसाचनोहितो
ज्योतिषाबाधतेतमः ॥ ९२ ॥ इन्द्राग्नीऽअपात् ॥ इन्द्राग्नीऽअपा
दियम्पूर्व्वागात्पद्वतीभ्यः ॥ हित्वीशिरोजिह्वयाव्वावदच्चरंत्रिꣳशत्प ॥९३॥

दान्यंक्रमीत् ॥ ९३ ॥ देवासोहिष्मा । मनंवेसमंन्यवोविश्वेसाकꣳ
सरातयꣳ ॥ तेनोऽअद्यतेऽअपरन्तुचेतुनोभवंन्तुव्वरिवोविदः ॥ ९४ ॥
अपांधमत् ॥ अपांधमदभिशंस्तीरशस्तिहाथेन्द्रोद्युम्न्याभंवत् ॥
देवास्तेऽइन्द्रसख्यायंयेमिरेबृहंद्भानोमरुंद्गण ॥ ९५ ॥ प्रवः ॥ प्रव
ऽइन्द्रांयबृहतेमरुंतोब्रह्मार्चत ॥ वृत्रꣳहंनतिवृत्रहाशतक्रंतुर्व्वज्रे
णशतपंर्व्वणा ॥ ९६ ॥ अस्येत् ॥ अस्येदिन्द्रोवावृधेवृष्ण्यꣳशवोम
देंसुतस्यविष्णंवि ॥ अद्यातमंस्यमहिमानंमायवोनुंष्टुवन्तिपूर्व्वथा ॥

 इमाऽउत्वासस्यायमयं सहस्रमूर्द्धऽऊषुणं॑ ॥ ९७ ॥ [१३]
 इति श्रीवाजसनेयसंहितायां त्रयस्त्रिंशोऽध्यायः ॥ ३३ ॥

अथानुवाकसूत्रम् ॥ यज्जाग्रतःपञ्चनद्यःसोमोधेनुमाकृष्णेनपूष
न्तवदशका नतदष्टौ षडष्टापञ्चाशत् ॥ हरिः ॐ यज्जाग्ग्रंतः ॥ यज्जा
ग्ग्रंतोदूरमुदैतिदैवन्तदुंसुप्तस्यतथैवैति ॥ दूरङ्गमञ्ज्योतिषाञ्ज्योतिरे
कन्तन्मेमनं॑शिवसंङ्कल्पमस्तु ॥ १ ॥ येनकर्म्माणि ॥ येनकर्म्मा
ण्ण्यपसोमनीषिणोयज्ञेकृण्वन्तिंविदथेषुधीराः ॥ यदंपूर्वंय्यक्षमन्तः

प्प्रजानान्तन्मेमनः शिवसंङ्कल्पमस्तु ॥ २ ॥ यत्प्रज्ञानम् ॥ यत्प्रज्ञा
नंमुतचेतोधृतिश्चयज्ज्योतिरन्तरमृतम्प्रजासु ॥ यस्म्मान्नऽऋतेकिञ्च
नकर्म्मंक्रियतेतन्मेमनः शिवसंङ्कल्पमस्तु ॥ ३ ॥ येनेदम् ॥ येनेद
म्भूतम्भुवनम्भविष्यत्परिगृहीतममृतेनसर्व्वम् ॥ येनयज्ञस्तायतेस
प्तहोतातन्मेमनः शिवसंङ्कल्पमस्तु ॥ ४ ॥ यस्म्मिन्नृचः ॥ यस्म्मि
न्नृचः सामयजूꣳषियस्म्मिन्प्रतिष्ठितारथनाभाविवाराः ॥ यस्मिँश्चि
त्तꣳसर्व्वमोतम्प्रजानान्तन्मेमनः शिवसंङ्कल्पमस्तु ॥ ५ ॥ सुषारथि

संहि. रश्वानिव ॥ सुषारथिरश्वानिवयन्मनुष्यान्नेनीयतेभीशुभिर्वाजिनऽ उ. अ.
॥९५॥ इव ॥ हृत्प्रतिष्ठन्यदजिरञ्जविष्ठन्तन्मेमनःशिवसङ्कल्पमस्तु ॥३४॥
॥ ६ ॥ पितुन्नु । स्तोषम्महोधर्म्माणन्तविषीम् ॥ यस्यत्रितोव्योजसा
वृत्रंविपर्व्वमर्द्दयत् ॥ ७ ॥ अन्विवत् ॥ अन्विदनुमतेत्वम्मन्यासैशञ्चन
स्कृधि ॥ क्रत्वेदक्षायनोहिनुप्रणऽआयूंषितारिषः ॥ ८ ॥ शतम्
१८०० ॥ अनुनः ॥ अनुनोद्यानुमतिर्य्यज्ञन्देवेषुमन्यताम् ॥ अग्नि ॥९५॥
श्चहव्यवाहनोभवंतन्दाशुषेमयः ॥ ९ ॥ सिनीवालिपृथुष्टुके ॥ सिनी

वालिपृथुं दृकेसादेवानामसिस्वसा ॥ जुषस्वंहुंव्यमाहुंतम्प्रजान्दे॑वि
दिदिड्डिनः ॥ १० ॥ [१०] पञ्चंनद्य÷ ॥ पञ्चंनद्य÷सरंस्वतीमपियन्ति
सस्रोंतसः ॥ सरंस्वतीतुपंञ्चधासोदेशेभंवत्सरित् ॥ ११ ॥ त्वमंग्ने ।
प्प्रथमोऽअङ्गिराऽऋषिर्दे॑वोदेवानांमभवःशिवःसखा ॥ तवंव्रतेकुव
योविद्मनापसोजांयन्तमरुतोभ्राजंदृष्टयः ॥ १२ ॥ त्वन्नं÷ ॥ त्वन्नोऽ
अग्नेतवंदेवपायुभिर्म्मघोनोरक्षतन्वश्चवन्द्य ॥ त्राताताेकस्यतनंयेग
वांमस्यानिमेषःरक्षंमाणस्तवंव्रते ॥ १३ ॥ उत्तानायामवं ॥ भराचि

संहि. कित्वान्सद्यश्प्रवीतांवृषणञ्जजान ॥ अरुषस्तूपोरुशंदस्यपाजऽइडां उ. अ.
॥९६॥ यास्पुत्रोवयुनेंजनिष्ट ॥ १४॥ इडांयास्त्वा । पदेवयन्नाभांपृथिव्याऽ ॥३४॥
अधि ॥ जातवेदोनिधीमह्यग्नेंहव्यायवोढवे ॥ १५ ॥ प्रमन्महे ।
शवसानायंशूषमाङ्गूषङ्गिर्वणसेऽअङ्गिरस्वत् ॥ सुवृक्तिभिंस्तुवतऽअ
ग्मियायार्च्चामार्कन्नरोविश्श्रुताय ॥ १६ ॥ प्रवं÷ ॥ प्रवोमहेमहिनमो
भरध्वमाङ्गूष्यंशवसानायसामं ॥ येनानःपूर्वेपितरं÷पदज्ञाऽअर्च्चं
न्तोऽअङ्गिरसोगाऽअविन्दन् ॥ १७॥ इच्छन्तित्वा । सोम्यासःस ॥९६॥

स्वायꣳसुन्न्वन्तिसोमन्दधातिप्प्रयाꣳसि ॥ तितिक्षन्तेऽअभिशस्तिञ्ज
नानामिन्द्रत्त्वदाकश्चनहिप्प्रकेतः ॥१८॥ नते । दूरेपरमाचिद्रजाꣳ
स्यातुप्प्रयाहिहरिवोहरिब्भ्याम् ॥ स्त्थिरायव्वृष्णेसवनाकृतेमायुक्ता
ग्ग्रावाणःसमिधानेऽअग्नौ ॥ १९ ॥ अषाढंय्युत्सुपृतनासुपप्प्रिꣳस्व
र्षामप्प्साव्वृजनस्यगोपाम् ॥ भरेषुजाꣳसुक्षितिꣳसुश्श्रवसञ्जयन्त
न्त्वामनुमदेमसोम ॥२०॥ [१०] सोमोधेनुम् । सोमोधेनुꣳसोमो
ऽअर्व्वन्तमाशुꣳसोमोव्वीरङ्कर्म्मण्यन्ददाति ॥ सादन्यंव्विदत्थ्यꣳस

भेयंम्पितृश्श्रवंणुंऽस्योददांशदस्म्मै ॥२१॥ त्वमिमाः ॥ त्वमिमाऽओ
॥९७॥ षंधीः सोमुव्विश्श्वास्त्वमपोऽअंजनयुस्त्वङ्गाः ॥ त्वमातंतन्थोर्व्वुन्तरिं ॥३४॥
क्षन्त्वज्ज्योतिंषाव्वितमौव्ववर्त्थ ॥२२॥ देवेनंनः ॥ देवेनंनोमनंसादेव
सोमरायोभागꣳ संहसावन्नभियुंद्ध्य ॥ मात्वातंनदीशिंषेव्वीर्य्युस्योभ
येंभ्यः प्प्रचिंकित्सागविंष्टौ ॥२३॥ अष्टौव्वि ॥ अष्टौव्व्यंख्यत्ककुभंः
पृथिव्यास्त्रीधन्वयोजंनासप्तसिन्धूंन् । हिरण्याक्षः संवितादेवऽआ
गाद्दधद्रत्नांदाशुषेव्वार्य्याणि ॥ २४ ॥ हिरंण्यपाणिः सविता । व्विचं ॥९७॥

र्षणिरुभेद्यावापृथिवीऽअन्तरीयते ॥ अपामीवाम्बाधतेवेत्तिसूर्य्यम
भिकृष्णेनरजंसाद्यामृणोति ॥२५॥ हिरंण्यहस्तोऽअसुंरः । सुनीथः
सुंमृडीकःस्ववांयात्वर्वाङ् ॥ अपसेधन्नक्षसोयातुधानानस्थाद्देवः
प्रतिदोषङ्गृंणानः ॥ २६ ॥ येते ॥ येतेपन्थाःसवितःपूर्व्यासोरेणवः
सुकृंताऽअन्तरिक्षे ॥ तेभिर्नोऽअद्यपथिभिःसुगेभीरक्षाचनोऽअधि
चब्रूहिदेव ॥२७॥ उभापिबतम् ॥ उभापिबतमश्विनोभानःशर्म्मय
च्छतम् ॥ अविद्रियाभिरूतिभिः ॥ २८ ॥ अप्नस्वतीमश्विना ॥

अप्न॑स्वतीमश्विना॒वाचं॑म॒स्मे कृ॒तन्नो॑दस्रा॒वृष॑णामनी॒षाम् ॥ अ॒द्यू॒त्ये
व॑से॒निह्व॑येवां॒वृ॒धे॑च॑नो भव॒तं॒वाज॑साता॑ ॥ २९ ॥ द्युभि॑र॒क्तुभिः॑ ॥ द्यु॒भि
र॒क्तु॒भिः॒परि॑पातम॒स्मानरि॑ष्टेभिरश्विना॒सौभ॑गेभिः ॥ तन्नो॑मि॒त्रोव॒
रु॑णोमामहन्ता॒मदि॑ति॒ःसिन्धु॑ःपृ॒थि॒वीऽउ॒तद्यौः ॥ ३० ॥ [१०]
आकृष्णेन॒ । रज॑सा॒व॒र्त॑मानोनि॒वे॒शय॑न्न॒मृतं॒मर्त्यं॑च ॥ हि॒र॒ण्यये॑
नस॑वि॒तार॒थे॒ना॒दे॒वोया॑ति॒भुव॑नानि॒पश्य॑न् ॥ ३१ ॥ आरा॑त्रि । पार्थि॑
व॒ꣳरज॑ःपि॒तुर॑प्रायि॒धाम॑भिः ॥ दि॒वःसदा॑ꣳसिबृह॒तीवि॒ति॑ष्ठस॒ऽ

आत्त्वेषंवर्त्ततेतमः ॥ ३२ ॥ उपस्तत् ॥ उपस्ताञ्चित्रमाभंरास्मभ्यं
वाजिनीवति ॥ येनंतोकञ्चतनंयञ्चधामहे ॥ ३३ ॥ प्रातरग्निम् ॥ प्रात
रग्निम्प्रातरिन्द्रं ँ हवामहेप्प्रातर्म्मित्रावरुणाप्प्रातरश्विनां ॥ प्रातर्भ
गम्पूषणम्ब्रह्मणस्पतिम्प्रातःसोममुतरुद्रँ हुवेम ॥ ३४ ॥ प्रातर्ज्जि
तम्भगम् ॥ प्रातर्ज्जितम्भगमुग्ग्रँ हुवेमव्वयम्पुत्रमदितेर्य्योविधर्त्ता ॥
आद्ध्रश्चिद्यम्मन्यमानस्तुरश्चिद्राजाचिद्यम्भगम्भक्षीत्याह ॥ ३५ ॥
भगप्प्रणेतः ॥ भगप्प्रणेतर्भगसत्यराधोभगेमान्धियमुदवाददन्नः

॥ भगप्प्रणोजनयगोभिरश्वैर्भगप्प्रनृभिर्नृवन्तः स्याम ॥ ३६ ॥ उते
दानीम् ॥ उतेदानीम्भगवन्तःस्यामोतप्प्रपित्वऽउतमध्येऽअह्नाम्
॥ उतोदितामघवन्त्सूर्य्यस्यव्वयन्देवानाᳬसुमतौस्याम ॥ ३७ ॥
भगऽएव । भगवाँ२ऽअस्तुदेवास्तेनव्वयम्भगवन्तःस्याम ॥ तन्त्वा
भगसर्व्वऽइज्जोहवीतिसनोभगपुरऽएताभवेह ॥ ३८ ॥ समध्वराय ॥
समध्वरायोषसोनमन्तदधिक्कावेवशुचयेपदाय ॥ अर्व्वाचीनंव्वसुवि
दम्भगन्नोरथमिवाश्वाव्वाजिनऽआवहन्तु ॥ ३९ ॥ अश्वावतीर्ग्गो

मंतीꣳ ॥ अश्वांवतीर्ग्गोमंतीर्न्नऽउषासोंव्वीरवंतीꣳसदंमुच्छन्तुभद्राः ॥
घृतन्दुहांनाव्विश्वतꣳप्रपींतायूयंपांतस्वस्तिभिꣳसदांनꣳ ॥ ४० ॥
[१०] पूषन्तवं । व्व्रतेव्वयन्नरिंष्येमकदांचन ॥ स्तोतारंस्तऽइह
स्मंसि ॥४१॥ पथस्पंथꣳपरिंपतिम् ॥ पथस्पंथꣳपरिंपतिंव्वचस्या
कामेंनकृतोऽअभ्यानडर्क्कम् ॥ सनोंरासच्छुरुधश्चन्द्राग्राधियंन्धि
यꣳसीषधातिप्रपूषा ॥४२॥ त्रीणिंपदाव्विचंक्रमेव्विष्णुर्ग्गोपाऽअदां
भ्यꣳ ॥ अतोधर्म्माणिधारयंन् ॥४३॥ तद्विप्रांसꣳ ॥ तद्विप्रांसोव्वि

पृन्यवोजागृवाꣳसःसमिन्धते ॥ विष्णोर्यत्परमम्पदम् ॥ ४४ ॥ उ. अ.

संहि. घृतवतीभुवनानाम् ॥ घृतवतीभुवनानामभिश्रियोर्वीपृथ्वीमधुदुघे ॥३४॥

॥१००॥ सुपेशसा ॥ द्यावापृथिवीवरुणस्यधर्म्मणाविष्कभितेअजरेभूरिरेतसा

॥ ४५ ॥ येनःसपत्नाऽअपतेभवन्त्विन्द्राग्निभ्यामवबाधामहे

तान् ॥ वसवोरुद्राऽआदित्याऽउपरिस्पृशम्मोग्रञ्चेत्तारमधिराजम

क्रन् ॥ ४६ ॥ आनासत्या । त्रिभिरेकादशैरिहदेवेभिर्यातम्मधुपेयं

मश्विना ॥ प्रायुस्तारिष्टन्नीरपाꣳसिमृक्षतꣳसेधतन्द्वेषोभवतꣳसचा ॥१००॥

भुवां ॥४७॥ एषवः ॥ एषवस्तोमोमरुतऽइयङ्गीर्म्मान्दार्य्यस्यंमा
न्यस्यंकारोः ॥ एषायांसीष्टतन्न्वेव्वयांव्विद्यामेषंव्वृजनञ्जीरदानुम्
॥४८॥ सहस्तोमाःसहच्छन्दसः ॥ सहस्तोमाःसहच्छन्दसऽआवृतः
सहप्प्रमाऽऋषयःसप्तदैव्याः ॥ पूर्व्वेषाम्पन्थामनुदृश्यधीराऽअन्वा
लेभिरेरथ्योनरश्मीन् ॥४९॥ आयुष्यंव्वर्च्चस्यम् ॥ आयुष्यंव्वर्च्च
स्यꣳरायस्पोषमौद्भिदम् ॥ इदꣳहिरण्यंव्वर्च्चस्वज्जैत्रायाविशतादु
माम् ॥५०॥ [१०] नतत् ॥ नतद्रक्षाꣳसिनपिशाचास्तरन्तिदेवा

संहि. ॥१०१॥ नामोजं÷प्प्रथमुजꣳह्येतत् ॥ सोबिभर्त्तिदाक्षायणꣳहिरंण्ण्यꣳसदे॑ उ. अ. ॥३४॥
वेषुंकृणुतेदीर्ग्घमायुꣳसमंनुष्ष्येषुकृणुतेदीर्ग्घमायुं÷ ॥ ५१ ॥ यदाबं
ध्धनन् ॥ यदाबंध्धनन्दाक्षायणाहिरंण्ण्यꣳशतानीकायसुमनस्य
मानाꣳ ॥ तन्मऽआबंध्नामिशतशारदायायुंष्ष्माञ्जरदष्टिर्य्यथासंम्
॥ ५२ ॥ उतनं÷ ॥ उतनोहिर्बुध्ध्न्य÷शृणोत्त्वजऽएकंपात्पृथिवीसं
मुद्रः ॥ विश्वेदेवाऽऋतावृधोहुवानास्तुतामन्त्राꣳकविशस्ताऽअवन्तु ॥१०१॥
॥५३॥ इमागिरं÷ ॥ इमागिरऽआदित्त्येभ्योघृतस्नूꣳसनाद्राजंभ्यो

जुह्वाजुहोमि ॥ शृणोतुमित्रोऽअर्य्यमाभगोनस्तुविजातोव्वरुणोद
क्षोऽअꣳशः ॥ ५४ ॥ सप्तऽऋषयः ॥ सप्तऽऋषयःप्रतिहिताः
शरीरेसप्तरक्षन्तिसदमप्रमादम् ॥ सप्तापःस्वपतोलोकमीयुस्तत्र
जागृतोऽअस्वप्नजौसत्रसदौचदेवौ ॥ ५५ ॥ उत्तिष्ठब्रह्मणस्पतेदे
वयन्तस्त्वेमहे ॥ उपप्रयन्तुमरुतःसुदानवऽइन्द्रप्राशूर्भवासचा
॥५६॥ प्रनूनम् ॥ प्रनूनम्ब्रह्मणस्पतिर्म्मन्त्रंव्वदत्युक्थ्यम् ॥ यस्मिन्
न्निन्द्रोव्वरुणोमित्रोऽअर्य्यमादेवाऽओकाꣳसिचक्रिरे ॥ ५७ ॥

ब्रह्मणस्पते ॥ ब्रह्मणस्पतेत्वमस्ययन्तासूक्तस्यबोधितनयञ्च
जिन्व ॥ विश्वन्तद्भद्रंयदवन्तिदेवाबृहद्वदेमविदथेसुवीराः ॥
यऽइमाविश्वाविश्वकर्म्मायोनः पितान्नपतेन्नस्यनोदेहि ॥ ५८ ॥
[८] इति श्रीवाजसनेयसंहितायां चतुस्त्रिंशोऽध्यायः ॥ ३४ ॥

अथानुवाकसूत्रम् । अपेतोदशापाघं द्वादश द्वौ द्वाविꣳशतिः ॥
हरिः ॐ अपेतः ॥ अपेतोयन्तुपणयोसुम्न्नादेवपीयवः ॥ अस्यलो
कः सुतावतः ॥ द्युभिरहोभिरक्तुभिर्व्यक्तंयमोददात्ववसानमस्मै

॥ १ ॥ सविताते ॥ सवितातेशरीरेभ्यःपृथिव्यांल्लोकमिच्छतु ॥
तस्म्मैयुज्यन्तामुस्रियाः ॥ २ ॥ वायुःपुनातु । सवितापुनात्वग्नेर्भ्रा
जसासूर्यस्यवर्चसा ॥ विमुच्यन्तामुस्रियाः ॥ ३ ॥ अश्वत्थेवः ॥
अश्वत्थेवोनिषदनम्पर्णेवोवसतिष्कृता ॥ गोभाजइत्किलासथय
त्सनवथपूरुषम् ॥ ४ ॥ सविताते । शरीराणिमातुरुपस्थऽआवपतु ॥
तस्म्मैपृथिविशम्भव ॥ ५ ॥ प्रजापतौत्वा । देवतायामुपोदकेलोके
निदधाम्म्यसौ ॥ अपनःशोशुचदघम् ॥ ६ ॥ परम्मृत्यो ॥ परम्म्

संहि. त्सोऽअनुपरेहिपन्थांऽयस्तेऽअन्यऽइतरोदेवयानात् ॥ चक्षुष्मते उ. अ.
॥१०३॥ शृण्वतेतेब्ब्रवीमिमानं÷प्प्रजाᳪंरीरिषोमोतव्वीरान् ॥ ७ ॥ शंव्वातः । ॥३५॥
शᳪंहितेघृणिःशन्तेभवन्त्विष्टकाः ॥ शन्तेभवन्त्वग्नयःपार्त्थिवा
सोमात्वाभिशूंशुचन् ॥ ८ ॥ कल्प्पंन्तान्ते । दिशस्तुब्भ्यमापं÷शिव
तमास्तुब्भ्यंम्भवन्तुसिन्धवः॥अन्तरिक्षᳪंशिवन्तुब्भ्यङ्कल्प्पंन्तान्ते
दिशःसर्व्वाः ॥ ९ ॥ अश्मन्वतीरीयतेसᳪंरभद्धमुत्तिष्ठतप्प्रतरतास
खायः ॥ अत्रांजहीमोशिवायेऽअसंञ्छिवान्वयमुत्तरेमाभिव्वाजान् ॥१०३॥

॥ १० ॥ [१०] अपाघम ॥ अपाघमपकिल्बिंषमपकृत्यामपोरपंः
॥ अपांमार्गत्वमस्म्मदपंदुःष्वप्न्यंꣳसुव ॥ ११ ॥ सुमित्रियानंः ॥
सुमित्रियानऽआपओषंधयः सन्तुदुर्म्मित्रियास्तस्म्मैसन्तुयोस्म्मा
न्द्वेष्टियञ्चवयन्द्विष्म्मः ॥ १२ ॥ अनड्वाहंमन्वारंभामहेसौरंभेयꣳ
स्वस्तयें ॥ सनऽइन्द्रंऽइवदेवेभ्योवह्निंःसन्तारंणोभव ॥ १३ ॥ उद्व
यम् ॥ उद्वयन्तमंसस्परिस्वंःपश्यंन्तऽउत्तंरम ॥ देवन्देवत्रासूर्य्य
मगंन्मज्योतिरुत्तमम् ॥ १४ ॥ इमञ्जीवेभ्यंः ॥ परिधिन्दंधामिमै

पान्नुगादपरो ऽअर्त्थमेतम् ॥ शतञ्जीवन्तुशरदः पुरूचीरन्तर्म्मृत्युन्द
धताम्पर्व्वतेन ॥ १५ ॥ अग्न ऽआयूᳬषि । पवस ऽआसुवोर्ज्जमिषञ्चनः
॥ आरेबाधस्वदुच्छुनाम् ॥ १६ ॥ आयुष्मानग्ने । हविषावृधानो
घृतप्प्रतीकोघृतयोनिरेधि ॥ घृतम्पीत्वामधुचारुगव्यम्पितेवपुत्रम
भिरक्षतादिमान्त्स्वाहा ॥ १७ ॥ परीमे । गामनेषतपर्य्यग्निमहृषत ॥
देवेष्वक्रतश्श्रवः कऽइमाँ२ऽआदधर्षति ॥ १८ ॥ क्रव्यादमग्निम् ॥
क्रव्यादमग्निम्प्रहिणोमिदूरंय्यमराज्यङ्गच्छतुरिप्रवाहः ॥ इहैवाय

॥१०४॥

मितरोजातवेदादेवेभ्योहव्यंवहतुप्रजानन् ॥ १९ ॥ वहंवपाम् ॥
वहंवपाञ्जातवेदःपितृभ्योयत्रैनान्वेत्थनिहितान्पराके ॥ मेदसःकु
ल्याऽउपतान्त्स्रवन्तुसत्याऽएषामाशिषःसन्नमन्ताᳪस्वाहा ॥ २० ॥
स्योनापृथिवि । नोभवानृक्षरानिवेशनी ॥ यच्छानःशर्म्मसप्रथाः ॥
अपनःशोशुचदघम् ॥ २१ ॥ अस्मात्त्वम् ॥ अस्मात्त्वमधिजातोसि
त्त्वदयञ्जायतांपुनः ॥ असौस्वर्गायलोकायस्वाहा ॥ २२ ॥ [१२]
इति श्रीवाजसनेयसंहितायां पञ्चत्रिंशोऽध्यायः ॥ ३५ ॥

अथानुवाकसूत्रम् । ऋचंवाचꣳषोडश द्यौःशान्तिरष्टौ द्वौ चतु
र्विꣳशतिः ॥ हरिःॐ ऋचंव्वाचंम् ॥ ऋचंव्वाचम्प्रपंद्येमनोयजुꣳप्प्रपंद्ये
सामंप्प्राणम्प्रपंद्येचक्षुꣳश्श्रोत्रम्प्रपंद्ये ॥ व्वागोजंःसहौजोमयिंप्प्राणा
पानौ ॥ १ ॥ यन्मे । छिद्द्रञ्चक्षुंषोहृदंयस्यमनंसोवातिंतृण्णम्बृहस्प्प
तिम्मेंतद्दंधातु ॥ शन्नोंभवतुभुवंनस्ययस्प्पतिंः ॥ २ ॥ भूर्भुवंः ॥
भूर्भुवꣳस्वःतत्संवितुर्व्वरेंण्यम्भर्गोंदेवस्यंधीमहि ॥ धियोयोनंःप्प्र
चोदयांत् ॥ ३ ॥ कयानꣳ ॥ कयांनश्चित्रऽआभुवदूतीसदावृंधꣳसखा

॥ कयाशचिष्ठयावृता ॥ ४ ॥ कस्त्वां । सत्योमदानाम्मꣳहिष्ठोम
त्सदन्धंसः ॥ दृढाचिदारुजेवसु ॥ ५ ॥ अभीषुणः । सखीनामविता
जरितॄणाम् ॥ शतम्भवास्यूतिभिः ॥ ६ ॥ कयात्वम् । कयात्वन्नऽऊ
त्याभिप्रमन्दसेवृषन् ॥ कयास्तोतृभ्यऽआभर ॥ ७ ॥ इन्द्रोविश्व
स्यराजति । शन्नोऽअस्तुद्विपदेशञ्चतुष्पदे ॥ ८ ॥ शन्नोमित्रश्शंवरु
णःशन्नोभवत्वर्य्यमा ॥ शन्नऽइन्द्रोबृहस्पतिःशन्नोविष्णुरुरुक्रमः
॥ ९ ॥ शन्नोवातः । पवताꣳशन्नस्तपतुसूर्य्यः ॥ शन्नःकनिक्रदद्देवः

पर्ज्जन्योऽअभिवर्षतु ॥ १० ॥ अहानिशम् ॥ अहानिशम्भवन्तुनः
शꣳरात्रीꣳप्रतिधीयताम् ॥ शन्नऽइन्द्राग्नीभवतामवोभिःशन्नऽइ
न्द्रावरुणारातहव्या ॥ शन्नऽइन्द्रापूषणावाजसातौशमिन्द्रासोमासु
वितायशंय्योः ॥ ११ ॥ शन्नः ॥ शन्नोदेवीरभिष्टयऽआपोभवन्तुपी
तये ॥ शंय्योरभिस्रवन्तुनः ॥ १२ ॥ स्योनापृथिवि । नोभवानृक्षरा
निवेशनी ॥ यच्छानःशर्म्मसप्रथाः ॥ १३ ॥ आपोहि । ष्ठामयोभुव
स्तानऽऊर्ज्जेदधातन ॥ महेरणायचक्षसे ॥ १४ ॥ योवः । शिवत

मोरसस्तस्यंभाजयतेहनं÷ ॥ उशतीरिंवमातरं÷ ॥ १५ ॥ तस्म्माऽ
अरंम् ॥ तस्म्माऽअरंङ्गमामवोयस्यक्षयांयजिन्वंथ ॥ आपोंजन
यंथाचनꣳ ॥ १६ ॥ [१६] द्यौःशान्तिं÷ ॥ द्यौःशान्तिरन्तरिं
क्षꣳशान्तिं÷पृथिवीशान्तिरापꣳशान्तिरोषंधयꣳशान्तिं÷ ॥ वन
स्पतंयꣳशान्तिर्व्विश्श्वेंदेवाःशान्तिर्ब्ब्रह्मशान्तिꣳसर्व्वꣳशान्तिꣳशान्तिं
रेवशान्तिꣳसामाशान्तिरेधि ॥ १७ ॥ दृतेदृꣳहंमा । मित्रस्यंमा
चक्षुंषासर्व्वांणिभूतानिसमीक्षन्ताम् ॥ मित्रस्याहञ्चक्षुंषासर्वांणि

भूतानिसमीक्षे ॥ मित्रस्यचक्षुषासमीक्षामहे ॥ १८ ॥ दृतेदृꣳ
हमा ॥ ज्योक्तेसन्दृशिजीव्यासुञ्ज्योक्तेसन्दृशिजीव्यासम् ॥ १९ ॥
नमस्तेहरसेशोचिषेनमस्तेऽअस्त्वर्चिषे ॥ अन्याँस्तेऽअस्मत्तप
न्तुहेतयःपावकोऽअस्मभ्यꣳशिवोभव ॥ २० ॥ नमस्ते । अस्तु
विद्युतेनमस्तेस्तनयित्नवे ॥ नमस्तेभगवन्नस्तुयतःस्वःसमीहसे
॥ २१ ॥ यतोयतःसमीहसेततोनोऽअभयङ्कुरु ॥ शन्नःकुरुप्रजा
भ्योभयन्नःपशुभ्यः ॥ २२ ॥ सुमित्रियानः ॥ सुमित्रियानऽआप

ऽओषधयः सन्तुदुर्म्मित्रियास्तस्म्मैसन्तुयोऽस्म्मान्द्वेष्टियञ्चवयन्द्वि
ष्म्मः ॥ २३ ॥ तच्चक्षुः ॥ तच्चक्षुर्द्देवहितम्पुरस्ताच्छुक्क्रमुच्चरत् ॥
पश्येमशरदः शतञ्जीवेमशरदः शतꣳशृणुयामशरदः शतम्प्रब्ब्रवाम
शरदः शतमदीनाःस्यामशरदः शतम्भूयश्चशरदः शतात् ॥ २४ ॥
[८] इति श्रीवाजसनेयसंहितायां षट्त्रिंशोऽध्यायः ॥ ३६ ॥

अथानुवाकसूत्रम् । देवस्यत्वादश समायत्वैकादश द्वावेकविꣳ
शतिः ॥ हरिः ॐ देवस्यत्वा । सवितुः प्प्रसवेऽश्विनोर्ब्बाहुभ्याम्पूष्णो

हस्ताभ्याम् ॥ आददेनारिरसि ॥ १ ॥ युञ्जतेमनः ॥ युञ्जतेमनऽउत
युञ्जतेधियोविप्राविप्रस्यबृहतोविपश्चितः ॥ विहोत्रादधेवयुनावि
देकऽइन्मुहीदेवस्यसवितुःपरिष्टुतिः ॥ २ ॥ देवीद्यावापृथिवी । मख
स्यवामद्यशिरोराध्यासन्देवयजनेपृथिव्याः ॥ मखायत्वामखस्यत्वा
शीर्ष्णे ॥ ३ ॥ देव्योवम्म्र्यः ॥ देव्योवम्म्र्योभूतस्यप्रथमजामखस्य
वोद्यशिरोराध्यासन्देवयजनेपृथिव्याः ॥ मखायत्वामखस्यत्वाशी
र्ष्णे ॥ ४ ॥ शतम् १९०० ॥ इयत्यग्रे ॥ इयत्यग्रऽआसीन्मखस्य

ते॒द्यशि॒रोरा॒द्ध्यासन्दे॒वय॒जने॑पृथि॒व्याः ॥ म॒खायं॑त्वाम॒खस्यं॑त्वाशी॒
र्ष्णे ॥ ५ ॥ इन्द्र॒स्यौजः॑ ॥ इन्द्र॒स्यौजं॑स्स्थम॒खस्यं॑वो॒द्यशि॒रोरा॒द्ध्या
सन्दे॒वय॒जने॑पृथि॒व्याः ॥ म॒खायं॑त्वाम॒खस्यं॑त्वाशी॒र्ष्णे ॥ म॒खायं॑त्वा
म॒खस्यं॑त्वाशी॒र्ष्णे ॥ म॒खायं॑त्वाम॒खस्यं॑त्वाशी॒र्ष्णे ॥ ६ ॥ प्रैतु । ब्र
ह्मं॑ण॒स्पति॒ः प्रदे॒व्येतु॒सू॒नृता॑ ॥ अच्छा॑वी॒रन्नर्य॑म्प॒ङ्क्तिरा॑धसन्दे॒वा य॒
ज्ञन्नं॑यन्तुनः ॥ म॒खायं॑त्वाम॒खस्यं॑त्वाशी॒र्ष्णे ॥ म॒खायं॑त्वाम॒खस्यं
त्वाशी॒र्ष्णे ॥ म॒खायं॑त्वाम॒खस्यं॑त्वाशी॒र्ष्णे ॥ ७ ॥ म॒खस्य॒शिरः॑ ॥

संहि. मखस्यशिरोऽसि ॥ मखायत्वामखस्यत्वाशीर्ष्णे ॥ मखस्यशिरोऽसि ॥ उ. अ.
॥१०९॥ मखायत्वामखस्यत्वाशीर्ष्णे ॥ मखस्यशिरोऽसि ॥ मखायत्वामख ॥३७॥
स्यत्वाशीर्ष्णे ॥ मखायत्वामखस्यत्वाशीर्ष्णे ॥ मखायत्वामखस्य
त्वाशीर्ष्णे ॥ मखायत्वामखस्यत्वाशीर्ष्णे ॥ ८ ॥ अश्वस्यत्वा ।
वृष्णःशक्नाधूपयामिदेवयजनेपृथिव्याः ॥ मखायत्वामखस्यत्वा
शीर्ष्णे ॥ अश्वस्यत्वावृष्णःशक्नाधूपयामिदेवयजनेपृथिव्याः ॥
मखायत्वामखस्यत्वाशीर्ष्णे ॥ अश्वस्यत्वावृष्णःशक्नाधूपयामि ॥१०९॥

देवयजनेपृथिव्याः ॥ मुखायंत्वामुखस्यंत्वाशीर्ष्णे ॥ मुखायंत्वामु
खस्यंत्वाशीर्ष्णे ॥ मुखायंत्वामुखस्यंत्वाशीर्ष्णे ॥ मुखायंत्वामुख
स्यंत्वाशीर्ष्णे ॥ ९ ॥ ऋजवेत्वा ॥ साधवेत्वासुक्षित्यैत्वा ॥ मुखायं
त्वामुखस्यंत्वाशीर्ष्णे ॥ मुखायंत्वामुखस्यंत्वाशीर्ष्णे ॥ मुखायं
त्वामुखस्यंत्वाशीर्ष्णे ॥ १० ॥ [१०] यमायंत्वा । मुखायंत्वासूर्यं
स्यत्वातपंसे ॥ देवस्त्वांसवितामध्वांनक्तुपृथिव्याःसꣳस्पृशस्पाहि ॥
अर्चिरंसिशोचिरंसितपोंसि ॥ ११ ॥ अनाधृष्टापुरस्तात् ॥ अनाधृष्टा

पुरस्ताद्ग्नेराधिपत्यऽआयुर्म्मेदा ऽ पुत्रवती दक्षिणतऽइन्द्रस्याधिपत्ये
प्प्रजाम्मेदाः ॥ सुखदाम्पश्चाद्देवस्यसवितुराधिपत्येचक्षुर्म्मेदाऽआ
श्श्रुतिरुत्तरतोधातुराधिपत्येरायस्प्पोषम्मेदाः ॥ व्विधृतिरुपरिष्टाद्बृ
हस्प्पतेराधिपत्यऽओजोमेदाव्विश्वाब्भ्योमानाष्ट्राब्भ्यस्प्पाहिमनोर
श्वासि ॥ १२ ॥ स्वाहामरुद्भिः । परिश्श्रीयस्वदिवःसᳬस्पृशस्प्पाहि ॥
मधुमधुमधु ॥ १३ ॥ गर्ब्भोदेवानाम् ॥ गर्ब्भोदेवानाम्पितामती ॥११०॥
नाम्पतिः प्प्रजानाम् ॥ सन्देवोदेवेनसवित्त्रागतसᳬसूर्य्येणरोचते

॥ १४ ॥ समग्निः ॥ समग्निरग्निनागतसन्दैवेनसवित्रासꣳसूर्य्येणा
रोचिष्ट ॥ स्वाहासमग्निस्तपसागतसन्दैव्येनसवित्रासꣳसूर्य्येणा
रूरुचत ॥ १५ ॥ धर्त्तादिवः ॥ धर्त्तादिवोविभातितपसस्पृथिव्या
न्धर्त्तादेवोदेवानाममर्त्यस्तपोजाः ॥ वाचमस्मेनियच्छदेवायुवम्
॥ १६ ॥ अपश्यङ्गोपाम् ॥ अपश्यङ्गोपामनिपद्यमानमाचपराच
पथिभिश्चरन्तम् ॥ ससध्रीचीःसविषूचीर्वसानआवरीवर्तिभुवने
५२ ष्वन्तः ॥ १७ ॥ विश्वासाम्भुवाम् ॥ विश्वासाम्भुवाम्पतेविश्वस्यम

नसस्प्पतेविश्श्वस्यव्वचसस्प्पतेसर्व्वस्यव्वचसस्प्पते ॥ देवश्श्रुत्त्वन्देवघ
र्म्मदेवोदेवान्पाह्यत्त्रप्प्रावीरनुवान्देववीतये ॥ मधुमाद्धीब्भ्याम्मधु
माधूचीब्भ्याम् ॥ १८ ॥ हृदेत्वामनसेत्वादिवेत्वासूर्य्यायत्वा ॥
ऊर्द्ध्वोऽअद्ध्वरन्दिविदेवेषुधेहि ॥ १९ ॥ पितानः ॥ पितानोसिपिता
नोबोधिनमस्तेऽअस्तुमामाहिꣳसीः ॥ त्वष्टृमन्तस्त्वासपेमपुत्त्रान्प
शून्मयिधेहिप्प्रजामस्म्मासुधेह्यरिष्टाहꣳसहपत्त्याभूयासम् ॥ २० ॥
अहः केतुना । जुषताꣳसुज्ज्योतिज्ज्योतिषास्वाहा ॥ रात्रिः केतु

नांजुषताꣳसुज्ज्योतिज्ज्यौतिषाुस्वाहा ॥ २१ ॥ [११] इति श्रीवाज
सनेयसंहितायां सप्तत्रिंशोऽध्यायः ॥ ३७ ॥

अथानुवाकसूत्रम् । देवस्यत्वाष्टौ यमायत्वाक्षत्रस्यत्वादशकौ त्रयोष्टाविꣳशतिः ॥ हरिः ॐ देवस्यंत्वा । देवस्यंत्वासवितुः प्प्रंसवेऽश्वि नोर्बाहुब्भ्यांम्पूष्णोहस्तांब्भ्याम् ॥ आददेदित्यैरास्स्नांसि ॥ १ ॥ इड ऽएहिं ॥ इडएहसदितऽएहिसरंस्वत्येहिं ॥ असावेह्यसावेहसावेहिं ॥ २॥ आदित्यैरास्स्नांसीन्द्राण्याऽउष्णीषं ॥ पूषासिंघर्म्मायंदीष्व

संहि. ॥ ३ ॥ अश्विभ्याम्पिन्वस्वसरस्वत्यैपिन्वस्वेन्द्रायपिन्वस्व ॥ स्वाहे उ. अ.
॥११२॥ न्द्रवत्स्वाहेन्द्रवत्स्वाहेन्द्रवत् ॥ ४ ॥ यस्ते । स्तनःशशयोयोमयोभू ॥३८॥
र्योरत्नधावसुविद्यःसुदत्रः ॥ येनविश्वापुष्यसिवार्याणिसरस्वति
तमिहधातवेकः ॥ उर्व्वन्तरिक्षमन्वेमि ॥ ५ ॥ गायत्रञ्छन्दः ॥ गाय
त्रञ्छन्दोसित्रैष्टुभञ्छन्दोसिद्यावापृथिवीभ्यान्त्वापरिगृह्णाम्यन्त
रिक्षेणोपयच्छामि ॥ इन्द्राश्विनामधुनःसारघस्यघर्म्मम्पातवसवोय
जतवाट् ॥ स्वाहासूर्यस्यरश्मयेवृष्टिवनये ॥ ६ ॥ समुद्रायत्वा । ॥११२॥

व्वातायस्वाहासरिरायत्वाव्वातायस्वाहा ॥ अनाधृष्यायत्वाव्वाताय स्वाहाप्प्रतिधृष्यायत्वाव्वातायस्वाहा ॥ अवस्यवेत्वाव्वातायस्वाहा शिमिदायत्वाव्वातायस्वाहा ॥७॥ इन्द्रायत्वा । व्वसुमतेरुद्रवतेस्वाहे न्द्रायत्वादित्यवतेस्वाहेन्द्रायत्वाभिमातिग्घ्नेस्वाहा ॥ सवित्रेत्वऽ ऋभुमतेव्विभुमतेव्वाजवतेस्वाहाबृहस्प्पतयेत्वाव्विश्श्वदेव्यावतेस्वाहा ॥ ८ ॥ [८] यमायत्वाङ्गिरस्वतेपितृमतेस्वाहा ॥ स्वाहाघर्म्माय स्वाहाघर्म्मःपित्रे ॥ ९ ॥ व्विश्श्वाऽआशांः ॥ व्विश्श्वाऽआशांदक्षिण

सद्भिश्चान्देवानयाडिह ॥ स्वाहाकृतस्यघर्म्मस्यमधोः पिबतम
श्विना ॥ १० ॥ दिविधाः ॥ दिविधाऽइमंय्यज्ञमिमंय्यज्ञन्दिविधाः
॥ स्वाहाग्नयेयज्ञियायशंय्यजुर्भ्यः ॥ ११ ॥ अश्विनाघर्म्मम् ॥
अश्विनाघर्म्मम्पातंहार्द्दानमहर्द्दिवाभिरूतिभिः ॥ तन्त्रायिणे
नमोद्यावापृथिवीभ्याम् ॥ १२ ॥ अपातामश्विना । घर्म्ममनुद्यावा
पृथिवीऽअमंसाताम् ॥ इहैवरातयः सन्तु ॥ १३ ॥ इषेपिन्वस्व ॥
इषेपिन्वस्वोर्ज्जेपिन्वस्वब्ब्रह्मणेपिन्वस्वक्षत्रायपिन्वस्वद्यावापृथिवी ॥११३॥

भ्यांपिन्वस्व ॥ धर्म्मासिसुधर्म्मामेन्न्यस्म्मेनृम्णानिधारयब्रह्मधा
रयक्षत्रन्धारयव्विशन्धारय ॥ १४ ॥ स्वाहापूष्णेशरसेस्वाहाग्ग्रा
वभ्यःस्वाहाप्प्रतिरवेभ्यः ॥ स्वाहापितृभ्यऽऊर्द्ध्वबर्हिभ्योघ
र्म्मपावभ्यःस्वाहाद्यावापृथिवीभ्याᳪंस्वाहाव्विश्वेभ्योदेवेभ्यः
॥ १५ ॥ स्वाहारुद्द्राय । रुद्द्रहूतयेस्वाहासञ्ज्योतिषाज्ज्योतिः ॥
अहःकेतुनाजुषताᳪंसुज्ज्योतिर्ज्ज्योतिषास्वाहा ॥ रात्रिःकेतुनाजु
षताᳪंसुज्ज्योतिर्ज्ज्योतिषास्वाहा ॥ मधुहुतमिन्द्रतमेऽअग्नावश्या

सं.टि. मंतेदेवघर्म्मनमंस्तेऽअस्तुमामांहिᳫंसीः ॥ १६ ॥ अभीमम् ॥ उ. अ.
।११४।। अभीमम्मंहिमादिवंव्विप्प्रौबभूवसप्प्रथाः ॥ उतश्रवंसापृथिवीᳫंसᳫं ।।३८।।
सीदस्वमहाँ२अंसिरोचंस्वदेववीतंमः ॥ व्विधूममंग्नेऽअरुषम्मिंयेद्ध्य
सृजप्प्रंशस्तदर्शतम् ॥१७॥ यातेंघर्म्मंदिव्व्याशुग्ग्यागांयत्र्याᳫंहंवि
र्द्धानें ॥ सातऽआप्प्यांयतान्निष्ट्यांयतान्तस्यैंतेस्वाहां ॥ यातेंघर्म्मान्त
रिक्षेशुग्ग्यात्रिष्टुब्भ्याग्नींध्रे ॥ सातऽआप्प्यांयतान्निष्ट्यांयतान्तस्यैंते ।।११४।।
स्वाहां ॥ यातेंघर्म्मंपृथिव्व्याᳫंशुग्ग्याजगंत्याᳫंसदस्या ॥ सातऽआ

प्प्यायतान्निष्ट्यायतान्तस्यैतेस्वाहा ॥ १८ ॥ [१०] क्षत्रस्यत्वा । पर
स्पायब्रह्मणस्तन्वम्पाहि ॥ व्विशस्त्वाधर्म्मणाव्वयमनुक्क्रामामसुवि
तायनव्व्यसे ॥ १९ ॥ चतुःस्रक्तिर्न्नाभिः ॥ चतुःस्रक्तिर्न्नाभिर्ऋत
स्यसप्प्रथाःसनोव्विश्वायुःसप्प्रथाःसनःसर्व्वायुःसप्प्रथाः ॥ अपद्द्वे
षोऽअपह्वरोऽन्यव्व्रतस्यसश्चिम ॥२०॥ घर्म्मैतत् ॥ घर्म्मैतत्तेपुरीषन्ते
नवर्द्धस्वचाचप्प्यायस्व ॥ व्वर्द्धिषीमहिचव्वयमाचप्प्यासिषीमहि
॥ २१ ॥ अचिक्क्रदद्वृषाहरिर्म्महान्मित्रोनदर्शतः ॥ सःसूर्य्येणदिद्यु

संहि. तद्दुधिर्न्निधिः ॥ २२ ॥ सुमित्रियानः ॥ सुमित्रियान ऽआप ऽओ उ. अ.
॥११५॥ षधयः सन्तुदुर्म्मित्रियास्तस्म्मैसन्तुयोस्म्मान्द्वेष्टियञ्चवयंद्विष्म्मः ॥३८॥
॥ २३ ॥ उद्वयम् ॥ उद्वयन्तमसस्परिस्वः पश्यन्तऽउत्तरम् ॥ देवन्दे
वत्रासूर्य्यमगन्मज्ज्योतिरुत्तमम् ॥ २४ ॥ एधोसि ॥ एधोस्येधिषीम
हिसमिदसितेजोसितेजोमयिधेहि ॥ २५ ॥ यावतीद्यावापृथिवी ।
यावच्चसप्तसिन्धवोवितस्थिरे ॥ तावन्तमिन्द्रतेग्ग्रहंमूर्जागृह्णाम्म्य
क्षितम्मयिगृह्णाम्म्यक्षितम् ॥ २६ ॥ मयित्यत् ॥ मयित्यदिन्द्रिय ॥११५॥

न्बृहन्मयिदक्षोमयिक्रतुः ॥ घर्म्मस्त्रिशुग्विराजतिविराजाज्योति
षासहब्रह्मणातेजसासह ॥ २७॥ पयसोरेतः ॥ पयसोरेतऽआभृत
न्तस्यदोहमशीमह्युत्तरामुत्तराᳬंसमाम् ॥ त्विषःसंवृक्रत्वेदक्षस्य
तेसुषुम्म्णस्यतेसुषुम्म्णाग्निहुतः ॥ इन्द्रपीतस्यप्प्रजापतिभक्षितस्य
मधुमतऽउपहूतऽउपहूतस्यभक्षयामि ॥ २८॥ [१०] इति श्रीवाज
सनेयसंहितायां अष्टत्रिंशोऽध्यायः ॥ ३८॥

अथानुवाकसूत्रम् । स्वाहाप्राणेभ्यःषडुग्रश्चसप्त द्वौ त्रयोदश ॥

शु. हि. हरिः ॐ स्वाहाप्प्राणेभ्यः ॥ स्वाहाप्प्राणेब्भ्यः साधिपतिकेब्भ्यः ॥ उ. अ.
॥२१६॥ पृथिव्यैस्वाहाग्नयेस्वाहान्तरिक्षायस्वाहाव्वायवेस्वाहा ॥ दिवेस्वाहा ।३९॥
सूर्य्यायस्वाहा ॥ १ ॥ दिग्भ्यःस्वाहा । चन्द्रायस्वाहानक्षत्रेब्भ्यः
स्वाहाद्भ्यःस्वाहाव्वरुणायस्वाहा ॥ नाब्भ्यैस्वाहापूतायस्वाहा ॥ २ ॥
व्वाचेस्वाहा । प्प्राणायस्वाहाप्प्राणायस्वाहा ॥ चक्षुषेस्वाहाचक्षुषे
स्वाहाश्श्रोत्रायस्वाहाश्श्रोत्रायस्वाहा ॥ ३ ॥ मनसःकामम् ॥ मन
सःकाममाकूतिंव्वाचःसत्यमशीय ॥ पशूनाᳪरूपमन्नस्यरसोयशः ॥११६॥

श्रीःश्श्रयताम्मयिस्वाहा ॥ ४ ॥ प्रजापतिःसम्भ्रियमाणःसम्म्राट्सम्भृ
तोव्वैश्श्वदेवःसंꣳसन्नोघर्म्मःप्रवृक्तस्तेजऽउद्यतऽआश्विनःपयस्यानी
यमानेपौष्णोव्विष्यन्दमानेमारुतःक्लथन् ॥ मैत्रःशरसिसन्ताय्य
मानेव्वायव्योह्रियमाणऽआग्नेयोहूयमानोव्वाग्घुतः ॥ ५ ॥ सविताप्प्र
थमे । ऽहन्नग्निर्द्वितीयेव्वायुस्तृतीयऽआदित्यश्चतुर्थेचन्द्रमाःपञ्चमऽऋ
तुःषष्ठेमरुतःसप्तमेबृहस्पतिरष्टमे ॥ मित्रोनवमेव्वरुणोदशमऽइन्द्र
ऽएकादशेव्विश्वेदेवाद्वादशे ॥ ६ ॥ [६] उग्रश्च । भीमश्चध्वान्तश्चधु

निश्च ॥ सासुक्ष्हाँश्चाभियुग्वाचोविक्षिपःस्वाहा ॥ ७ ॥ अग्निꣳहृदये
न ॥ अग्निꣳहृदयेनाशनिꣳहृदयाग्रेणपशुपतिङ्कृत्स्नहृदयेनभवंय्यक्
ना ॥ शर्वम्मतस्नाभ्यामीशानम्मन्युनामहादेवमन्तःपर्शव्येनोग्र
न्देवंव्वनिष्ठुनावसिष्ठहनुःशिङ्गीनिकोश्याभ्याम् ॥ ८ ॥ उग्रंल्लोहितेन
मित्रꣳसौव्रत्येनरुद्रन्दौर्व्रत्येनेन्द्रम्प्रक्रीडेनमरुतोबलेनसाध्यान्प्र
मुदा ॥ भवस्यकण्ठ्यꣳरुद्रस्यान्तःपार्श्व्यम्महादेवस्ययकृच्छर्वस्य
वनिष्ठुःपशुपतेःपुरीतत् ॥ ९ ॥ लोमभ्यःस्वाहा । लोमभ्यःस्वा ॥११७॥

हा॑त्व॒चेस्वाहा॑त्व॒चेस्वाहा॒लोहि॑ताय॒स्वाहा॒लोहि॑ताय॒स्वाहा॒मेदो॑भ्य॒ः

स्वाहा॒मेदो॑भ्य॒ःस्वाहा॑ ॥ मा॒ꣳसेभ्य॒ःस्वाहा॑मा॒ꣳसेभ्य॒ःस्वाहा॒

स्नाव॑भ्य॒ःस्वाहा॒स्नाव॑भ्य॒ःस्वाहा॒स्थभ्य॒ःस्वाहा॒स्थभ्य॒ःस्वा

हा॑म॒ज्जभ्य॒ःस्वाहा॑म॒ज्जभ्य॒ःस्वाहा॑ ॥ रेत॑से॒स्वाहा॑पा॒यवे॒स्वाहा॑

॥ १० ॥ आ॒या॒साय॒स्वाहा॑ । प्प्रा॒या॒साय॒स्वाहा॑संय्या॒साय॒स्वाहा॑वि

या॒साय॒स्वाहो॑द्या॒साय॒स्वाहा॑ ॥ शु॒चेस्वाहा॒शोच॑ते॒स्वाहा॒शोच॑मानाय॒

स्वाहा॒शोका॑य॒स्वाहा॑ ॥ ११ ॥ तप॑से॒स्वाहा॒ । तप्प्य॑ते॒स्वाहा॒तप्प्य॑माना

यस्वाहातप्प्तायस्वाहाघर्म्मायस्वाहा॥ निष्कृत्यैस्वाहाप्प्रायश्चित्त्यै
स्वाहाभेषजायस्वाहा॥ १२॥ यमायस्वाहा। यम।यस्वाहान्तकाय
स्वाहामृत्यवेस्वाहा॥ ब्रह्मणेस्वाहाब्रह्महत्यायैस्वाहाविश्वेब्भ्योदेवे
ब्भ्यःस्वाहाद्यावापृथिवीब्भ्याᳩस्वाहा॥ १३॥ [७] इति श्रीवाज
सनेयसंहितायां एकोनचत्वारिंशतितमोऽध्यायः॥ ३९॥

अथानुवाकसूत्रम्। ईशावास्यमष्टावन्धन्तमोनव द्वौ सप्तदश॥

हरिः ॐ ईशावास्यम ॥ ईशावास्यमिदᳩसर्व्वंय्यत्किञ्चजगत्याञ्ज

गंत् ॥ तेनंत्यक्तेनभुञ्जीथामागृंधःकस्यंस्विद्धनम् ॥ १ ॥ **कुर्वन्नेव** ॥
कुर्व्वन्नेवेहकर्म्माणिजिजीविषेच्छतꣳसमाः ॥ एवन्त्वयिनान्यथेतो
स्तिनकर्म्मलिप्यतेनरे ॥ २ ॥ **असुर्य्यानाम** । तेलोकाऽअन्धेनतम
सावृताः ॥ ताँस्तेप्रेत्यापिगच्छन्तियेकेचात्महनोजनाः ॥ ३ ॥ अ
नेजदेकम् ॥ अनेजदेकम्मनसोजवीयोनैनद्देवाऽआप्नुवन्पूर्व्वमर्शत् ॥
तद्धावतोन्यानत्येतितिष्ठत्तस्मिन्नपोमातरिश्वादधाति ॥ ४ ॥ तदेज
ति । तन्नैजतितद्दूरेतद्वन्तिके ॥ तदन्तरस्यसर्व्वस्यतदुसर्व्वस्यास्यबा

मं.हि. ह्यतः ॥ ५ ॥ यस्तु ॥ यस्तुसर्व्वाणिभूतान्यात्मन्नेवानुपश्यति ॥ सर्व्व उ. अ.
॥११९॥ भूतेषुचात्मानन्ततोनव्विचिकित्सति ॥ ६ ॥ यस्मिन्त्सर्व्वाणिभूता ॥४०॥
न्यात्मैवाभूद्विजानतः ॥ तत्रकोमोहः कःशोकऽएकत्त्वमनुपश्यतः
॥७॥ सपरि ॥ सपर्य्यगाच्छुक्रमकायमव्रणमस्नाविरꣳ शुद्धमपाप
विद्धम् ॥ कविर्म्मनीषीपरिभूःस्वयम्भूर्य्याथातथ्यतोर्थान्व्यदधा
च्छाश्वतीभ्यः समाभ्यः ॥८॥ [८] अन्धन्तमः । प्रविशन्तिये
सम्भूतिमुपासते ॥ ततोभूयऽइवतेतमोयऽउसम्भूत्याꣳरताः ॥ ९ ॥ ॥११९॥

६७८

अन्यदेव ॥ अन्यदेवाहुःसंम्भवादन्यदाहुरसंम्भवात् ॥ इतिशुश्रुम
धीराणांऽयेनस्तद्विचचक्षिरे ॥ १० ॥ सम्भूतिञ्च ॥ विनाशञ्चयस्त
द्वेदोभयंꣳसह ॥ विनाशेनंमृत्युन्तीर्त्वासम्भूत्यामृतमश्नुते ॥ ११ ॥
अन्धन्तमः । प्रविशन्तियेविद्यामुपासते ॥ ततोभूयऽइवतेतमोयऽ
उविद्यायांꣳरताः ॥ १२ ॥ अन्यदेव ॥ अन्यदेवाहुर्विद्यायाऽअन्य
दाहुरविद्यायाः ॥ इतिशुश्रुमधीराणांऽयेनस्तद्विचचक्षिरे ॥ १३ ॥
विद्याञ्च ॥ विद्याञ्चाविद्याञ्चयस्तद्वेदोभयंꣳसह ॥ अविद्ययामृत्यु

 न्तीर्त्वाँविद्ययामृतंमश्नुते ॥ १४ ॥ वायुरनिलम् ॥ वायुरनिलममृत
॥१२०॥ मथेदम्भस्मान्तꣳशरीरम् ॥ ॐ ३ ॥ क्रतोंस्मर ॥ क्लिबेस्मर ॥ कृतꣳ ॥४०॥
स्मर ॥ १५ ॥ अग्नेनय ॥ सुपथाराये॒ऽअस्म्मान्विश्श्वानिदेववयुना
निविद्वान् ॥ युयोध्ध्यस्म्मज्जुहुराणमेनोभूयिष्ठान्तेनमऽउक्तिम्विधे
म ॥ १६ ॥ हिरण्मयेनपात्रेण । सत्यस्यापिहितम्मुखम् ॥ योसा
वादित्येपुरुषःसोसावहम् ॥ १७ ॥ [९] ॐ ३ ॥ खम्ब्रह्म ॥ १८ ॥
इति श्रीवाजसनेयसंहितायां चत्वारिंशत्तमोऽध्यायः ॥ ४० ॥ ॥१२०॥